चतुर्वर्षीयः एकीकृतशिक्षकशिक्षाकार्यक्रमः

FOUR YEAR INTEGRATED TEACHER EDUCATION PROGRAMME (ITEP)

माध्यमिकस्तरः (Secondary Syllabus)

बी.ए.बी.एड्.

(B.A-B.Ed.)

2026 onwards

(As per NCTE Regulations 2022)

योऽनूचानः स नो महान्।

केन्द्रीयसंस्कृतविश्वविद्यालयः

शिक्षाशास्त्रकौशलप्रशिक्षणविद्यास्थानम्

केन्द्रीयसंस्कृतविश्वविद्यालयः

(संसदः अधिनियमेन स्थापितः)

रा.मू.प्र. परिषदा A++ श्रेण्यां प्रत्यायितः

नवदेहली - 110058

एकीकृत शिक्षकशिक्षाकार्यक्रमस्य रूपरेखा

एकीकृतशिक्षकशिक्षाकार्यक्रमस्य व्यापकसंरचना: आईटीईपी कार्यक्रमस्य अध्ययनावधिः वर्षचतुष्टयम् (अष्टानां सत्रार्द्धानाम्) अस्ति । अयं द्विविधस्नातकोपाधेः कार्यक्रमः वर्तते। अत्र एकः स्नातकोपाधिः शिक्षाशास्त्रे अपरश्च स्नातकोपाधिः ज्ञानस्य बहुविषयकशाखायाम् अन्तर्विषयकशाखायां वा प्रदीयते। किञ्च कार्यक्रमोऽयं छात्रशिक्षकयोः सामाजिकप्रतिबद्धतां समस्यासमाधानयोग्यताम् आलोचनात्मकचिन्तनं नैतिकतां रचनात्मकविचारान् सञ्चारकौशलानि चेत्यादीन् सामर्थ्यविशेषान् विकासयितुं क्षमते। शिक्षकान् निर्मातुम् इमानि सामर्थ्यानि अपेक्ष्यन्ते।

पाठ्यचर्याघटकाः

ITEP इत्यत्र निम्नलिखितपाठ्यचर्याघटकाः सन्ति –

1. द्विसाप्ताहिकः दीक्षारम्भकार्यक्रमः
2. शिक्षायाः आधाराः (30 श्रेयोऽङ्काः)
3. शास्त्रीयविषयाः/अन्तःशास्त्रीयविषयकपाठ्यक्रमः (88 श्रेयोऽङ्काः)
4. माध्यमिकस्तरविषयाधारितशिक्षणशास्त्रम् (16 श्रेयोऽङ्काः)
5. योग्यतासंवर्धानात्मकः मूल्यवर्धितश्च पाठ्यक्रमः (28 श्रेयोऽङ्काः)
6. विद्यालयानुभवः (20 श्रेयोऽङ्काः)
7. सामुदायिकसेवा शोधश्च (14 श्रेयोऽङ्काः) / सामुदायिकसेवा शोधेतरविषयश्च (श्रेयोऽङ्काः10)

द्विसाप्ताहिकः दीक्षारम्भकार्यक्रमः

शिक्षायाः आधाराः (30 श्रेयोऽङ्काः)

शास्त्रीयविषयाः/अन्तःशास्त्रीयविषयाः (88 श्रेयोऽङ्काः)

माध्यमिकस्तरविषयाधारितशिक्षण शास्त्रम् (16 श्रेयोऽङ्काः)

योग्यतासंवर्धनात्मकःमूल्यवर्धितश्च पाठ्यविषयाः (28 श्रेयोऽङ्काः)

विद्यालयानुभवः (20 श्रेयोऽङ्काः)

सामुदायिकसेवा शोधश्च (14 श्रेयोऽङ्काः)/ सामुदायिकसेवा शोधेतरविषयश्च(श्रेयोऽङ्काः10)

केन्द्रीयसंस्कृतविश्वविद्यालयः

ITEP Secondary Syllabus Credits - माध्यमिकस्तरीयपाठ्यक्रमश्रेयोऽङ्काः

क्र. सं.	पाठ्यचर्यात्मकघटकाः	पाठ्यविषयाः	प्रतिसत्रार्धश्रेयोऽङ्काः								पाठ्यविषयशः श्रेयोऽङ्काः	आहत्य श्रेयोऽङ्काः
			स.-1	स.-2	स.-3	स.-4	स.-5	स.-6	स.-7	स.-8		
1.0	द्विसाप्ताहिकः अभिमुखीकरणकार्यक्रमः	दीक्षारम्भः	-	-	-	-	-	-	-	-	-	30
2.1	शिक्षायाः आधाराः	भारतीयशिक्षायाःविकासः	4	-	-	-	-	-	-	-	4	
2.2		बालविकासः शैक्षिकमनोविज्ञानञ्च	-	-	4	-	-	-	-	-	4	
2.3		शिक्षायाः दार्शनिकं सामाजिकञ्च परिप्रेक्ष्यम् -1	-	-	-	4	-	-	-	-	4	
2.4		आकलनं मूल्याङ्कनञ्च	-	-	-	-	-	2	-	-	2	
2.5		समावेशात्मिका शिक्षा	-	-	-	-	-	2	-	-	2	
2.6		विद्यालयनेतृत्वं तथा प्रबन्धनपरिप्रेक्ष्यम्	-	-	-	-	-	-	2	-	2	
2.7		पाठ्यचर्यायोजना तद्विकासश्च (पाठ्यपुस्तकम्, सामग्रीविकासः, अन्यच्च)	-	-	-	-	-	-	2	-	2	
2.8		शिक्षायाः दार्शनिकं सामाजिकञ्च परिप्रेक्ष्यम् - II	-	-	-	-	-	-	-	4	4	
2.9		शिक्षानीतिविश्लेषणम्	-	-	-	-	-	-	-	2	2	

2.10		अधोलिखितेषु कश्चन एकः विकल्पः- (i) किशोरावस्था शिक्षाच (ii) मानसिकस्वास्थ्याय शिक्षा (iii) सन्धारणीयविकासाय शिक्षा (iv) शिक्षायाम् उदीयमाना प्रौद्योगिकी (v) लैङ्गिकशिक्षा (vi) निर्देशनं परामर्शनञ्च (vii) मानवाधिकारशिक्षा (viii) शान्तिशिक्षा (ix) क्रीडा सौष्ठवञ्च	-	-	-	-	-	-	-	4	4	
3.1	**शास्त्रीयविषयाः/ अन्तःशास्त्रीयविषयाः (विद्यालयपाठ्यचर्यातः)**	साहित्यम्/व्याकरणम्/दर्शनम्/ज्योतिषम्	8	12	12	12	12	8	**-**	**-**	64	**88**
3.2		हिन्दी साहित्यम्/आंग्लसाहित्यम्/ मलयालम् / बांग्लासाहित्यम् / उडियासाहित्यम् / मराठीसाहित्यम् / इतिहासः / राजनीतिः / भूगोलम् /अर्थशास्त्रम्	4	4	4	4	4	4	-	-	24	
4.1	**माध्यमिकस्तरीयं विषयाधारितं शिक्षणशास्त्रम्**	माध्यमिकस्तरे शिक्षणशास्त्रस्य मूलाधाराः	-	-	4	-	-	-	-	-	4	**16**
4.2		संस्कृतशिक्षणशास्त्रम् – I & II	-	-	-	2	-	2	-	-	4	
4.3		शास्त्रशिक्षणशास्त्रम् (साहित्यम्/ व्याकरणम्/ज्योतिषम्/दर्शनम्)	-	-	-	-	4	-	-	-	4	
4.4		आधुनिकविषयशिक्षणशास्त्रम् - I & II (हिन्दी/आंग्लम्/ सामाजिकविज्ञानम् /बांग्ला/ उडिया/मराठी/ मलयालम्)	-	-	-	2	-	2	-	-	4	

5.1	**योग्यतासंवर्धनं मूल्यसंवर्धित - पाठ्यविषयाश्च**	सम्प्रेषणात्मकं संस्कृतम्	4	-	-	-	-	-	-	-	4	**28**
5.2		सम्प्रेषणात्मकम् आंग्लम्	-	4	-	-	-	-	-	-	4	
5.3		कलाशिक्षा (प्रदर्शनकला:दृश्यकलाश्च)	2	-	-	-	-	-	2	-	4	
5.4		भारतावबोधः (मान्यता:ज्ञानप्रणाली च)	2	2	-	-	-	-	-	-	4	
5.5		शिक्षकः समाजश्च	-	2	-	-	-	-	-	-	2	
5.6		शिक्षायां सूचनासम्प्रेषणप्रौद्योगिकी	-	-	-	-	2	-	-	-	2	
5.7		गणितीयः संख्यात्मकश्च तर्कः	-	-	-	-	-	2	-	-	2	
5.8		क्रीडा पोषणं सौष्ठवञ्च	-	-	-	-	-	-	2	-	2	
5.9		योगः आत्मबोधश्च	-	-	-	-	-	-	-	2	2	
5.10		नागरिकता सन्धारणीयता पर्यावरणशिक्षा च	-	-	-	-	-	-	-	2	2	
6.1	**विद्यालयानुभवः**	पूर्वप्रशिक्षुता (सब्रह्मचारिशिक्षणं प्रदर्शनपाठाश्च)	-	-	-	-	2	-	-	-	2	**20**
6.2		विद्यालयावलोकनम् (क्षेत्राभ्यासः)	-	-	-	-	-	2	-	-	2	
6.3		विद्यालयाधारिता शोधपरियोजना	-	-	-	-	-	-	2	-	2	
6.4		शिक्षणप्रशिक्षुता	-	-	-	-	-	-	10	-	10	
6.5		उत्तरप्रशिक्षुता (समीक्षा विश्लेषणञ्च)	-	-	-	-	-	-	-	2	2	
6.6		शिक्षणाधिगमसामग्रीनिर्माणम्/कार्यानुभवः (शैक्षिकक्रीडनकनिर्माणम् / स्थानीयम् / पारम्परिकव्यवसायिकम् इत्यादीनि)	-	-	-	-	-	-	-	2	2	

7.1		A- सामुदायिकसेवा(राष्ट्रियसेवायोजना, साक्षरता कार्यक्रमः बालचरः इत्यादयः)	-	-	-	-	-	-	-	2	2	**4**
		B- भारतीयज्ञानपरम्परामाधृत्य स्वशास्त्रीयवैज्ञानिकपरियोजना	-	-	-	-	-	2	-	-	2	
		C - वाग्वर्धिनी (i) संस्कृतम्	-	-	-	-	-	-	-	-	-	
		(ii) आंग्लम्	-	-	-	-	-	-	-	-	-	
7.2	**शोधच्छात्रेभ्यः (Research) B.A. B.Ed. with Research**	Aअनुसंधानपद्धतिशास्त्रम्	-	-	-	-	-	-	4	-	4	**10**
		B-लघुशोधप्रबन्धः (Dissertation)-4cr मौखिकपरीक्षा (Viva) च – 2 Cr	-	-	-	-	-	-	-	6	6	
अथवा												
7.2	**शोधेतरच्छात्रेभ्यः (Non Research) B.A. B.Ed. without Research**	A -भारतीयज्ञानपरम्परामाधृत्य वैज्ञानिक शिक्षाशास्त्रीयपरियोजना (Theory)	-	-	-	-	-	-	-	2	2	**6**
		B -शास्त्रार्थः	-	-	-	-	-	-	-	4	4	
शोधच्छात्रेभ्यः - आहत्य श्रेयोऽङ्काः			**24**	**24**	**24**	**24**	**24**	**26**	**24**	**26**	**196**	**196**
शोधेतरच्छात्रेभ्यः - आहत्य श्रेयोऽङ्काः			**24**	**24**	**24**	**24**	**24**	**26**	**20**	**26**	**192**	**192**

- **ये छात्राः षट्सत्रार्धेषु आहत्य 7.5 CGPA प्राप्नुवन्ति ते एव ऐच्छिकरूपेण शोधविषयं चेतुं शक्नुवन्ति । तेषाम् आहत्य श्रेयोङ्काः 196 भविष्यन्ति । शोधेतरच्छात्राणां श्रेयोङ्काः:192 भविष्यन्ति।**
- **2024–25 तथा 2025-26 शैक्षणिकवर्षयोः शास्त्रीयविषयेषु/अन्तः शास्त्रीयविषयेषु (विद्यालयपाठ्यचर्यातः) सत्रार्धानुसारं श्रेयोऽङ्कवितरणस्य विवरणं निम्नानुसारम् अस्ति।**

पाठ्यविषयाः	**प्रतिसत्रार्ध श्रेयोऽङ्काः**									
		स.-1	**स.-2**	**स.-3**	**स.-4**	**स.-5**	**स.-6**	**स.-7**	**स.-8**	
साहित्यम्/व्याकरणम्/दर्शनम्/ ज्योतिषम्	**2024-25**	**8**	**8**	**8**	**8**	**16**	**16**	**-**	**-**	**64**
	2025-26	**8**	**8**	**12**	**12**	**12**	**12**	**-**	**-**	**64**

कार्यक्रमस्य उद्देशानि

बी.ए.बी.एड्. इतिपाठ्यचर्या निम्नलिखितोद्देश्यानुगुणं परिकल्पिता –

1. वर्तमानकक्ष्यायाःसमाह्वानानां वारणाय व्यावसायिकरूपेण व्यवहर्तुञ्च ज्ञानदक्षताभिः सज्जितानां शिक्षकाणां निर्माणम्।
2. क्षेत्रानुभवाधारेण सह व्यावहारिकानुभवेन सह च शिक्षायाःपरिप्रेक्ष्ये सुदृढपृष्ठभूमिवतां शिक्षकाणां निर्माणम्।
3. शिक्षाशास्त्रीयज्ञानस्य तर्कसङ्गतसङ्कल्पनायाः विकासः एतस्य ज्ञानस्य विशिष्टविषयेषु समावेशनञ्च।
4. शिक्षकेषु व्यावसायिकनैतिकतायाः विषये गहनाम् आलोचनात्मिकाञ्च जागरूकतां समुत्पाद्य चिन्तनात्मकाभ्यासेषु सहभागितायाः क्षमतायाः विकाससाधनम्।
5. विशिष्टबालकानां शैक्षिकावश्यकताः अवगन्तुं शिक्षकाणां सज्जीकरणम्।
6. सामाजिकसंसाधनानाम् अभिज्ञानाय तेषाम् उपयोगाय च शिक्षकाणां निर्माणम्।

माध्यमिकस्तरस्य शिक्षकाणां निर्माणाय विशिष्टोद्देश्यानि-

1. माध्यमिकशिक्षायाः स्वरूपम्, उद्देश्यं दर्शनञ्च अवगन्तुं भाविशिक्षकाणां सामर्थ्यसम्पादनम्।
2. शिक्षकाः विद्यार्थिनां मनोविज्ञानम् अवगन्तुं समर्थाः स्युः।
3. तेषां सामाजीकरणप्रक्रियाम् अवगच्छेयुः।
4. ते विशिष्टस्तरस्य पाठ्यक्रमविकासाय तस्य सञ्चालनाय मूल्याङ्कनाय च सम्बद्धां दक्षताम् अर्जयितुं सिद्धाः स्युः।
5. माध्यमिकस्तरेषु अध्याप्यमानानां विषयाणां शैक्षणिकविश्लेषणाय क्षमतोत्पादनम्।
6. तेषु वैयक्तिकशैक्षिकव्यावसायिकेषु क्षेत्रेषु छात्राणां मार्गदर्शनं कर्तुं क्षमतायाः विकाससाधनम्।
7. भाविशिक्षकाणां विभिन्नपरामर्शप्रविधिभिः छात्रसमस्यानां निराकरणसामर्थ्योत्पादनम्।
8. तेषु विद्यार्थिषु रचनात्मकचिन्तस्य अभिवृद्धिपूर्वकं ज्ञानस्य पुनर्निर्माणाय सामर्थ्यसम्पादनम्।
9. कक्षायां प्रायोगिकाभ्यासेषु अपेक्षितानां प्रमुखानां कारकाणां परिचायनम्।
10. तेषु शैक्षिकादानत्वेन सामाजिकसंसाधनानाम् अभिज्ञानपूर्वकं तेषाम् उपयोगकरणस्य ज्ञानसम्पादनम् ।
11. छात्राध्यापकेषु शिक्षणाधिगमसामग्रीणां (TLM) अभिज्ञाने विकासकरणे च पटुत्वसम्पादनम्।
12. तेषां सञ्चारकौशलानां विकासे सूचनासम्प्रेषणप्रविधेः उपयोगे च नैपुण्यसम्पादनम्।

अध्येतृवर्गः

बी.ए.बी.एड्. इति उपाधिधारकाः नवशिक्षानीतिः – 2020 इत्यस्य नूतनशिक्षाप्रणाल्यानुरूपं शिक्षायाः माध्यामिकस्तरेषु शिक्षकत्वेन कार्यं कर्तुम् अवसरं प्राप्स्यन्ति। अत्र प्रवेशः उच्चमाध्यमिकस्तरस्य (+2) तत्समकक्षपरीक्षायाः वा अनन्तरं अथवा विद्यालयस्य एनईपी – 2020 इत्यस्यानुगुणं 5+3+3+4 इति विद्यालयीयसंरचनायाम् उत्तीर्णतायाः परमेव अनुमन्यते। अयं पाठ्यक्रमः सर्वम् एकीकृत्य शिक्षकान् सक्षमान् करोति, तथैव तेषां स्वकार्यं यथासम्भवं प्रभावोत्पादकतया सम्पादयितुञ्च साहाय्यम् आचरति। अपि च विषयात्मकस्य व्यावसायिकज्ञानस्य च एकीकरणं सर्वेषु स्तरेषु (5+3+3+4) शिक्षणव्यवसाये अत्यन्तम् उत्तमानां प्रतिभावतां च नियुक्तेः आवश्यकतां पूरयति।

अवधिः कार्यदिनानि च

I. अवधिः

बी.ए.बी.एड्. इतिपाठ्यक्रमस्य अध्ययनावधिः चतुर्णां शैक्षिकवर्षाणां (अष्टानां सत्रार्द्धानाम्) यावत् भविष्यति। पाठ्यक्रमोऽयं प्रवेशस्य दिनाङ्कादारभ्य अधिकाधिकं षट्सु वर्षेषु समापयितुं शक्येत।

II. कार्यदिवसाः

अ. प्रत्येकं सत्रार्धे अन्त्यसत्रार्धेपरीक्षाः विहाय 15 – 16 सप्ताहानां शिक्षणाधिगमगतिविधयः भविष्यन्ति। एकस्मिन् सत्रार्धे सत्रार्धपरीक्षायाः दिनानि विहाय न्यूनातिन्यूनं 96 कार्यदिनानि भविष्यन्ति।

आ. प्रत्येकं कार्यसप्ताहे न्यूनातिन्यूनं 40 होराणां निर्देशात्मकसमयः अथवा सम्पर्कसमयः भविष्यति। एतस्मिन् काले आवश्यकतानुसारं साहाय्यार्थं, मार्गदर्शनार्थं, संवादार्थं, परामर्शार्थञ्च च छात्रप्रशिक्षकयोः उपलब्धतां सुनिश्चितुं सर्वेषां छात्राध्यापकानां संस्थायां भौतिकोपस्थितिः आवश्यकी।

इ. कक्षाशिक्षणेन संरचितान्तःक्रियया च सम्बद्धे अध्याप्यमाने पाठ्यक्रमे एकस्मिन् सत्रार्धे प्रत्येकं श्रेयोऽङ्काय न्यूनातिन्यूनं 15 होराणां निर्देशात्मकसमयस्य/सम्पर्कसमयस्य आवश्यकता भवति। प्रायोगिकेषु छात्राणां कृते कस्यापि अनुमोदितपरियोजनायां व्यावहारिकगतिविधिषु वा भागं ग्रहीतुम् एकस्मिन् सत्रार्धेप्रत्येकं श्रेयोऽङ्के न्यूनातिन्तूनं 30 होराणां नियोजनम् अनिवार्यं भविष्यति। नियमोऽयं संगोष्ठी, प्रशिक्षुता, प्रयोगशालाधारितगतिविधयः, प्रसारक्रियाकलापाः, कार्यशालाधारिताक्रियाकलापः, क्षेत्राधारितपरियोजना, अभ्यासः, सामुदायिकसेवा चेत्यादिषु क्रियाकलापेषु अनुप्रयुक्तः भविष्यति।

ई. छात्राध्यापकानां न्यूनतमोपस्थितिः सर्वेषु पाठ्यक्रमकार्येषु प्रायोगिकेषु च 80% विद्यालयानुभव-व्यावसायिकक्षमतोन्नयनं सामुदायिकसेवादिगतिविधिषु च 90% भविष्यति।

स्थानानि

केन्द्रीयसंस्कृतविश्वविद्यालयस्य विभिन्नेषु परिसरेषु बी.ए.बी.एड्. इतिपाठ्यक्रमे यथानियमं स्थानानि निर्धारितानि सन्ति। सहभागितापूर्णशिक्षणाय अधिगमसौविध्याय च पाठ्यक्रमस्य पद्धतीनाम्

अन्येषां प्रायोगिकगतिविधीनाञ्च कृते एकस्य विषयस्य अध्यापनाय प्रतिशिक्षकं पञ्चविंशतेः अधिकाः छात्राः न स्युः।

निर्देशस्य परीक्षायाश्च माध्यमः

आधुनिकविषयान् भाषासाहित्यं च विहाय पाठनस्य परीक्षायाः च माध्यमः संस्कृतम् अस्ति।

योग्यता

बी.ए.बी.एड्. इति पाठ्यक्रमे प्रवेशार्थम् इच्छुकानाम् अभ्यर्थिनां सविधे अधोलिखितरीत्या पात्रता परिकल्पिता अस्ति –

मान्यताप्राप्तमण्डलात्/परिषदः/विश्वविद्यालयात् वा 50% अङ्कैः समकक्षश्रेण्यां वा द्वादशी कक्षा/उत्तरमध्यमा/प्राक्शास्त्री/वरिष्ठोपाध्यायः/PUC/+2 समकक्षपरीक्षोत्तीर्णः।

स्थानानाम् आरक्षणम्

स्थानानाम् आरक्षणं भारतसर्वकारस्य प्रवर्तमानस्य मानदण्डानुसारं भविष्यति।

प्रवेशप्रक्रिया

प्रवेशः योग्यतायाः आधारेण प्रदीयते। बी.ए.बी.एड्. इति पाठ्यक्रमे प्रवेशार्थं मेधासूची निम्नलिखिताधारेण निर्मीयते –

1. NTA द्वारा आयोजितायां NCET – प्रवेशपरीक्षायां प्राप्तानाम् अङ्कानां प्रतिशतम्/शततमकम्।

एकीकृतशिक्षकशिक्षाकार्यक्रमस्य शुल्कविवरणम् –

प्रथमवर्षशुल्कम्

(प्रथमद्वितीयसत्रार्द्धेयोः)

क्रमसंख्या	विवरणम्	शुल्कम् (रूप्यकाणि)
1.	प्रवेशः	300
2.	प्रवेशप्रक्रिया	200
3.	नामाङ्कनम्	100
4.	पुस्तकालयस्य सुरक्षितधनराशिः (वर्षान्ते छात्रेभ्यः प्रत्यर्पयिष्यते)	400
5.	परिचयपत्रम्	100
6.	छात्रकल्याणम्	400
7.	दीक्षारम्भः स्वशास्त्रीयवैज्ञानिकपरियोजना (भा.ज्ञा.प. आधारिता)	2000
8.	परिसरीय विद्याशाखीयपत्रिका	100
9.	छात्रपत्रिका	200
10.	विविधप्रवृत्तिः(पाठ्यक्रमे उल्लिखितानां विभिन्नगतिविधीनां प्रायोगिककार्याणां च कृते)	7000
11.	पुस्तकालयसेवा	400
12.	क्रीडा	200
13.	शिक्षणशुल्कम्	2000
14.	सूचनासम्प्रेषणप्रौद्योगकीसौविध्यम्	300
15.	विशिष्टव्याख्यानम्/सङ्गोष्ठी	500
16.	शिक्षणोपकरणमञ्जूषा	1000
17.	परिसरीयविद्याशाखा विकासनिधिः (अधोसंरचनायै)	3000
	योग	**18200**

विशेष –

1. प्रतिसत्रार्द्धं परीक्षाशुल्कम् अतिरिक्तं देयम् भविष्यति।
2. अनुसूचितजातिभ्यः अनुसूचितजनजातिभ्यः दिव्याङ्गेभ्यश्च शिक्षणशुल्के 50 % निर्मुक्तः भविष्यति। इत्यतः 17,200/- शुल्करूपेण देयानि।

शुल्कमिदं शिक्षाशास्त्रविशेषछात्रकोषत्वेन परिगण्यते। अस्य व्ययः अधोलिखितरीत्या संरचितया समित्या भविष्यति –

अध्यक्षः – परिसरनिदेशकः

संयोजकः – शिक्षाशास्त्रविद्याशाखाध्यक्षः।

समन्वयकः – ITEP इतिकार्यक्रमस्य समन्वयकः।

सदस्याः – शिक्षाशास्त्रविद्याशाखायाः त्रयः प्राध्यापकाः।

छात्रसदस्याः - ITEP इति कार्यक्रमस्य प्रवेशपरीक्षायाम् अथवा गतपरीक्षायां सर्वाधिकाङ्कान् प्राप्तवन्तौ प्रत्येककक्षायाः एकैकः महिला-पुरुषच्छात्रः

एकीकृतशिक्षकशिक्षाकार्यक्रम (ITEP) बी.ए.बी.एड्,
द्वितीयवर्षशुल्कम्
(तृतीयचतुर्थसत्रार्द्धेयोः)

क्रमसंख्या	विवरणम्	शुल्कम् (रूप्यकाणि)
1.	प्रवेशः	300
2.	प्रवेशप्रक्रिया	200
3.	पुस्तकालयस्य सुरक्षितधनराशिः (वर्षान्ते छात्रेभ्यः प्रत्यर्पयिष्यते)	400
4.	परिचयपत्रम्	100
5.	छात्रकल्याणम्	400
6.	वाग्वर्धिनी (संस्कृतं आङ्ग्लं च)	2000
7.	परिसरीय विद्याशाखीयपत्रिका	100
8.	छात्रपत्रिका	200
9.	विविधप्रवृत्तिः(पाठ्यक्रमे उल्लिखितानां विभिन्नगतिविधीनां प्रायोगिककार्याणां च कृते)	7100
10.	पुस्तकालयसेवा	400
11.	क्रीडा	200
12.	शिक्षणशुल्कम्	2000
13.	सूचनासम्प्रेषणप्रौद्योगकीसौविध्यम्	300
14.	विशिष्टव्याख्यानम्/सङ्गोष्ठी	500
15.	शिक्षणोपकरणमञ्जूषा	1000
16.	परिसरीयविद्याशाखा विकासनिधिः (अधोसंरचनायै)	3000
	योग	**18200**

विशेष –

1. प्रतिसत्रार्द्धं परीक्षाशुल्कम् अतिरिक्तं देयः भविष्यति।
2. अनुसूचितजातिभ्यः अनुसूचितजनजातिभ्यः दिव्याङ्गेभ्यश्च शिक्षणशुल्के 50 % निर्मुक्तः भविष्यति। इत्यतः 17,200/- शुल्करूपेण देयानि।

शुल्कमिदं शिक्षाशास्त्रविशेषछात्रकोषत्वेन परिगण्यते। अस्य व्ययः अधोलिखितरीत्या संरचितया समित्या भविष्यति –

अध्यक्षः – परिसरनिदेशकः

संयोजकः – शिक्षाशास्त्रविद्याशाखाध्यक्षः।

समन्वयकः – ITEP इति कार्यक्रमस्य समन्वयकः।

सदस्याः – शिक्षाशास्त्रविद्याशाखायाः त्रयः प्राध्यापकाः।

छात्रसदस्याः- ITEP इति कार्यक्रमस्य प्रवेशपरीक्षायाम् अथवा गतपरीक्षायां सर्वाधिकाङ्कान् प्राप्तवन्तौ प्रत्येककक्षायाः एकैकः महिला-पुरुषच्छात्रः

एकीकृतशिक्षकशिक्षाकार्यक्रम (ITEP) बी.ए.बी.एड्,

शुल्कसंरचना
तृतीयवर्षशुल्कम्
(पञ्चमषष्ठसत्रार्द्धयोः)

क्रमसंख्या	विवरणम्	शुल्कम् (रूप्यकाणि)
1.	प्रवेशः	300
2.	प्रवेशप्रक्रिया	200
3.	पुस्तकालयस्य सुरक्षितधनराशिः (वर्षान्ते छात्रेभ्यः प्रत्यर्पयिष्यते)	400
4.	परिचयपत्रम्	100
5.	छात्रकल्याणम्	400
6.	पूर्वप्रशिक्षुता तथा विद्यालय अवलोकन	2000
7.	परिसरीय विद्याशाखीयपत्रिका	100
8.	छात्रपत्रिका	200
9.	विविधप्रवृत्तिः(पाठ्यक्रमे उल्लिखितानां विभिन्नगतिविधीनां प्रायोगिककार्याणां च कृते)	7100
10.	पुस्तकालयसेवा	400
11.	क्रीडा	200
12.	शिक्षणशुल्कम्	2000
13.	सूचनासम्प्रेषणप्रौद्योगकीसौविध्यम्	300
14.	विशिष्टव्याख्यानम्/सङ्गोष्ठी	500
15.	शिक्षणोपकरणमञ्जूषा	1000
16.	परिसरीय विद्याशाखा विकासनिधिः (अधोसंरचनायै)	3000
	योग	**18200**

विशेष –

1. प्रतिसत्रार्द्धं परीक्षाशुल्कम् अतिरिक्तं देयः भविष्यति।
2. अनुसूचितजातिभ्यः अनुसूचितजनजातिभ्यः दिव्याङ्गेभ्यश्च शिक्षणशुल्के 50 % निर्मुक्तः भविष्यति। इत्यतः 17,200/- शुल्करूपेण देयानि।

शुल्कमिदं शिक्षाशास्त्रविशेषछात्रकोषत्वेन परिगण्यते। अस्य व्ययः अधोलिखितरीत्या संरचितया समित्या भविष्यति –

अध्यक्षः – परिसरनिदेशकः

संयोजकः – शिक्षाशास्त्रविद्याशाखाध्यक्षः।

समन्वयकः – ITEP इति कार्यक्रमस्य समन्वयकः।

सदस्याः – शिक्षाशास्त्रविद्याशाखायाः त्रयः प्राध्यापकाः।

छात्रसदस्याः- ITEP इति कार्यक्रमस्य प्रवेशपरीक्षायाम् अथवा गतपरीक्षायां सर्वाधिकाङ्कान् प्राप्तवन्तौ प्रत्येककक्षायाः एकैकः महिला-पुरुषच्छात्रः

शुल्कसंरचना
चतुर्थवर्षशुल्कम्
(सप्तमअष्टमसत्रार्द्धयोः)

क्रमसंख्या	विवरणम्	शुल्कम् (रूप्यकाणि)
1.	प्रवेशः	300
2.	प्रवेशप्रक्रिया	200
3.	पुस्तकालयस्य सुरक्षितधनराशिः (वर्षान्ते छात्रेभ्यः प्रत्यर्पयिष्यते)	400
4.	परिचयपत्रम्	100
5.	छात्रकल्याणम्	400
6.	विद्यालयाधारिता शोधपरियोजना, उत्तरप्रशिक्षुता, शिक्षणप्रशिक्षुता, उपकरणनिर्माणम् शिक्षणाधिगमः, शिक्षाशास्त्र वैज्ञानिक परियोजना च	3000
7.	परिसरीय विद्याशाखीयपत्रिका	100
8.	छात्रपत्रिका	200
9.	विविधप्रवृत्तिः(पाठ्यक्रमे उल्लिखितानां विभिन्नगतिविधीनां प्रायोगिककार्याणां च कृते)	71 00
10.	पुस्तकालयसेवा	400
11.	क्रीडा	200
12.	शिक्षणशुल्कम्	2000
13.	संगणकीयकार्यम्	300
14.	विशिष्टव्याख्यानम्/सङ्गोष्ठी	500
15.	शिक्षणोपकरणमञ्जूषा	1000
16.	छात्रचरसंघशुल्कम्	100
17.	परिसरीयविद्याशाखा विकासनिधिः (अधोसंरचनायै)	3000
	योग	**19300**

विशेष –

1. प्रतिसत्रार्द्धं परीक्षाशुल्कम् अतिरिक्तं देयः भविष्यति।
2. अनुसूचितजातिभ्यः अनुसूचितजनजातिभ्यः दिव्याङ्गेभ्यश्च शिक्षणशुल्के 50 % निर्मुक्तः भविष्यति। इत्यतः 18,300/- शुल्करूपेण देयानि।

शुल्कमिदं शिक्षाशास्त्रविशेषछात्रकोषत्वेन परिगण्यते। अस्य व्ययः अधोलिखितरीत्या संरचितया समित्या भविष्यति –

अध्यक्षः – परिसरनिदेशकः

संयोजकः – शिक्षाशास्त्रविद्याशाखाध्यक्षः।

समन्वयकः – ITEP इति कार्यक्रमस्य समन्वयकः।

सदस्याः – शिक्षाशास्त्रविद्याशाखायाः त्रयः प्राध्यापकाः।

छात्रसदस्याः- ITEP इति कार्यक्रमस्य प्रवेशपरीक्षायाम् अथवा गतपरीक्षायां सर्वाधिकाङ्कान् प्राप्तवन्तौ प्रत्येककक्षायाः एकैकः महिला-पुरुषच्छात्रः

छात्रावासस्य भोजन च शुल्कम् – कार्यक्रमप्रवेशशुल्कं विहाय छात्रावासशुल्कं, पाकशालाशुल्कं च छात्रैः पृथक्पृथक् वहनीयम्।

उपस्थितिः

1. छात्रशिक्षकाणां न्यूनतमा उपस्थितिः सम्पूर्णसैद्धान्तिकपाठ्यक्रमस्य कृते 80% विद्यालयानुभव-व्यावसायिकक्षमतोन्नयनं सामुदायिकसेवादिगतिविधिषु च 90% अस्ति।
2. येषां छात्राणां पर्याप्ता उपस्थितिः न भविष्यति, तेषां कृते केन्द्रीयसंस्कृतविश्वविद्यालयेन अन्यया वा सर्वकारीयसंस्थाया अर्धसर्वकारीयसंस्थायाः वा कस्यापि छात्रवृत्तेः अथवा केनापि प्रकारस्य आर्थिकसाहाय्यर्थं पुरस्कर्तुं वा विचार न भविष्यति।
3. येषां छात्राणां पर्याप्ता उपस्थितिः नास्ति तेषां परीक्षायां कथमपि प्रवेशः न भविष्यति।
4. केन्द्रीयसंस्कृतविश्वविद्यालयस्य शिक्षाशास्त्रविद्याशाखायाः निर्धारितपञ्चाङ्गानुसारं प्रवेशारम्भदिनाङ्कात् उपस्थितेः गणना भविष्यति।
5. यासु आन्तरिकगतिविधिषु अङ्काः प्रदीयन्ते, ताः सर्वाः अनिवार्याः सन्ति।
6. अनुमतिं विना दशदिनानां सततानुपस्थितिः भवति चेत् विभागाध्यक्षस्य अनुशंसया निदेशकः प्रवेशनिरसनं कर्तुं शक्नोति।
7. अनुशासनम् उपस्थितिः इत्यादिविषये विश्वविद्यालयस्य सम्बद्धविनियमाः परिनियमाश्च परिपालनीयाः।

चतुर्वर्षीयः एकीकृतशिक्षकशिक्षाकार्यक्रमः

(Four-Year Integrated Teacher Education Programme)

प्रथमः सत्रार्द्धः (Semester I)

द्विसाप्ताहिकः दीक्षारम्भकार्यक्रमः

(Two Weeks Student Induction Programme)

विविधसामाजिक-आर्थिक-भाषिकपृष्ठभूमिभ्यः द्वादशीं तत्समकक्षां वा समुत्तीर्य ये अध्येतारः चतुर्वर्षीय बी.ए.बी.एड (संस्कृत)कार्यक्रमं प्रविशन्ति तान् दीक्षारम्भकार्यक्रमः महदुपकरोति।

कार्यक्रमोऽयं परिसरीयवातावरणेन विश्वविद्यालयीय संस्कृत्या-आनुकूल्यं सम्पादयितुं, सहाध्यायिभिः विद्यशाखीयप्रशिक्षकैः सह परस्परं सामञ्जस्यं स्थापयितुं, वातावरणं चावगन्तुं नूनम् अभिप्रेरकः भविष्यति।

दीक्षां विना संस्कृतानभिज्ञाः, संस्कृतभाषाश्रवणेन वञ्चिताः, संस्कृतसम्भाषणेनानभ्यस्ताश्च ये उच्चारण-लेखनादिकाः क्रियाः कुर्वन्ति, तेषां न भाषात्वसिद्धिः न च अभिव्यञ्जनशक्तिः। तस्मात् गुरुभिः प्रशिक्षकैः नवागन्तुकाः दीक्षिताः भुवेयुरिति सुचिन्तितः कार्यक्रमः 'दीक्षारम्भकार्यक्रमः । दीक्षा नाम नियमाचरणम्। केन्द्रीयसंस्कृतविश्वविद्यालयस्य ये नियमाः ये स्वप्नाः, याः योजनाः तेषां, तासां च परिचयमवाप्य तदर्थं प्रवर्तनाय सङ्कल्पितः द्विसाप्ताहिकः दीक्षारम्भकार्यक्रमोऽयं प्रथम सत्रार्द्धस्य प्रारम्भ एव आवासीयः आयोज्यते।

सप्ताहद्वयव्यापिनः कार्यक्रमस्यास्य चतुर्वर्षीय एकीकृतशिक्षकशिक्षा (B.A.B.Ed.) कार्यक्रमस्य स्वरूपावबोधनम्, शास्त्री-शिक्षाशास्त्री कक्षयोः एकीकृतसंस्कृतपाठ्यक्रमस्य संरचनायाः स्फुटीकरणम्, माध्यमिकस्तरस्य (Secondary Level) (नवमीकक्षातः द्वादशकक्षां यावत्) शिक्षकाः यूयं भविष्यथ इति लक्ष्योपस्थापनं चेति उद्देश्यानि पूरयितुमायोज्यते दीक्षारम्भकार्यक्रमोऽयम्।

दीक्षारम्भकार्यक्रमस्य परिणामाः

- संस्कृतभाषायाः श्रवणेन-अभ्यस्ताः भविष्यन्ति।
- संस्कृतभाषया सम्भाषितुमभिप्रेरिताः भविष्यन्ति।
- सामूहिकक्रीडा-व्यायामादि गतिविधीनां माध्यमेन सामूहिकभावनया सह सामञ्जस्यस्थापनं कथमिति बोधिष्यन्ति।
- विभिन्नैः प्रेरकव्याख्यानैः सांस्कृतिक-कलात्मकगतिविधिषु सक्रियतामनुभविष्यन्ति।
- विश्वविद्यालयस्य परिसरस्य च समग्रपरिचयेन विविधविद्यास्थानानां, विद्याशाखानां, योजनानां परिचयेन च स्पष्टमतयो भविष्यन्ति।
- राष्ट्रियशिक्षानीतेः (2020) विद्यालयीयसंरचनायां (5+3+3+4) एनसीटीई संस्थायाः ITEP कार्यक्रमं ससन्दर्भं सुष्टु ज्ञास्यन्ति।
- चतुर्वर्षीय-एकीकृतकार्यक्रमस्य अष्टानां सत्रार्द्धानाम् अध्ययनविषयाणां परिचयं लप्स्यन्ते।

- अध्ययनक्षेत्रेषु गहनसङ्गतेः आवश्यकताम् अवगमिष्यन्ति।
- प्रत्येकम् अध्ययनविषयस्य निर्धारितां श्रेयोऽङ्कव्यवस्थां बोधिष्यन्ति।

प्रवचनप्रक्रिया (Mode of Transaction)

अभिनय-वस्तु/चित्रप्रदर्शन-प्रश्नोत्तर-क्रीडा-प्रेरकव्याख्यानादिभिः विधिप्रविधिभिः द्विसाप्ताहिकोऽयं दीक्षारम्भकार्यक्रमः नवागन्तुकच्छात्रेषु संस्कृतज्ञानसंस्कारं जनयेत्।

सम्भाषणशिक्षणम्

दशसु दिनेषु समयसारिण्यां प्रतिदिनं घण्टाद्वयं प्रकल्पनीयम्। दशदिनेभ्यः परं 'भाषणकेन्द्रितस्पर्धाः' दिनत्रयं (प्रतिदिनं द्वौ कालांशो) आयोजनीयाः।

- कथाकथनस्पर्धा। एकश्वासेन सम्भाषणस्पर्धा।
- समकालिक-आंग्लपदानां संस्कृतरूपकथनस्पर्धा (सूची प्रदास्यते)
- शब्दानां लिङ्गकथनस्पर्धा, सङ्ख्यावाचकशब्दानाम् आरोहावरोहक्रमेण कथनस्पर्धा।

व्यक्तित्वविकासाय विशिष्टव्याख्यानपञ्चकम्

- 'अद्भुतं संस्कृतम्' इति शीर्षकमवलम्ब्य सरलसंस्कृतेन संस्कृतभाषायाः वैशिष्ट्योपस्थापनम्।
- डिजिटलदुनिया, संस्कृतविकिपीडिया वैद्युतीयसामग्री - एतत्सन्दर्भे व्याख्यानम्।
- ललितकलानां (प्रदर्शनकलाः, दृश्यकलाः, लोककलाः) सन्दर्भे आकर्षकं ज्ञानदायकं व्याख्यानम्।
- स्वच्छताभियानम् (गृहं-कक्षा-परिसरः-समाजः) अधिकृत्य प्रेरकं व्याख्यानम्।
- संस्कृतगीतानां गानाभ्यासः, बौद्धिक शारीरिक भाषाक्रीडानामभ्यासः ।

सर्जनात्मकरचनाप्रशिक्षणम्

- द्विपदात्मक-त्रिपदात्मक-सविशेषण-संमिश्र वाक्यरचनाभ्यासाय कालांशाः आयोजनीयाः।
- चित्रं दृष्ट्वा रचनाकार्यम्
- संवादं श्रुत्वा सारलेखनम्
- शीर्षकमवलम्ब्य अनुच्छेदलेखनम्

वेगपठनकौशलम्

- शास्त्रग्रन्थपङ्क्तीनां पठनाभ्यासः

- अपठित गद्य-पद्य-कथानां वेगपठनाभ्यसः.

भित्तिपत्राणां वैज्ञानिकपत्रपत्रिकाणां प्रदर्शिनी

- परिसरशिक्षकैः सह परिचयः।
- पुस्तकालये उपलब्धग्रन्थानां अवलोकनम्।
- क्रीड़ाक्षेत्रस्य अवलोकनपूर्वकमवगनम्।
- अनौपचारिककालांशस्य आयोजनम्, तत्र सर्वेषां प्रशिक्षणार्थिनां सहभागिता।

आकलनप्रक्रिया Mode of Assessment –

- दीक्षारम्भकार्यक्रमे प्रत्येकम् अध्येतुः अवगमनस्तरस्य - अधिगमस्तरस्य चाकलनम्।
- संस्कृतभाषाश्रवणकौशलपरीक्षणम्।
- संस्कृतेन सम्भाषणप्रवृत्तिपरीक्षणम्।
- व्यवहारगतपरिवर्तनस्य (सप्ताहद्वये) आकलनम्।
- नियमितता – अधिगमसामर्थ्यपरीक्षणम्।
- परिचयकथनस्पर्धाया आयोजनम्।
- अनौपचारिकविषयसम्बद्धा प्रश्नोत्तरी।

दीक्षारम्भकार्यक्रमे छात्राध्यापकप्रवेशशुल्कादेव व्ययः करणीयः।

- सम्भाषणशिक्षणाय स्थानीयसंस्कृतभारत्याः कार्यकर्त्रोः द्वयोः दशदिनानां कृते नियोजनं करणीयम्।
- विशिष्टव्याख्यानानां कृते योग्यानां वक्तृत्वकलाविदां, सरलंसंस्कृतभाषया विषयोपस्थापकानाम् आमन्त्रणं करणीयम्।
- भोजन-आवासप्रबन्धनं सुनियोजितरूपेण करणीयम्।
- संस्कृतमयवातावरणं शि.शा. विद्याशाखीयैः ITEP प्रशिक्षकैः निष्ठया रचनीयम्।
- अनुशासनाय सर्वैरपि श्रद्धया यतनीयम्।
- सप्ताहद्वयस्य समयसारिणी निर्मेया। एतद्विषये प्रशिक्षकाणाम् अभिमुखीकरणकार्यक्रमे चर्चा करिष्यते।

शिक्षायाः आधाराः

2.1 भारतीयशिक्षायाः विकासः

सत्रार्द्धः–1 **श्रेयोऽङ्काः– 4**

पाठ्यपरिचयः (About the course)

शिक्षायाः बृहत्काये उपक्रमे छात्राध्यापकाः भारतीयशिक्षायाः समुद्भवं विकासं च अवगन्तुं प्रवृत्ताः भवेयुः। ते भारतीयशिक्षायाः परिप्रेक्ष्ये शिक्षाकेन्द्ररूपेण गुरुकुलानां मठमन्दिरादिषु विद्यमानानां पाठशालानां च वैशिष्ट्यं जानीयुः। बौद्ध-जैन-मठेषु, विहारेषु चैत्यशालासु च विद्यमानानां शिक्षाकेन्द्राणां वैशिष्ट्यं जानीयुः। ते मध्ययुगे प्रचलितानां मकतब्-मदरसा-प्रभृतीनां शिक्षाकेन्द्राणां वैशिष्ट्यं जानीयुः। ते आङ्ग्लयुगे प्रचलितानां शिक्षाकेन्द्राणां वैशिष्ट्यम् अवगच्छेयुः। ते एतेषां सर्वेषां शिक्षाकेन्द्राणां विशिष्टतत्त्वानां वर्तमानशिक्षाकेन्द्रेषु सन्निवेशस्य उपक्रमं जानीयुः। ते शैक्षिकस्तरस्य उन्नयनाय प्रवर्तेरन्। अपि च छात्राध्यापकाः भारतीयशिक्षायाः परिष्कारे स्वामिदयानन्दस्य, स्वामिविवेकानन्दस्य, महर्षि-अरविन्दस्य, रवीन्द्रनाथठाकुरस्य, महात्मगान्धिनः, महामना-मालवीयस्य, दीनदयाल-उपाध्यायस्य, चेत्येतेषां भारतीयशिक्षाशास्त्रिणाम् अवदानेन सुपरिचिताः भवेयुः इति।

अधिगमपरिणामाः(Learning Outcomes) एतस्य पाठ्यक्रमस्यसमाप्तेः अनन्तरं छात्राध्यापकाः अधोलिखितानां ज्ञाने समर्थाः भविष्यन्ति। यथा हि –

- प्राक्कालात् साम्प्रतं यावत् भारतीयशिक्षायाः स्वरूपं परिशील्य तस्याः कार्यान्वयने शक्ताः भविष्यन्ति।
- भारतीयशिक्षाकेन्द्रेषु प्रचलितैः शिक्षणविधिभिः सुपरिचिताः भविष्यन्ति।
- प्राचीनानां भारतीयशिक्षाकेन्द्राणां प्रबन्धनं वित्तव्यवस्थां च ज्ञास्यन्ति।
- शिक्षायां भारतीयशिक्षाशास्त्रिणाम् अवदानेन परिचिताः भविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	भारतीयशिक्षायाः विकासः	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) - 1

वैदिकशिक्षा

1. वैदिकशिक्षायाः सम्प्रत्ययः, उद्देश्यानि, वैशिष्ट्यानि पाठ्यचर्या शिक्षणविधयश्च।
2. प्रसिद्धगुरुकुलैः सह परिचयः, प्रसिद्धाः गुरुशिष्याः च।

3. वैदिककालिका शिक्षण-अधिगम-प्रक्रिया।
4. रामायणकालिका महाभारतकालिका च शिक्षा।

पाठ्यांशः(Unit) 2
जैन-बौद्ध-शिक्षा

1. जैन-बौद्ध-शिक्षायाः सम्प्रत्ययः, उद्देश्यानि, वैशिष्ट्यानि पाठ्यचर्या, शिक्षणविधयश्च।
2. प्रसिद्धाः गुरुशिष्याः।
3. शिक्षण-अधिगम-प्रक्रिया।
4. शिक्षाकेन्द्राणि – तक्षशिला, नालन्दा, वल्लभी विक्रमशिला चेति।
5. तदानीन्तनीयानां शैक्षिकसंस्थानां प्रबन्धनं वित्तव्यवस्था च।

पाठ्यांशः(Unit) 3
गुप्तोत्तरकालिका शिक्षा

1. गुप्तोत्तरकालस्य शैक्षणिकं दृष्टिकोणम्, उद्देश्यानि, संक्षिप्त-ऐतिहासिकविकासस्य परिप्रेक्ष्यम्।
2. तदानीं शिक्षणस्य अधिगमस्य च प्रक्रिया।
3. तदानीन्तनीयानां शैक्षणिकसंस्थानां प्रबन्धनं वित्तव्यवस्था च ।

पाठ्यांशः(Unit) - 4
आधुनिकभारतीया शिक्षा

1. वुडघोषणापत्रम् (वुड्स डिस्पैच) 1854, भारतीयशिक्षायोगः1882, मैकाले-विवरण-पत्रम्।
2. शिक्षायाः भारतीयकरणाय स्वामिदयानन्दः, स्वामिविवेकानन्दः, डा.भीमराव-अम्बेडकरः,महर्षि-अरविन्दः, रवीन्द्रनाथठाकुरः, महात्मागान्धी, महामना-मालवीयः, जे. कृष्णमूर्तिः, दीनदयाल-उपाध्यायः चेत्यादीनां भारतीयशिक्षाशास्त्रिणाम् अवदानम्।
3. स्वतन्त्रभारते शिक्षा - संवैधानिकमूल्यानां शैक्षिकप्रावधानानाञ्च अवलोकनम्।
4. RTE – 2009 (शिक्षा-अधिकार-अधिनियमः,2009)
5. स्वतन्त्रभारते शिक्षायाः आयोगानां शिक्षानीतीनां च परिज्ञानम्।

प्रायोगिकम् (Practicum)

1. वैदिककाले विद्यमानायाः शिक्षायाः साम्प्रतिके काले तस्य आदर्शरूपम् अधिकृत्य कक्ष्यायां परिचर्चायाः आयोजनम्।

अथवा

भारतीयशास्त्रानुगुणं गुरुशिष्यसम्बन्धस्य विमर्शनं विधाय वैदिककाले, प्रसिद्धान् शिष्यान् आधारीकृत्य आदर्शस्य छात्रस्य स्वरूपनिर्माणम्।

2. जैनग्रन्थेषु विद्यमान-तत्त्वानां साम्प्रतिके काले अनुप्रयोगस्य प्रस्तावविश्लेषणम् ।

अथवा

बौद्धग्रन्थेषु निरूपितानां शिक्षणविधीनां गुणानां साम्प्रतिके काले अनुप्रयोगस्य विमर्शनाय परिचर्चायाः आयोजनम्।

3. RTE – 2009 इत्यस्य मूल्याङ्कनं विधाय NEP – 2020 दृशा तस्य कार्यान्वयनाय आहवनानि समाधानञ्च समागतानां काठिन्यानां विमर्शनम्।

अथवा

स्थानीयस्तरे मध्यस्तरीयशिक्षाक्षेत्रे विद्यमानानां शैक्षिकसमस्यानां विषये परिचयात्मकं विमर्शनम्।

4. भारतीयशिक्षादृशा आदर्शशिक्षाकेन्द्रस्य स्वरूपनिर्धारणम्।

अथवा

राष्ट्रीयशिक्षानीतेः (2020 इत्यस्य) शिक्षायाः प्रस्तावानां विमर्शनम्।

प्रवचनप्रक्रिया (Mode of Transaction)- पाठ्यक्रमसामग्र्याः प्रवचनप्रक्रियायां विविधाः पाठ्यांशाः समाविष्टाः भविष्यन्ति। यथा हि–

- बहुमाध्यमयुक्तं शक्तिबिन्दुप्रदर्शनप्रभृति (पॉवर पाइंट प्रजेण्टेशन) प्रस्तुतियुतं योजनाबद्धं व्याख्यानम्।
- लघुसमूहेषु परिचर्चा, सामूहिकी परिचर्चा, समूहानां पारस्परिकी चर्चा, लघुविषयेषु केन्द्रिता सङ्गोष्ठी, सहयोगात्मकं शिक्षणम्, दलशिक्षणम्, पाठ्यांशात् चितस्य अंशस्य पठनम्, वृत्ताध्ययनम्, शैक्षिकस्य प्रदत्तांशस्य साङ्ख्यिकीयं विश्लेषणम्, शैक्षणिकरूपेण वञ्चितसमुदायानां समूहानां च लक्षित-समूहविषये चर्चामाध्यमेन वैयक्तिकरूपेण क्षेत्रपर्यटनेन वा अध्ययनम्, सर्वेक्षणम्, अल्पकालिकं परियोजनाकार्यं च स्थानीयस्तरे शैक्षिकविकासाय परिचर्चा।
- विविधैः बालसमूहैः, समुदायैः, विद्यालयैः च सह व्यावहारिकानुभवानां प्रदर्शनम्।

आकलनप्रक्रिया (Mode of Assessment) - परीक्षणाधारितं सत्रीयकार्याधारितं च आकलनं भविष्यति।

सन्दर्भ ग्रन्थाः (Reference Book)

- मिश्रः, लोकमान्यः, भारतीया पुरातनी शिक्षा, मृगाक्षी प्रकाशनम्, 5/113, विराम खण्ड, गोमतीनगर, लखनऊ- 226010- 2013
- शैन, के. के., भारतीयमाध्यमिकशिक्षा, मान्यता प्रकाशन, दिल्ली - 2016
- शैन, के. के., भारतीयशैक्षिकसमस्याः, मान्यता प्रकाशन, दिल्ली - 2016

- पात्रः, वृन्दावनः, भारते शिक्षाप्रणाल्याः विकासः, दिव्या प्रकाशन, भुवनेश्वर - 2013
- झाः, सुरेन्द्रः, प्राचीनभारतीयशिक्षापद्धतिः, 2/212, विराट खण्ड, गोमती नगर, लखनऊ-2002
- अल्तेकर, अनन्त सदाशिव, प्राचीन भारत में शिक्षा, ज्ञान पब्लिशिंग हाउस, दिल्ली - 2009
- पाठक, पी. डी., भारतीय शिक्षा और उसकी समस्याएँ, विनोद पुस्तक मन्दिर, आगरा
- रस्तोगी के.जी. भारतीय शिक्षा का इतिहास एवं समस्याएँ, विनोद पुस्तक मन्दिर, आगरा
- अग्निहोत्री, रवीन्द्रः, आधुनिक भारतीय शिक्षा : समस्याएँ और समाधान, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर - 2008
- कछवाहः, अशोककुमार, समसामयिक भारत में शिक्षा, संदर्भ प्रकाशन, भोपाल - 2019
- पाठक, दाताराम, अतीत एवं वर्तमान में शैक्षिक प्रणाली, मान्यता प्रकाशन, दिल्ली।
- यशपाल; शिक्षा बिना बोझ के,भारत सरकार (1992)।
- भारत सरकार ;भारत का संविधान।
- सलूजा चान्दकिरण,शिक्षा :भारतीय परिप्रेक्ष्य ,संस्कृतसंवर्धनप्रतिष्ठान ,दिल्ली-110006 ।
- राममूर्ति,आचार्य; सजग मानवीय समाज की ओर, भारत सरकार (1990)।
- Govt. of India (1986), National Policy of Education MHRD, New Delhi
- Govt. of India (1952-53) : Report of the Secondary Education Commission.
- Govt. of India (1964-66), Education Commission.
- Govt. of India (2009) : Right to Education, Ministry of Law and Justice.
- Anand, C.L. (1983) : Teacher and Education in Emerging Indian Society, NCERT, New Delhi.
- National Policy of Education, 2020 Govt of India.
- Mookerjee, Radha kumud; Ancient India, Motilal Banarsidas, Delhi.

2.2 बालविकासः शैक्षिकमनोविज्ञानं च

सत्रार्द्धः- 3 **श्रेयोऽङ्काः- 4**

पाठ्यपरिचयः (About the course)

छात्राध्यापकाः बालविकासस्य तिसृणां (जैविकीय-संज्ञानात्मकसामाजिकभावनात्मकप्रक्रियाणाम्) महत्त्वपूर्णप्रक्रियाणाम् अवबोधने समर्थाः स्युः। एतदर्थम् एषः पाठ्यविषयः महत्त्वपूर्णः अस्ति। एताः तिस्रः प्रक्रियाः परस्परं जटिलतया सम्बद्धाः सन्ति। प्रत्येकं प्रक्रिया मनःशरीरयोः सम्बन्धस्वरूपस्य बालस्य विकासे स्वीयां भूमिकां निर्वहति। एषः पाठ्यविषयः निम्नावस्थासु विकासस्य वैशिष्ट्यानि बोधयति-

- गर्भावस्थायाम् – जन्मपर्यन्तम्
- शैशवावस्थायाम् - जन्मतः 24 मासान् यावत्
- पूर्वबाल्यावस्थायाम् - 3 तः 6/7 वर्षाणि यावत्
- मध्योत्तरबाल्यावस्थायाम् – 6-7 तः 10-11 वर्षाणि यावत्
- किशोरावस्थायाम् - 12 तः पूर्वयौवनावस्थां यावत्

अयं विषयः विकासस्य विविधपक्षान् प्रस्तौति। यथा हि - शारीरिकविकासः, संज्ञानात्मकविकासः, भाषिकविकासः, सामाजिक-भावनात्मकविकासः, सौन्दर्यात्मकविकासः नैतिकाध्यात्मिकविकासश्च। विकासस्य एते पक्षाः उपर्युक्तासु सर्वासु अवस्थासु विषयेऽस्मिन् वर्णिताः।

अयं विषयः छात्राध्यापकान् अधिगमाय शिक्षणशास्त्रीयोपयोगाय च अधिगमस्य विविधसिद्धान्तान् अभिप्रेरणात्मकस्थितिञ्च सूचयति। जनाः कथम् अधिगच्छन्ति? छात्राधिगमे परिष्काराय आवश्यकाः शिक्षणशास्त्रीयाः उपागमाः के? निर्दिष्टाधिगमपरिणामप्राप्तौ अधिगन्तॄणां सामर्थ्यावाप्तये शिक्षणाधिगमयोः प्रक्रियाः काः? अधिगमे वैयक्तिकभिन्नताः काः? चेत्यादीनाम् अध्ययनम् अत्र सम्मिलितं वर्तते। एतत् पाठ्यं छात्राधिगमसौविध्याय, तत्प्रभावकभावात्मकसामाजिककारकाणां ज्ञानाय व्यवहारवाद-सर्जनवाद-संज्ञानवादसम्बद्धोपागमान् अन्वेष्टुं च छात्राध्यापकेभ्यः अवसरं प्रयच्छति।

अधिगमपरिणामाः (Learning Outcomes) - अस्य पाठ्यक्रमस्य समाप्तेः अनन्तरं छात्राध्यापकाः समर्थाः भविष्यन्ति –

- वृद्धिविकासयोः सम्प्रत्यय–वैशिष्ट्य–प्रभावककारकाणां वर्णने ।
- भारतीयात्मसंकल्पनानां प्रयोगे।
- कक्ष्याव्यवस्थायां विविधसमस्यानां समाधानस्य अधिगमस्य च आव्यूहानां प्रयोगे।
- अधिगमप्रक्रियायाः विविधोपागमानाम् अभिज्ञाने ।
- समूहगत्यात्मकतायाः व्याख्याने समूहाधिगमसौविध्याय आव्यूहप्रयोगे च ।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	बालविकासः शैक्षिकमनोविज्ञानं च	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) -1

बालविकासः

विविधस्तरेषु बालविकासस्य वैशिष्ट्यानि तदाधारिताः संस्काराश्च

1. गर्भावस्था
2. शैशवावस्था
3. पूर्वबाल्यावस्था
4. बाल्यावस्था
5. किशोरावस्था
6. अवस्थानुगुणं भारतीयाः शैक्षिक संस्काराः
7. भारतीयसंकल्पनाः – मनस् बुद्धिः चित्तञ्च

पाठ्यांशः(Unit) -2

विकासप्रक्रिया

व्यक्तित्वविकासस्य विविधावस्थासु प्रकारेषु च प्रभावककारकाणि –

1. पञ्चकोशीयविकासः।
2. मानसिकविकासः।
3. सामाजिकविकासः।
4. संवेगात्मकविकासश्च।
5. त्रिगुणात्मकव्यक्तित्वम् ,व्यक्तित्वस्वरूपम्।

वैयक्तिकभिन्नता:

1. वैयक्तिकभिन्नतायाः स्वरूपम्।
2. विविधक्षमतायुक्ताधिगन्तॄणाम् अभिज्ञानाय उपकरणानि प्रविधयश्च।

पाठ्यांशः(Unit) - 3

अधिगमः ज्ञानार्जनं च

1. अधिगमस्य सङ्कल्पनात्मकं स्पष्टीकरणं सार्थकत्वञ्च
2. उपागमाः – व्यवहारवादि, संज्ञानवादि, रचनावादि, विकासात्मकः सूचनाप्रक्रियाप्रतिमानम्, महर्षिअरविन्दस्य एकीकृतोपागमः
3. ज्ञानार्जनस्य करणानि – अन्तःकरणानि बाह्य करणानि च
4. समस्या समाधानम् अधिगमव्यूहरचनाः च – पृच्छाधारितः समस्याधारितश्च अधिगमः, समस्यासमाधाने सोपानानि आव्यूहः बाधकतत्वानि च
5. कथम् अधिगमः? – सार्थकत्वम् आव्यूहाश्च

पाठ्यांशः(Unit) - 4

A - अभिप्रेरणा

1. अभिप्रेरणायाः स्वरूपम्. सार्थकत्वं च।
2. आन्तरिकी बाह्या च अभिप्रेरणा।
3. अभिप्रेरणायै आव्यूहाः
4. अभिप्रेरणायाः भारतीय सिद्धान्ताः – गीतायां रामायणे च

B – कक्षाप्रबन्धनम्

1. स्वीकारात्मकाधिगमवातावरणनिर्माणम्
2. अधिगमस्थानयोजना
3. व्यावहारिकसमस्याप्रबन्धनम्

C – समूहगत्यात्मकी

1. सामाजिकसमूहत्वेन कक्षा
2. समूहस्य वैशिष्ट्यम्
3. समूहान्तः क्रियाबोधः – समाजमिति
4. समूहाधिगमसौविध्याय आव्यूहाः

प्रायोगिकम् (Practicum)

1. विभिन्नार्थिकस्तरीयबालैः सह दिवसं यापयित्वा तेषां दैनिकजीवनं प्रभावयन्ति शारीरिक-भाषिक-सामाजिक-सांस्कृतिक-धार्मिककारकाणि अवलोक्य प्रतिवेदनलेखनम्।
2. छात्राणाम् अधिगमशैलीम् अवगन्तुम् अवलोकनम्।

   अथवा

   प्रतिभावद्भ्यः छात्रेभ्यः समुन्नतप्रविधिप्रयोगस्य योजनानिर्माणम्।
3. एकं संस्कृतकाव्यमधीत्य तत्र प्रयुक्तरसानाम् आधारेण संवेगानां विश्लेषणं कृत्वा प्रतिवेदनलेखनम्।

   अथवा

व्यक्तिवृत्तप्रतिवेदनम्- विविधाधिगमक्षेत्रेषु छात्राणाम् अधिगमकाठिन्यस्य अभिज्ञानं तत्कारणञ्च।

4. अधिगमकाठिन्ययुक्तसंस्कृतच्छात्राय वैयक्तिकहस्तक्षेपयोजनानिर्माणम्।

अथवा

मनोवैज्ञानिकपरीक्षणानां परिचयः, प्रयोगः प्रतिवेदननिर्माणं च।

प्रवचनप्रक्रिया (Mode of Transaction)- पाठ्यप्रवचनप्रक्रियायाम् अन्तर्भवन्ति

- बहुमाध्यमोपकरणप्रयोगेण व्याख्यानानि।
- लघुसमूहचर्चा, विषयाधारिता लघुसंगोष्ठी, परिसंवादः, समूहचर्चा, दलशिक्षणम्, सहकारी अधिगमः, सिद्धान्तपठनेभ्यः चयनम्, प्रकरणविश्लेषणम्, व्यक्तिवृत्ताध्ययनम् च इत्यादीनि।
- शिक्षावञ्चितसमुदायेन समूहेन वा साकं क्षेत्रानुभवं सम्प्राप्य अवधानसमूहचर्चया, सर्वेक्षणेन, अल्पकालिकपरियोजनाभिः च प्राप्तशैक्षिकसाङ्ख्यिक्याः विश्लेषणम्।
- भारतीयज्ञानपरम्पराध्ययनेन प्राप्तमनोवैज्ञानिकतत्त्वानां नवीनसन्दर्भेषु विश्लेषणम्।
- विविधसमुदायैः, छात्रैः विद्यालयैः च साकं संलग्नाः भूत्वा अनुभवाधारप्रकल्पनम्।
- प्रयोगशालागतिविधयः।

आकलनप्रक्रिया (Mode of Assessment) - आकलनप्रक्रिया परीक्षणाधारिता प्रदत्तकार्याधारिता च भविष्यति।

सन्दर्भ ग्रन्थाः (Reference Book)

- पालः, हंसराजः - प्रगतशिक्षा मनोविज्ञान, हिन्दी माध्यम कार्यालय निदेशालयः, दिल्ली विश्वविद्यालयः, देहली।
- मिश्रः, लोकमान्यः, आधुनिकशिक्षामनोविज्ञानम्, मृगाक्षीप्रकाशनम्, लखनऊ।
- काटदरे, इन्दुमती, भारतीयशिक्षा, पुनरुत्थानविद्यापीठम्, कर्णावती।
- तिवारी, नीलाभः, जैनः नितिनश्च, भारतीयशिक्षामनोविज्ञानम्, राष्ट्रियसंस्कृतसंस्थान्, भोपालपरिसरः।
- गुप्ता, एम. वी., उच्चतरशिक्षामनोविज्ञानम्, शारदापुस्तकभवनम्, प्रयागराजः।
- सिंहः, अरुण कुमार, शिक्षामनोविज्ञान, मोतीलाल बनारसीदास प्रकाशन, दिल्ली।
- जायसवाल, सीतारामः, भारतीयमनोविज्ञान और शिक्षा, आर्य बुक डिपो, दिल्ली।
- पाण्डेय,के.पी.;नवीन शिक्षामनोविज्ञान ।
- प्रो. वी. एस. वेंकट राघवाचार्य, शिक्षामनोविज्ञानम्,तिरुपतिः।
- Berk, L.E., Child Development Pearson perctice Hall, New Dehli.
- Vygotsky, L, Thought and Language The MIT Press, Cambridge.
- Wool Folk A, Educational Psychology pearson Education, New Delhi.

2.3 शिक्षायाः दार्शनिकं समाजशास्त्रीयं च परिप्रेक्ष्यम् - I

(Philosophical and sociological Perspectives of Education)

सत्रार्द्धः- 4 **श्रेयोऽङ्काः-** 4

पाठ्यपरिचयः(About the course)

एतस्य पाठ्यक्रमस्य उद्देश्यं शैक्षिकदर्शनस्य तादृशम् अध्ययनं कर्तुं छात्राध्यापकेषु सामर्थ्योत्पादनमस्ति, यत्र शैक्षिकदर्शनस्य सम्प्रत्ययः, प्रकृतिः क्षेत्रं शैक्षिकदर्शनस्य उद्देश्यानि; शिक्षा दर्शनं च इत्यनयोः मध्ये सम्बन्धः; भारतीयदार्शनिकपरम्पराः तासां शैक्षिकनिहितार्थश्च; केषाञ्चन प्रमुखदार्शनिकसम्प्रदायानां यथा आदर्शवादः, प्रकृतिवादः, प्रयोजनवादः, प्रगतिवादः अस्तित्ववादः च इत्येतेषां विमर्शः शैक्षिकपरम्पराणां निहितार्थाश्च। अयं पाठ्यक्रमः दर्शनशास्त्रस्य पाश्चात्त्यसम्प्रदायानां तदीयोपागमानां च विश्लेषणाय अपि अवसरं प्रददाति।

अधिगमपरिणामाः (Learning Outcomes)

- सोद्देश्यं ज्ञानस्य प्रकृतिः, मानवस्य प्रकृतिः, समाजस्य प्रकृतिः च इत्येतेषां शैक्षिकनिहितार्थानाम् अन्वेषणम् अवगमनं च कर्तुं छात्राध्यापकाणां प्रोत्साहनम्।
- भाविशिक्षकेभ्यः विद्या, अविद्या, शिक्षा,एजुकेशन प्रभृतीनां शब्दानाम् अर्थज्ञापनम्। ततश्च प्राचीनभारतीयसाहित्यस्य आधारे एतेषां शब्दानां चिन्तनात्मकरूपेण अवगमनपुरस्सरं तेषु वैचारिकभेदं परिज्ञातुं सौविध्यप्रदानम्।
- समवयस्कसमूहे आत्मनः वास्तविकजीवनस्य सामाजिक-सांस्कृतिक-दार्शनिकसम्बद्धं चिन्तनशीलम् अनुभवं प्रकटयितुं भाविशिक्षकेभ्यः सौविध्यं प्रदाय भारतीयशैक्षिकसन्दर्भेषु दार्शनिकपरम्पराः, सामाजिकपरम्पराः सांस्कृतिकपरम्पराः चेत्यादीनां शब्दानाम् अर्थसङ्कल्पनाम् अवगन्तुं सामर्थ्यप्रदानम्।
- भारतस्य विश्वस्य च केषाञ्चन श्रेष्ठानां शिक्षाविदां शैक्षिकदृष्टेः अध्ययनम्, अवलोकनं अधिगमनं च कर्तुं भाविशिक्षकानाम् अभिमुखीकरणं सम्पृक्तीकरणं च। एतद्द्वारा शिक्षाप्रक्रियायां समसामयिकसम्बद्धतायां च तेषां दृष्टेः/लक्ष्यस्य च स्पष्टतया प्रतिबिम्बनं भवेत्।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	शिक्षायाः दार्शनिकं समाजशास्त्रीयं च परिप्रेक्ष्यम् - I	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) 1

शिक्षा दर्शनं च

1. शिक्षायाः सम्प्रत्ययात्मकस्पष्टता,प्रकृतिःशिक्षादर्शनयोः सम्बन्धश्च ।
2. शिक्षायाः दार्शनिकपरिप्रेक्ष्यस्य अध्ययनस्य उद्देश्यानि ।
3. तत्त्वमीमांसा, ज्ञानमीमांसा मूल्यमीमांसा इत्येतेसां शैक्षिकनिहितार्थाः च।
4. भारतीयसन्दर्भेषु शिक्षायाः परिप्रेक्ष्यस्य अवगमनम् -
   - वैदिक-बौद्ध-जैन-सिक्ख-मुस्लिम-परम्पराणां विशेषसन्दर्भे शिक्षायाः अर्थः, प्रकृतिः लक्ष्यं च।
   - दर्शनम्, परा अपरा च विद्ये, अविद्या, शिक्षा, संवादः, पञ्चकोशाः, गुरुकुलम्, आचार्यः, गुरुः, शिष्यः, उपाध्यायः, जिज्ञासा, स्वाध्यायः च इत्येतेषां पदानाम् अवगमनम् ।
   - पाश्चात्त्यपरिप्रेक्ष्ये शिक्षायाः अवगमनम् - सञ्ज्ञानात्मकसिद्धान्तस्य व्यवहारवादिसिद्धान्तस्य विकासात्मकसिद्धान्तस्य च सन्दर्भे शिक्षायाः अर्थः, प्रकृतिः उद्देश्यानि च ।

पाठ्यांशः(Unit) - 2

दार्शनिकसम्प्रदायाः शिक्षा च

1. निम्नलिखितानां वैचारिकसम्प्रदायानां सम्प्रत्ययात्मकस्पष्टतया सह तेषां शैक्षणिकाभ्यासानां निहितार्थः-

- भारतीयाः - सांख्यम्, योगः, न्यायः, वैशेषिकम्, मीमांसा वेदान्तशास्त्रं च ।
- पाश्चात्त्याः - आदर्शवादः, प्रकृतिवादः, प्रयोजनवादः यथार्थवादः, प्रगतिवादः अस्तित्ववादश्च।

पाठ्यांशः(Unit) - 3

शैक्षिकविचारकाः

1. निम्नलिखितानां विचारकाणाम् अध्यवसायिनां च विचारेभ्यः प्रवर्धितेषु शैक्षिकोद्देश्येषु प्रक्रियासु संस्थानेषु च विचारविमर्शः -

- **भारतीयाः** - स्वामी दयानन्दसरस्वती, स्वामी विवेकानन्दः, महर्षि अरविन्दः, रवीन्द्रनाथटैगोरः, मदनमोहनमालवीयः, महात्मागांधी, जे. कृष्णमूर्तिः गीजूभाई बधेका ।
- **पाश्चात्त्याः** - सुकरात, रूसो, प्लेटो, मारिया माण्टेसरी, फ्रेड्रिक फ्रोबेल, जॉन डीवी ।

पाठ्यांशः(Unit) - 4

मूल्यशिक्षा

1. मूल्यानां सम्प्रत्ययः, अर्थः सार्थकता प्रकाराश्च ।
2. मूल्यानां शिक्षाशास्त्रीयः अभिप्रेतार्थः ।
3. गुरुशिष्यपरम्परा शैक्षिकमूल्यानि च ।
4. तैत्तरीयोपनिषदि दीक्षान्तोपदेशः ।
5. भारतीयसंविधाने प्रतिष्ठापितानि मूल्यानि ।

6. राष्ट्रीयशिक्षानीतिः **2020** तथा च अधिगमकर्तुः समग्रविकासे एतस्याः नीतेः प्रभावः ।
7. शिक्षणशास्त्रीयसमस्याः

प्रायोगिकम् (Practicum)

1. शिक्षायाः दार्शनिकपरिप्रेक्ष्याध्ययनस्य आवश्कतायाः विश्लेषणात्मकाः लेखाः।

   अथवा

   कामपि एकां भारतीय शैक्षिक परम्पराम् अनुसृत्य तस्य अर्थ-उद्देश्य-प्रवृत्ती-लक्ष्याणाञ्च विश्लेषणात्मकमध्ययनम्।

2. प्राचीनभारतीयशैक्षिकसम्प्रदायानां समसामयिकप्रासङ्गिकतालेखनम्।

   अथवा

   पाश्चात्य शैक्षिकसम्प्रदायानां भारतीयसन्दर्भे समालोचनात्मकसमीक्षा।
3. प्रसिद्धभारतीयशिक्षाविदां शैक्षिकवादानां तद्द्वारा स्थापितसंस्थानां चर्चा एवं सामूहिकप्रतिवेदनलेखनम्।

   अथवा

   पाश्चात्याशिक्षाविदां शैक्षिकवादानां भारतीयपरिप्रेक्ष्ये समालोचनात्मकसमीक्षा।
4. मूल्यस्य अर्थ-आवश्यकता-प्रकार-विषयकानुसन्धानात्मकालेखलेखनम्।

   अथवा

   भारतीयप्राचीनगुरुशिष्यपरम्परायाः दीक्षान्तोपदेशस्य च समसामयिकावश्यकतामभिलक्ष्य आलेखलेखनम्।

प्रवचनप्रक्रिया (Mode of Transaction)

पाठ्यक्रमसामग्र्याः प्रवचनप्रक्रियायाम् अधोलिखितपाठ्यांशाः सम्मिलिताः भविष्यन्ति -

- बहुमाध्यमयुक्तं सुनियोजितं व्याख्यानम्।
- लघुसमूहचर्चा, सामूहिकी अन्तःचर्चा, समूहाणां पारस्परिकचर्चा, लघुविषयकेन्द्रिता सङ्गोष्ठी, सहयोगात्मकशिक्षणं दलशिक्षणं च, श्रेष्ठशिक्षाविदां जीवनसम्बद्धपक्षाणाम् आधारे रचितसाहित्यस्य प्राथमिकस्रोतसां (मूलग्रन्थानाम्) द्वितीयकस्रोतसाम् (सन्दर्भग्रन्थानाम्) अध्ययनसंलग्नता, व्यक्तिवृत्ताध्ययनम्, अल्पकालिकपरियोजनाकार्यम्।
- छात्राध्यापकानां जगत् जीवनं च प्रति दृष्टिविकासाय तेषाम् अनुभवानां समालोचनात्मकं परीक्षणं कृत्वा तत् नवीकर्तुं दार्शनिकदृष्टिकोणस्य विश्लेषणं करणीयम्। छात्राध्यापकाः दृष्टिः, उद्देश्यानि, शैक्षिकप्रक्रिया, शिक्षासंस्थानं चेत्यादीनां तुलनात्मकं प्रपत्रं निर्मास्यन्ति। ते पठनाधारितं विचारविमर्शं कर्तुम्, चिन्तनपुरस्सरं शिक्षकप्रक्रियां समीक्षितुम्, प्रवेशविधानस्य/शिक्षारम्भस्य दीक्षान्तप्रक्रियायाः च सार्थकतां परिचेतुं प्रोत्साहिताः भविष्यन्ति।

आकलनप्रक्रिया (Mode of Assessment) - मूल्याङ्कनं परीक्षणाधारितं सत्रीयकार्याधारितं च भविष्यति।

सन्दर्भग्रन्थाः (Reference Book)

- अग्रवाल, जे.सी. **:** शिक्षा दर्शन एक अध्ययन, दिल्ली, क्षिप्रा प्रकाशन।
- ओड़, लक्ष्मीलाल **:** शिक्षा की दार्शनिक पृष्ठभूमि, जयपुर, राजस्थान हिन्दी-ग्रन्थ अकादमी।
- कछवाहा, विजयपाल **:** भारतीयाः शिक्षाशास्त्रिणः, भोपालम्, रचना प्रकाशन।
- कछवाहा, विजयपाल **:** शिक्षादर्शनम्, भोपालम, शिक्षादर्शनम्।
- गैरोला, वाचस्पति (1995) **:** भारतीय दर्शन, इलाहाबाद, लोकभारती प्रकाशन।
- चाँद किरण **:** शिक्षा दार्शनिक परिप्रेक्ष्य, दिल्ली, दिल्ली विश्वविद्यालय कार्यान्वयन निदेशालय।
- झा, नगेन्द्र **:** वैदिक शिक्षा पद्धति एवं आधुनिक शिक्षा पद्धति, नई दिल्ली, वेङ्कटेश प्रकाशन।
- द्विवेदी, देवीप्रसाद **:** प्राच्यशिक्षादर्शनम्, लखनऊ, गोमतीनगरम्।
- पाठक, आर.पी. (2012) **:** विश्व के महान् शिक्षाशास्त्री, नई दिल्ली, पियर्सन एज्यूकेशन।
- पाठक, आर.पी. (2011) **:** शिक्षा के दार्शनिक एवं समाजशास्त्रीय सिद्धान्त, नई दिल्ली, पियर्सन एज्यूकेशन।
- पाठक एवं त्यागी **:** शिक्षा के दार्शनिक सिद्धान्त, आगरा, विनोद पुस्तक मन्दिर।
- पाठक, दाताराम **:** शैक्षिकदर्शन एवं समाजशास्त्र भाग-1, नई दिल्ली, मान्यता प्रकाशनम्।
- पाणिग्राही, निर्मला **:** शिक्षायाः नवीनाधाराः, भुवनेश्वरम्, दिव्यप्रकाशनम्।
- पात्रः वृन्दावन **:** धार्मिकस्रोतस्सु शिक्षादर्शनम्, भुवनेश्वरम्, दिव्यप्रकाशनम्।
- पाण्डेय, के.पी. **:** शिक्षा के दार्शनिक एवं सामाजिक आधार, वाराणसी, विश्वविद्यालय प्रकाशनम्।
- पाण्डेय, रामशकल **:** शिक्षा की दार्शनिक एवं समाजशास्त्रीय पृष्ठभूमि, आगरा, विनोद पुस्तक मन्दिर।
- बालाजी, रामचन्द्रुल **:** दार्शनिक विचारधाराः, वेरावल, श्री सोमानाथसंस्कृतविश्वविद्यालय।
- मिश्रः, भास्करः, वैदिक शिक्षा मीमांसा, दिल्ली, ईस्टर्न बुक लिंकर्स।
- मिश्रः, रमाकान्तः, भारतीयशिक्षादर्शनम्, नई दिल्ली, चौखम्भा पब्लिकेशन।
- मिश्रः रमाकान्तः, शिक्षायां दार्शनिकवादाः, नई दिल्ली, चौखम्भा पब्लिकेशन।
- मिश्रः, लोकमान्यः, भारतीयाः शिक्षाशास्त्रिणः, लखनऊ, गोमतीनगरम्।
- शर्मा, आर.ए. (1995) **:** तत्वमीमांसा, मूलमीमांसा एवं शिक्षा, मेरठ, अमरलाल बुक डिपो।
- शर्मा, कुलदीपः, भारतीयं शिक्षादर्शनम्, जयपुरम्, जगदीशसंस्कृतपुस्तकालयम्।
- साहू, सोमनाथः, शिक्षायाः दार्शनिकाधाराः, जयपुरम्, जगदीशसंस्कृतपुस्तकालयम्।
- सिकरवारः, प्रेमसिंहः शिक्षायाः दार्शनिकसामाजिकाधाराः, जयपुरम्, एम.बी. पब्लिशर्स एण्ड डिस्ट्रीब्यूटर्स।
- Altekar, A.S. : Education in Ancient India, Banaras, Nand Kishor & Sons.
- Brubeker, J.S. (1969) : Modern Philosophy of Education, New Delhi, Macgrow Hill Publishing.
- Report of New Education Policy, 2020, New Delhi, Ministry of Education, Govt. of India.

2.4 आकलनं मूल्याङ्कनञ्च

सत्रार्द्धः – 6 **श्रेयोऽङ्काः – 2**

पाठ्यपरिचयः (About the course)–

आकलनमूल्याङ्कनपत्रस्य प्रमुखं लक्ष्यमस्ति छात्राध्यापकाः ज्ञानेन स्वीयावश्यकक्षमतायां विकासेन आकलने मूल्याङ्कने च स्वीया दृष्टिः, तस्य च क्रियान्वयनं सामान्यतया रचनात्मकदृष्ट्या अधिकक्षमताऽऽधारितरीत्या, अधिगमस्य विविधपक्षाणाम् आकलनं कर्तुं शक्नुवन्ति। उचित-विषयाधारिताधिगमनेन साकम् अधिगमपरिणामरूपेण समस्यासमाधाने, सक्रियचिन्तने, रचनात्मकचिन्तने, सम्प्रेषणकौशलानाम्, निर्णयस्वीकरणे, नैतिकधार्मिकदृष्ट्या च सक्षमाः भवन्ति।

अधिगमपरिणामाः (Learning Outcomes)

अस्य पाठ्यक्रमस्य पूर्त्यनन्तरं छात्राध्यापकाः विभिन्नया दृष्ट्या समयानुगुणपरीक्षणेन छात्राध्यापकानां प्रदर्शनम् आकलनं मूल्याङ्कनं च कर्तुं सक्षमाः भवेयुः। यथा बहि/मुक्तपुस्तक-परीक्षाः, समस्याधारित-प्रदत्तकार्याणि, प्रायोगिककार्याणि, प्रतिवेदनानि, व्यावहारिककौशलानां निरीक्षणम्, व्यक्तिगतं तथा च सामूहिकं प्रतिवेदनम्, मौखिकरूपेणप्रस्तुतीकरणम्, वाक्परीक्षा, साक्षात्कारः, संगणकाधारितपरीक्षणम्, सहपाठीनां स्वीयाकलनम् इत्यादयः।

- छात्राः औपचारिकं तथा च अनौपचारिकं, निदानात्मकं, रचनात्मकं तथा च योगात्मकाकलनम्, व्यूहरचनां करिष्यन्ति। तेन अध्यापकाः सततरूपेण पुनः पुनः शिक्षणाधिगमप्रक्रियां छात्राध्यापकप्रयोजनाय विकासाय च करिष्यन्ति।
- छात्राः प्रभावपूर्णरीत्या उचितेन पृष्टपोषणेन छात्राणां प्रदर्शनानाम् आधारेण अपेक्षितान् अधिगमपरिणामान् अधिगमे जायमानानां रिक्तस्थानानां पूर्त्यर्थम् अधिगमविकासाय आवश्यकोपक्रमेण परिचिताः भविष्यन्ति।
- छात्राः छात्रोपलब्धिविषये तात्त्विकस्य एवञ्च विश्वसनीयस्य प्रतिवेदनस्य प्रस्तुतिं कर्तुं शक्ताः भविष्यन्ति।
- विद्यालयाधारितानां दत्तकार्याणाम् सम्पूर्णरूपेण (360^0) बहु-आयामी-आधारेण छात्राणां प्रगतिपत्रस्य विकासस्य, छात्राणां प्रगतेः प्रदर्शनानाम् आकलनं स्वीयाकलनेन (Self-Assessment), प्रायोजनाधारितेन, पृच्छाधिगमेन, प्रश्नोत्तरेण, भूमिकानिर्वहने, सामूहिककार्येण, विचारणीयस्वाख्यानानाम् द्वारा तथा च अध्यापकाः स्वीय उचितसूचनानां द्वारा छात्राणां शक्तेः अभिरुचियुक्तक्षेत्राणाम्, आवश्यकतानां छात्राणां वृद्धिरपेक्षितक्षेत्राणाञ्च संसूचनम्।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	आकलनं मूल्याङ्कनञ्च	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) – 1

आकलनं शिक्षा च

आकलनं मूल्याङ्कनञ्च

1. शिक्षाक्षेत्रे आकलनस्य तथा च मूल्याङ्कनस्य स्वरूपम्, आवश्यकता, उद्देश्यानि महत्त्वञ्च।
2. शिक्षायां मापनस्य आकलनस्य, परिक्षायाः मूल्याकलनस्य (Appraisal) मूल्याङ्कनस्य च सम्प्रत्ययः उद्देश्यानि च।
3. आन्तरिकं तथा च बाह्यम् आकलनम्।
4. अधिगमाय, अधिगमार्थम् अधिगमरूपेण अधिगमाकलनम्।
5. प्रामाणिकम् आकलनम्, सद्यस्कम् आकलनम्।
6. अधिगमपरिणामाः (Learning Outcomes) – विविधस्तरे आकलने च
7. आकलनस्य प्रारूपम् – संरचनात्मकम्, योगात्मकम्, पूर्वानुमानात्मकं, निदानात्मकञ्च।
8. विद्यालयेषु आकलनं तथा मूल्याङ्कनस्य संशोधनं (Improving), संक्षिप्ता समीक्षा (1975, 1988, 2000, 2005, 2020)।

पाठ्यांशः(Unit) – 2

आकलनविभाजनम्

A. विभिन्न दृष्टया (दृष्टिकोणेन) समयानुगुणपरीक्षणेन छात्राध्यापकानां प्रदर्शनानुगुणम् आकलनम् एवञ्च मूल्याङ्कनम् – यथा मुक्त-पुस्तकपरीक्षाः, समस्याधारित-प्रदत्तकार्याणि, प्रायोगिकप्रदत्तानां प्रतिवेदनस्य, प्रायोगिककौशलानां निरीक्षणम्, व्यक्तिगत तथा सामूहिक प्रायोजनायाः प्रतिवेदनम् प्रस्तुतिः, मौखिक-प्रस्तुतीकरणम्, वाक्परीक्षा, साक्षात्कारः, संगणकाधारितपरीक्षणम्, सहपाठीनां तथा च स्वीयाकलनम् इत्यादि।

B. उच्चस्तरचिन्तनयोग्यतायाः आकलनम् – समस्यासमाधानम्, आलोचनात्मकं चिन्तनम्, सर्जनात्मकं चिन्तनम्, सम्प्रेषणकौशलम्, न्यायनिर्णयस्वीकरणम्, नीतिशास्त्रीयः आचारशास्त्रीयः तर्कः।

आकलनस्य उपकरणानि युक्तयः च (Technique)

1. अवलोकनम्, निर्धारणमापनी (Rating Scale), वृत्तान्ताभिलेखः (Anecdotes), साक्षात्कारः (Interviews)
2. अभिवृत्तेः अभिरुचेः च आकलनम्।
3. स्वीयाकलनं सब्रह्मचारि आकलनम्।

पाठ्यांशः(Unit) -3

विश्लेषणं व्याख्या च

1. छात्रनिष्पत्तेः प्राप्ताङ्कानाञ्च विश्लेषणम् – श्रेयोऽङ्काः, श्रेणी च
2. आरेखीयप्रस्तुतीकरणम् – (आयतचित्रम्, आवृत्तिवक्रः)

3. विश्लेषणाधारेण अग्रोपयोगाधारेण च छात्राणाम् अधिगमनिष्पत्तेः परिष्काराय छात्रनिष्पत्तेः विवेचनम् – श्रेयोऽङ्काः श्रेणीकरणम् रचनात्मक प्रतिपुष्टिः च
4. छात्रनिष्पत्तेः प्रतिवेदनम् – 360° प्रगतिप्रतिवेदनम्, संचिताविलेखः स्वआख्या, शिक्षक-अभिभावकोपवेशनम्, अवलोकानाधारितं गुणात्मकं प्रतिवेदनम्, प्रतिवेदन पत्रे वर्णनात्मक – सङ्केतकाः

प्रायोगिकम् (Practicum) -

1. विविध -शिक्षा-आयोगानां, नीतीनां, राष्ट्रियपाठ्यक्रमरूपरेखा (2005) मध्ये आकलनं तथा च मूल्याङ्कनसम्बन्धित-अनुशंसानां च सामान्यतया समीक्षणम्।

   अथवा

   निर्दिष्टोपकरणेषु एकस्य निर्माणम्

   निर्धारणमापनी, अनुसूची, अवलोकनम्, परीक्षणानुसूचिः तस्य छात्रसमूहे प्रशासनम् अथवा विद्यालये कक्षापरिस्थिति-मध्ये अवलोकनं विश्लेषणञ्च।
2. NCERT द्वारा निर्मितानां विभिन्नविषयाणाम् अधिगमपरिणामानां समीक्षणम्।
3. NEP-2020 राष्ट्रिय-शिक्षा-नीत्यनुगुणं (2020) आकलन-चर्चा-विषये प्रदत्तानां प्रस्तावानां समीक्षणम्।

प्रवचनप्रक्रिया (Mode of Transaction)

- योजनाबद्धव्याख्यानम्, बहुमाध्यमरूपेण प्रदर्शनम्।
- स्वल्पसमूहचर्चाः, समूहान्तः क्रियाः, विषयाधारितसंगोष्ठी, समूहपरिचर्चा, सहयोगात्मकशिक्षणम् समूहशिक्षणम्, सैद्धान्तिकाध्ययनसामग्र्याः,व्यक्तिवृत्ताध्ययनम् च ।
- लघुसमूहचर्चा,परिसंवादः,लघुविषयाधारिता संगोष्ठी,सहयोगात्मकं शिक्षणम् ,दलशिक्षणम् ,सैद्धान्तिक-अध्ययन-सामग्री,व्यक्तिवृत्ताध्ययनम्,शैक्षिक-सांख्यिकीनां विश्लेषणं,वञ्चितसमूहैः सह परिचर्चा,सर्वेक्षणम्,अल्पकालिक-परियोजनाकार्यम् (वैयक्तिकं सामूहिकं वा) ।

आकलनप्रक्रियाः (Mode of assessment)–

- परीक्षाधारितं प्रदत्तकार्याधारितञ्च आकलनम् ।

सन्दर्भग्रन्थाः (Reference Book)

- Aggarwal, J. C. (2008). Essentials of Examination System: Evaluation, Tests and Measurement. Vikas Publishing House.
- Bloom, B. S., Hastings, J. T., & Madaus, G. F. (1971). Handbook on Formative and Summative Evaluation of Student Learning. McGraw-Hill.
- Ebel, R. L., & Frisbie, D. A. (1991). Essentials of Educational Measurement (5th ed.). Prentice-Hall.

- Gronlund, N. E., & Linn, R. L. (1995). Measurement and Assessment in Teaching (6th ed.). Macmillan Publishing Company.
- Popham, W. J. (2014). Classroom Assessment: What Teachers Need to Know (7th ed.). Pearson.
- Thorndike, R. M., & Thorndike-Christ, T. (2010). Measurement and Evaluation in Psychology and Education (8th ed.). Pearson.
- ओझा, एस. एन. (2015). शैक्षिक मापन, मूल्यांकन एवं सांख्यिकी. अग्रवाल पब्लिकेशन।
- क्वेरी, वी. एस. (2018). शिक्षा में मापन और मूल्यांकन. विनोद पुस्तक मंदिर।
- शर्मा, आर. एल. (2016). शैक्षिक तकनीक एवं मूल्यांकन. आर. लाल बुक डिपो।
- सिंह, एस. के. (2019). अधिगम के लिए आकलन (Assessment for Learning). सूर्या पब्लिकेशन।
- झा, कलानिधि (2012). भारतीय शिक्षा प्रणाली और परीक्षा पद्धति. राष्ट्रीय संस्कृत संस्थान।
- शास्त्री, राधाकृष्ण (2015). संस्कृत शिक्षण विधि एवं मूल्यांकन. राजस्थान संस्कृत अकादमी।

2.5 समावेशात्मिका शिक्षा

सत्रार्द्धः – 6 **श्रेयोऽङ्काः – 2**

पाठ्यपरिचयः (About the Course)–

निर्दिष्टपाठयक्रमः चतुर्षु (भागेषु) पाठ्यांशेषु विभक्तोऽस्ति। अस्योद्दश्यमस्ति यत् छात्राः निर्देशनस्य उपबोधनस्य च मूलभूततत्त्वानां कक्षागतशिक्षणाधिगमप्रक्रियायाः च प्रयोगज्ञानं प्राप्नुयुः इति। अस्मिन् मनोवैज्ञानिकपरीक्षणविषये निदानात्मकपक्षे चापि चर्चितम्। नैतिकाधारेण तेषां कारकाणां (बाधककारकाणां) परामर्शस्य च लाभाः महत्वञ्चापि अस्मिन् पाठ्यांशे वर्णितमस्ति। श्रवण–दृष्टिबाधितानाम् अधिगमकष्टानां च छात्राणां निर्देशनविषये उपबोधनविषये च अवबोधः करणीयः इति हेतोः इदं पत्रं प्रवर्तते।

अधिगमपरिणामः (Learning Outcomes) –

पाठ्यक्रमस्य पूर्त्यनन्तरं छात्राः सक्षमाः भविष्यतिः-

- निर्देशनस्य उपबोधनस्य चार्थम् आवश्यकता–विशेषाणां सन्दर्भे व्याख्यानं कर्तुम्,
- निर्देशन–उपबोधनविषये विशेषतया प्रयोजनानां व्यूहानां च मध्ये भेदावगन्तुम्,
- सामाजिक–मनौवैज्ञानिक–ऐतिहासिकपरिप्रेक्ष्ये निर्देशन–उपबोधनविषये स्पष्टीकर्तुम्,
- छात्राणां विद्यालये च निर्देशनस्य अवबोधनस्य च विशेषतानां प्रतिपादने,
- उपबोधनकार्यक्रमाणामायोजने,
- शिक्षासम्बद्धनीतीनाम्, आयोगानां च निर्देशनतया, उपबोधनसन्दर्भे विश्लेषणे।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	निर्देशनं परामर्शनञ्च	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) -1
निर्देशनम् (Guidance)

1. निर्देशनस्य अर्थः, आवश्यकता, प्रकृतिः, क्षेत्रञ्च।
2. भारते निर्देशनस्य ऐतिहासिकपृष्ठभूमिः।
3. व्यक्तिगत–सामूहिकनिर्देशनम्।
4. निर्देशनसम्बद्धाः आधारभूतसिद्धान्ताः, मान्यताश्च।
5. व्यक्तिगत–सामूहिक–निर्देशनस्य आवश्यकतानाञ्च अवबोधः।
6. प्रभावपूर्णनिर्देशनार्थम् आवश्यकसूचनाः।

7. शैक्षिक–व्यावसायिकनिर्देशनम् अध्यापकानां भूमिका च।

पाठ्यांशः(Unit) – 2

उपबोधनम्। (Counseling)

1. अर्थः, महत्त्वम्, क्षेत्रम्, उपबोधनप्रकाराः:।
2. उपबोधनोपागमा: – निर्देशात्मकः, अनिर्देशात्मकः, उदारवादी, व्यवहाराधारितः, संज्ञानामकश्च।
3. उपबोधनस्य प्रक्रिया – उपबोधनस्य सज्जता, अन्तः सम्बन्धस्थापना (Rapport) ,प्रारम्भिक साक्षात्कार समाप्तिः प्रतिक्रिया च ।
4. संरचनाया: स्थापनाः – ध्यानाकर्षकव्यवहारः,अवलोकनम्, अशाब्दिकव्यवहारः, श्रवणम्, शाब्दिकाकृतिः, सम्प्रेषणप्रत्युत्तराणि, मौनम्, प्रश्नानामुपयोगः, स्थानान्तरणं, प्रतिस्थानान्तरणं, संक्रमणं, प्रतिसंक्रमणम्, उपबोधनसम्बन्धमर्यादा, आदरभाव इच्छुकानिच्छुकलाभार्थिनामपेक्षा।
5. परिवारस्य समाजस्य च भूमिका।

पाठ्यांशः(Unit) -3

प्रादत्तानां संकलनोपकरणानि प्रविधयश्च

1. मनोवैज्ञानिकपरीक्षणं निदानञ्च आवश्यकता प्रकृतिश्च।
2. परीक्षणस्य प्रयोग:विवेचना च,मूल्याङ्कन विधयः।
3. उपबोधनसाक्षात्कार: आवश्यकपक्षाः, आधारप्रक्रिया: समस्याः, समाधानानि च।
4. व्यक्तित्वमूल्यांकनम् : ऐतिहासिकपरिप्रेक्ष्यः।
5. उपयुज्यमानव्यक्तित्वसूचीनां प्रश्नावलीनां तथा प्रक्षेपीपरीक्षाणां सामग्रीप्रशासनम्, अंकनिर्धारणं विवेचनं,मूल्याङ्कनम् च।
6. व्यक्तित्वभिमुखीकरणं परीक्षणं निर्धारणमापनी च – व्यवहारस्य प्रकाराः, व्यवहारस्य नियन्त्रणस्थानम्(Locus of control), अभिवृत्तिमापनी, ST, AI, अन्या: नैदानिकनिर्धारणमापन्यश्च।
7. व्यक्तिवृत्ताध्ययनम् – आवश्यकता महत्वञ्च।

पाठ्यांशः(Unit) – 4

निर्देश–उपबोधनसम्बद्धा: समस्याः। (Issues Related Guidance and Counseling)

1. निर्देशने उपबोधने च जायमानानि बाधककारकाणि।
2. निर्देशने उपबोधने च जायमाना: नैतिकसमस्याः।
3. उपबोधनस्यविशेषसन्दर्भे निदानात्मकदृष्ट्या सीमाङ्कनम्।
4. विद्यालयेषु मार्गदर्शन-परामर्श कार्यक्रमाणां आयोजनार्थं उपहुतयः।
5. अधिगमाक्षमाणां , दृष्टिबाधितानां, श्रावणबाधितानाञ्च जनानां निर्देशनम् उपबोधनञ्च।
6. विद्यालयेषु उपबोधनसेवासम्बद्धानि आह्वानानि।

प्रायोगिकम् (Practicum) –

1. अधिगमे काठिन्यमनुभवतां छात्राणां व्यक्तित्वविधिमाध्यमेन व्यक्तित्वाध्ययनम्।
2. निर्देशन – परामर्श/उपबोधनकार्यक्रमाणाम् आयोजने जायमानानां समस्यानाम् आह्वानानां च प्रतिवेदनप्रस्तुतिः।

प्रवचनप्रक्रिया (Mode of Transaction)–

1. योजनानुसारेण व्याख्यानं, प्रविध्याधारितप्रस्तुतीकरणम्।
2. स्वल्पसमूहचर्चा, विशिष्टदलानाम् अन्त:क्रिया, विषयाधारितसंगोष्ठीनामायोजनं, समूहचर्चा, सहयोगशिक्षा, समूहशिक्षणञ्च। उचितसिद्धान्ताधारितपठनपाठनात् व्यक्तिवृत्ताध्ययनं, क्षेत्राधारितशैक्षिकसांख्यिकीविशलेषणम्, अधिगमाधिकाररहितसमूहेन आत्मन: नियोजनम्, अल्पकालिकपरियोजनादिद्वारा सर्वेक्षणम्। शैक्षिकदृष्ट्या अधिगमावसरैः वांछितसमुदायैः समूहैः सह व्यक्तिगत क्षेत्रसङ्गतिः केन्द्रियसमूहचर्चामाध्यमेन, सर्वेक्षणं अल्पकालिक परियोजना च।
3. विविधसमूहेषु, छात्रेषु, विद्यालयेषु, अनुभावाधारितक्रियाकलापा:।

आकलनप्रक्रिया (Mode of Assessment)–

परीक्षणम् (प्रदत्तकार्याणामाधारेण सम्पाद्यमानम्)

सन्दर्भग्रन्थाः (Reference Books)

- सलूजा, चाँद किरण, शिक्षा : सामाजिक परिप्रेक्ष्य, हिन्दी माध्यम कार्यान्वयन निदेशालय, दिल्ली विश्वविद्यालय, दिल्ली।
- गुप्ता, रामबाबू, निर्देशन एवं परामर्श, भारतीय साहित्य इंक., नई दिल्ली, 2024।
- पण्ड्या, दीपक; त्रिवेदी, दीपा; शर्मा, ओमप्रकाश एवं भट्ट, विपिन, निर्देशन एवं परामर्श, हिमांशु पब्लिकेशन्स, उदयपुर, 2020।
- उपाध्याय, राधा वल्लभ, निर्देशन एवं परामर्श, अग्रवाल पब्लिकेशन्स, आगरा, 2018।
- राय, अमरनाथ एवं अस्थाना, मधु, निर्देशन एवं परामर्शन, मोतीलाल बनारसीदास, वाराणसी।
- राय, अमरनाथ, आधुनिक परामर्शन मनोविज्ञान, मोतीलाल बनारसीदास पब्लिशिंग हाउस, नई दिल्ली, 2023।
- वर्मा, संगीता एवं सिंह, धीरज, निर्देशन एवं परामर्श, ठाकुर पब्लिकेशन प्रा. लि., लखनऊ, 2017।
- अग्निहोत्री, कल्पना; मिश्रा, साधना एवं सिंह, धीरज, शैक्षिक निर्देशन एवं परामर्श, ठाकुर पब्लिकेशन प्रा. लि., लखनऊ, 2017।

2.10 मानवाधिकारशिक्षा -7

सत्रार्द्धः – 8 **श्रेयोऽङ्काः – 4**

पाठ्यपरिचयः (About the course)

मानवाधिकारः समानतायाः निष्पक्षतायाश्च सम्बन्धितानां सिद्धान्तां कश्चन समूहो वर्तते। मानवजीवने मनुष्यरूपे क्षमतानां विकासाय, आत्मनोऽवगमनाय च, तथा स्वतन्त्रविचारभिव्यक्तये भेदभावं विमुच्य समाजस्य कल्याणसाधनमेव मानवाधिकाराणां परमकर्तव्यं विद्यते। एते अधिकाराः प्रत्येकं व्यक्तेः शारीरिक-मानसिक-सामाजिक-आध्यात्मिक-आर्थिकोन्नतये स्वाधीनतायाः मर्यादाश्च संरक्षणाय पालनीयाः अंशाः विद्यन्ते।

मानवाधिकारः मानवसमाजस्य जातेश्च कृते कश्चन जन्मगताधिकारः मूल्यानां स्वरूपे जनेषु निहीतं भवतीति प्रशिक्षणार्थिनः जानीयुः, तथा च अधिकाराणां संरक्षणाय उद्यताः भवेयुः। समानतादीनाम् अधिकाराणां पालनेनैव सामाजिकव्यवस्था, आर्थिकव्यवस्था, राजनैतिकव्यवस्था, धार्मिकव्यवस्था, सांस्कृतिकव्यवस्था च प्रत्येकं राष्ट्रस्य सुदृढा आधारशिला भवतीति प्रशिक्षणार्थिनः अवगच्छेयुः। शिक्षकप्रशिक्षणकार्यक्रमेषु मानवाधिकारशिक्षायाः स्वरूपं, शिक्षायाः अधिकारः अधिनियमश्च चेत्यादिविषयाणामवगमने समर्थाः भवेयु। भारतीयशिक्षाशास्त्रीणां संविधाननिर्मातृसदस्यानां च मानवाधिकारसन्दर्भे अवदानेन सुपरिचिताः स्युः।

भारतीयसंविधानस्य वैशिष्ट्यं, तत्रैव महिलानां, बालकानां, बालिकानां, सामाजिकोपेक्षितानां च सन्दर्भे विशेषाधिकान् प्रति जागरूकतां सम्पाद्य विद्यालयशिक्षकयोः भूमिकायाः विषये ज्ञानमवाप्य मानवसमाजस्य विकासाय उन्नतये च आत्मनः योगदानं दद्युरिति।

अधिगमपरिणामाः (Learning Outcomes)

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापकाः –

- मानवाधिकाराणां समानतायाश्च अवगमने समर्थाः भवेयुः।
- मानवाधिकाराणां सम्प्राप्तये राष्ट्रियम् अन्ताराष्ट्रियञ्च प्रयासानाम् अवगमने समर्थाः भवेयुः।
- मानवाधिकारशिक्षणविधीनाम् अवगमने योग्याः स्युः।
- मानवाधिकारजागरूकतायाः संवर्धने विद्यालयानाम् अध्यापकानाञ्च भूमिकायाः विषये अवगमने समर्थाः भवेयुः।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	मानवाधिकारशिक्षा	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) -1

मानवाधिकारः

1. मानवाधिकारशिक्षायाः सम्प्रत्ययः आवश्यकता च।
2. भारतीयसंविधाने मानवाधिकाराः।
3. मानवाधिकाराणां प्रकाराः-
    - समानतायाः अधिकारः
    - शिक्षायाः अधिकारः
    - संरक्षणस्य अधिकारः
    - सुरक्षायाः अधिकारः
4. बालानां विशेषसन्दर्भे – यौन-अपराधः बालसंरक्षण-अधिनियमः (पी.ओ.सी.एस्.ओ. अधिनियमः 2012)

पाठ्यांशः(Unit) - 2

विभिन्नस्तरेषु मानवाधिकारशिक्षा

1. प्राथमिकस्तरे, माध्यमिकस्तरे, उच्चस्तरे च।
2. मानवाधिकारशिक्षायाः पाठ्यक्रमः, संरचना स्वरूपञ्च।
3. शिक्षकप्रशिक्षणकार्यक्रमेषु मानवाधिकारशिक्षायाः स्वरूपम्।
4. शिक्षायाः अधिकारः अधिनियमः (आर.टी.ई)।

पाठ्यांशः(Unit) - 3

मानवाधिकाराणां संरक्षणाय प्रयासाः

1. राष्ट्रियमानवाधिकारायोगः (एन्.एच्.आर्.सी.) तदुद्भवः प्रकार्याणि क्षेत्रञ्च।
2. राज्यमानवाधिकारायोगः (एस्.एच्.आर्.सी.) तदुद्भवः प्रकार्याणि क्षेत्रञ्च।
3. महिलानां, बालकानां सामाजिकोपेक्षितानाञ्च विशेषाधिकाराः।
4. भारते मानवाधिकारान्दोलनानां स्वरूपं महत्त्वञ्च।

पाठ्यांशः(Unit) - 4

मानवाधिकारशिक्षा

1. बालकानां विशेषसन्दर्भे अधिगन्तृशिक्षकयोः कर्तव्याधारिताधिकाराः।
2. सूचनायाः अधिकारः अधिनियमः (आर्.टी.आई.)।
3. अधिकाराः कर्तव्यानि च, विशेषसन्दर्भे मानवाधिकारान् प्रति जागरूकतायाः विकासे प्रचारे च विद्यालयशिक्षकयोः भूमिका।
4. मानवाधिकारसम्बन्धिविचाराः - राजाराममोहनरायः, महात्मा गाँधी, भीमराव अम्बेडकरः।

प्रायोगिकम् (Practicum)-

1. भारतीयसमाजे मानवाधिकारशिक्षायाः प्रासंगिकतासन्दर्भे परिचर्चायाः आयोजनम्।

   अथवा

   भारते मानवाधिकाराणां सुरक्षायै विहितप्रयत्नानां रूपरेखानिर्माणं विमर्शश्च।
2. विभिन्नस्तरेषु मानवाधिकारशिक्षायाः परिचयात्मकं विमर्शनम्।

अथवा

बालानां महिलानां च सन्दर्भे अधिकार-अधिनियमयोः अवबोधनाय चित्राणां निर्माणम्।

3. मानवाधिकाराणां संरक्षणाय भारतीयशिक्षायाः आयोगानां भूमिकायाः आलोचनात्मकं चिन्तनम्।

   अथवा

   भारते मानवाधिकारान्दोलनानां समीक्षणम्।
4. मानवाधिकाराणां जागरूकतायै शिक्षाकेन्द्राणां सामाजिकसङ्घटनानां धार्मिकसङ्घटनानां च भूमिकायाः विषये परिचर्चा।

   अथवा

   प्रमुखानां भारतीयशिक्षाशास्त्रीणां पाश्चात्त्यशिक्षाशास्त्रीणाञ्च मानवाधिकाराणां सन्दर्भे अवदानस्य परिचयात्मकं विमर्शनम्।

प्रवचनप्रक्रिया (Mode of Transaction) -

पाठ्यसामग्र्याः प्रवचनप्रक्रियायां विविधाः आयामाः पाठ्यांशाश्च समाविष्टाः सन्ति -

- प्रवचने व्याख्यानशिक्षणविधेः माड्यूलशिक्षणविधेश्च प्रयोगः।
- पॉवरपाइन्ट माध्यमेन योजनाबद्धरीत्या व्याख्यानम्।
- कक्षापरिचर्चा, दलशिक्षणं विशिष्टव्याख्यानानामायोजनं, संङ्गोष्ठीनामायोजनं, सहयोगिमूल्याकलनस्य योजना, वीथीनाटकानामायोजनं, जनचेतनाशोभायात्राणामायोजनं, सर्वेक्षणं, रिपोर्टलेखनं, चित्रनिर्माणं, स्लोगनप्रतियोगिता, अल्पकालिक-परियोजनाकार्यञ्च।

आकलनप्रक्रिया (Mode of Assessment) -

परीक्षणाधारितं सत्रीयकार्याधारितं च आकलनं भविष्यति।

सन्दर्भग्रन्थाः (Reference Books)

- क्रैन्स्टन, एम. (1973) – व्हाइट् आर् ह्यूमन् राइट्स्, लन्दन, बोडली हैड।
- कश्यपः, चन्द्रः, सुभाषः (1978) – ह्यूमन् राइट्स एण्ड पार्लियामेन्ट, नई दिल्ली, मेट्रोपोलिटिन कम्पनी प्राईवेट लिमिटेड।
- कैम्पबैल, टी (एडीस्) (1986) – ह्यूमन् राइटः, रिटोरिक टू रीडिटी, ब्लेकवेल, आक्सफोर्ड।
- खन्ना, डी.पी. (2001) – रिफोर्मिंग ह्यूमन् राइट्स्, नई दिल्ली, मानस पब्लिकेशन।
- स्यमोनीडेस्, डुनूज (2002) – ह्यूमन् राइट्स् कान्सेप्ट एण्ड स्टेन्डर्डस्, नई दिल्ली, रावत पब्लिकेशन।
- सैयद, एम्.एच्. (2003) – ह्यूमन् राइट्स् – द व्यू ऐरा, नई दिल्ली, कैलक्षौ बुक।

- पण्डा, लक्ष्मीधरः (2012) – मानवाधिकारोपेतमूल्यशिक्षा, भुवनेश्वर, तीरतरंग पब्लिकेशन।
- मोहन्तिः, जगन्नाथः – टीचिंग ऑफ ह्यूमन् राइट्स्, देहली, दीप पब्लिकेशन।
- शर्मा, माताप्रसादः – मानवाधिकारशिक्षा, जयपुरम्, शुभम प्रकाशन।

2.10 शान्तिशिक्षा -8

सत्रार्द्धः - 8 **श्रेयोऽङ्काः-4**

पाठ्यपरिचयः (About the Course)

अयं पाठ्यक्रमः राष्ट्रिये वैश्विके च परिप्रेक्ष्ये शान्तिशिक्षायाः सैद्धान्तिकानां व्यावहारिकाणां च आधाराणां व्यापकं समीक्षात्मकं च अवबोधनं विकसितं कर्तुं संरचितः अस्ति। एतस्य उद्देश्यम् अस्ति शान्तेः मूल्यस्य संवर्धनम् अभिवृत्तिनिर्माणं चेति, येन अध्येता शान्तिभावस्य चिन्तनशीलः अभ्यासी भूत्वा सामाजिकसौहार्दस्य शान्तिभावस्य च समुत्थापकः जायेत। अयं पाठ्यक्रमः शान्तिसंस्कृतेः समुन्नतौ विविधानां शिक्षाविदां जननायकानां च योगदानं प्रवर्धयति।

अधिगमपरिणामाः (Learning Outcomes)

एतस्य पाठ्यक्रमस्य सम्पूर्तौ अध्येता सामर्थ्यवान् भविष्यति -

- व्यापकतया समीक्षात्मकरीत्या च शान्तिशिक्षायाः सैद्धान्तिकानां व्यावहारिकाणां च आधारान् अवबोद्धुम्।
- शान्तिशिक्षायाः क्षेत्रस्य ऐतिहासिकविकासं स्थितिं च अन्वेष्टुम्।
- जीवने शान्तेः परिपालनं कर्तुं सर्वोत्तमविधीनाम् अन्वेषणं प्रत्यभिज्ञानं च कर्तुम्।
- सङ्घर्षसमाधानाय समुचितविधिं चित्वा तदुपयोगं कर्तुम्।
- समीक्षात्मकरीत्या अध्येतृगुणस्य चिन्तनात्मकशान्तिभावस्य च अभ्यासं कर्तुम्।
- न्यायवादिनः शान्तिप्रियस्य च समाजस्य स्थापनायाः आधारभूतसिद्धान्तानां प्रशंसां कर्तुम्।
- समाजे सकारात्मककार्याणाम् अहिंसात्मक-समस्यासमाधानोपायानां च अवगमनम् अभ्यासं च कर्तुम्।
- छात्राणां बौद्धिकनमनीयतायाः रचनात्मकतायाः समस्या-समाधानक्षमतानां च प्रवर्धनं कर्तुम्।
- सम्प्रति वैश्विकस्तरे जायमानैः घटनाक्रमैः समस्याबिन्दुभिश्च अस्याः पाठ्यसामग्र्याः सम्मेलनं कर्तुम्।
- संस्कृतसाहित्ये शान्तिशिक्षायाः विचारान् बोद्धुं चेतुं च।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	शान्तिशिक्षा	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) - 1
शान्तिशिक्षा : प्रकृतिः वैशिष्ट्यं च

1. शान्तिः शान्तिशिक्षा च।
2. शान्तिशिक्षायाः अर्थः, आवश्यकता, आयामाः लक्ष्यं च।
3. शान्तिशिक्षायाः ऐतिहासिकविकासस्य संक्षिप्तसमीक्षणम्।

4. शान्तिशिक्षायाः दार्शनिक-समाजशास्त्रीय-मनोवैज्ञानिकपरिप्रेक्ष्ये संस्कृतसाहित्यस्य योगदानम्।
5. शान्तेः प्रकाराः - सकारात्मिका, नकारात्मिका, आन्तरिकी, सामाजिकी प्राकृतिकी च।
6. द्वन्द्वनिराकरणं(Conflict-Resolution) शान्तिशिक्षा च।
7. विकासः शान्तिनिर्माणं च इत्यनयोः मध्ये सम्बन्धः।
8. शान्तिशिक्षायै उपहुतयः।
9. शान्तिशिक्षायाः व्याप्तिम् अन्वेष्टुं अनुभवाधारित अधिगमः।

पाठ्यांशः(Unit) - 2

शान्त्यर्थं विश्वसंस्कृतयः

1. शान्तिस्थापनायाः प्रक्रिया।
2. शान्तिसंस्कृतिः युद्ध-दुश्कृतिश्च।
3. शान्तिशिक्षायाः दृष्टिकोणाः/उपागमाः।
4. द्वन्द्व विश्लेषणं निराकरणं च ।
5. शान्तिस्थापनायै सामाजिक धार्मिकमूलानां च भूमिका।
6. शान्तिस्थापनायैप्रक्रियायां स्थानीयानाम् अन्ताराष्ट्रियानां च अभिकरणानां भूमिका।

पाठ्यांशः(Unit) - 3

शान्ति सौहार्दसम्बद्ध विचाराः

1. प्राचीनभारतीयविचाराः/दृष्टिकोणाः।
2. वैश्विकशान्तिशिक्षायै कृते संयुक्तराष्ट्रसङ्घस्य (UNO)भूमिका।
3. संवैधानिकप्राावधानानि।
4. सङ्घर्षविश्लेषणं समाधानं च।
5. वैश्विकस्तरे शान्तिसौहार्द निर्माणेसन्दर्भे जे. कृष्णमूर्ति, श्रीअरविन्दः, रवीन्द्रनाथटैगोर, महात्मगांधी, मोटेसरी, रसेल , दलाईलामा च इत्येतेषां योगदानम्।

पाठ्यांशः(Unit) - 4

शान्तिशिक्षायै शिक्षणशास्त्रीय विषयांश

1. सामाजि-नागरिक नव संरचनायै आकलनम्।
2. विद्यालयज्ञानस्य शान्ति च ऐतिहासिकम् परिप्रेक्ष्ये तुलनात्मकं दृष्टिकोणम्।
3. पाठ्यचर्यायाः परिवर्तनस्य सामाजैतिहासिकी प्रक्रिया।
4. यूनां युद्धानुभवानां महामारीणां च प्रभाव विषये शिक्षकाणाम् अवधारणा ।
5. शान्तिनिर्माणप्रक्रियायाः आलोके विद्यालयस्तरीयपाठ्यचर्यायाः समीक्षात्मकं विश्लेषणम्।
6. शान्तिशिक्षायाः शिक्षाशास्त्रीय विषयाणां उपहुतयः।
7. वैश्विकस्तरस्य शान्ति संस्कृति निर्माणे महात्मा गाँधी ,टैगोर,श्रीअरविन्दो,दलाईलामा च योगदानम्।
8. शान्तिस्थापनायै विद्यालयीय पाठ्यचर्यायाः समालोचनात्मकं विश्लेषणम् ।

प्रायोगिकम् (Practicum) -

प्रवचनप्रक्रिया (Mode of Transaction)-

पाठ्यक्रमसामग्र्याः प्रवचनप्रक्रियायाम् अधोलिखितपाठ्यांशाः सम्मिलिताः भविष्यन्ति -

- बहुमाध्यमयुक्तम्/पॉवर-प्वाइंटप्रस्तुतियुक्तं सुनियोजितं व्याख्यानम्।
- लघुसमूहचर्चा, सामूहिकी अन्तःचर्चा, समूहाणां पारस्परिकचर्चा, लघुविषयकेन्द्रिता सङ्गोष्ठी, सहयोगात्मकशिक्षणं दलशिक्षणं च, सैद्धान्तिकपठनसामग्रीतः चयनितांशस्य पठनम्, वृत्ताध्ययनम्, शैक्षिकप्रदत्तांशानां विश्लेषणम्, शैक्षणिकरूपेण वञ्चितसमुदायानां समूहानां च लक्षितसमूहविषये चर्चामाध्यमेन व्यक्तिगतक्षेत्रपर्यटनेन वा अध्ययनम्, सर्वेक्षणम्, अल्पकालिकपरियोजनाकार्यम्।
- विविधैः बालसमूहैः, समुदायैः विद्यालयैः च सह व्यावहारिकानुभवः।

आकलनप्रक्रिया (Mode of Assessment)

मूल्याङ्कनं परीक्षणाधारितं सत्रीयकार्याधारितं च भविष्यति।

सन्दर्भग्रन्थाः (Reference Books)

शिक्षकः विद्यार्थिनाम् आवश्यकतानुगुणं स्वाध्यायसामग्र्याः अनुगुणं च पुस्तकानां पाठ्यसामग्रीणां च विषये परामर्शं दातुं शक्नोति।

- उपाध्याय, बलदेव, वैदिकशिक्षादर्शनम्, चौखम्बा संस्कृत संस्थान, वाराणसी।
- शर्मा, श्रीराम, वेदेषु शान्तिदर्शनम्, संस्कृति संस्थान, बरेली।
- विद्यालङ्कार, सत्यव्रत, वैदिक संस्कृति का स्वरूप, विजयकुमार गोविन्दराम हासानन्द, नई दिल्ली।
- आचार्य, बलदेव उपाध्याय, संस्कृत साहित्य का इतिहास, शारदा निकेतन, वाराणसी।
- आप्टे, वामन शिवराम, संस्कृत-हिन्दी कोश, मोतीलाल बनारसीदास, दिल्ली।
- गुप्ता, रामबाबू, मूल्य एवं शान्ति शिक्षा, भारतीय साहित्य इंक., नई दिल्ली, 2024।
- मसानी, आर. पी., विश्व सद्भावना के लिए शिक्षा, नन्द किशोर एण्ड ब्रदर्स, वाराणसी।
- पाठक, संजीव कुमार, शान्ति शिक्षा, एन.सी.ई.आर.टी., नई दिल्ली, 2025।
- कुमार, नरेश, शान्ति के लिए शिक्षा एवं शान्ति निर्माता के रूप में शिक्षक, एन.सी.ई.आर.टी., नई दिल्ली, 2025।

2.10 क्रीडा सौष्ठवञ्च -9

सत्रार्द्धः - 8 **श्रेयोऽङ्काः-4**

पाठ्यपरिचयः (About the course)

अनेन पाठ्यक्रमेण स्वास्थ्यस्य सङ्कल्पनायाः, तदीयानां विविधानां आयामानां च निर्धारकाणां विषये व्यापका समग्रा च अवगतिः विकसिता भवति। स्वास्थ्यस्य शारीरिकशिक्षाया च उत्क्रान्तिं दर्शयति, विशेषतो भारतीयशिक्षायां विषयस्यास्य ऐतिहासिकं विकासं च अन्येषां विषयाणां सहसम्बन्धं च। अन्तरा विद्यालयसन्दर्भे स्वास्थ्ययोजनाभिः, कार्यक्रमैः सेवाभिश्च शारीरिकपरिपुष्टितायाः महत्त्वं रेखाङ्कितं करोति।

अधिगमपरिणामाः (Learning Outcomes)

अस्य पाठ्यक्रमस्य समापनानन्तरं छात्राः निम्नलिखितघटकेषु समर्थाः स्युः।

- समग्रस्वास्थ्यतत्त्वं तन्निर्धारकांश्च बोद्धुम्।
- व्यक्तिरूपेण स्वास्थ्ये शारीरिकशिक्षायां योगे च धनात्मकदृष्टिकोणं विकसयितुम्।
- शारीरिकपरिपुष्टिकौशलप्राप्तये, शारीरिकशुद्धाचाराणां योग्यासनानां च अभ्यासाय उत्साहवर्धनम्।
- योगासनध्यानाभ्यासेषु रुचिनिर्माणम्।
- स्वास्थ्ये शारीरिकशिक्षायां योगे च प्रचलितनीतिबिन्दूनां कार्यक्रमाणां च बोधः।
- स्वास्थ्यशारीरिकपरिपुष्टितायाः मूल्याङ्कनप्रक्रियायामवगतिकरणम्।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	क्रीडा सौष्ठवञ्च	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) - 1

स्वास्थ्यस्य शारीरिकशिक्षायाश्च मूल्याङ्कनम्

1. स्वास्थ्यं शारीरिकशिक्षा च – स्थानीयरूपेण यथा वैश्विकरूपेण च संज्ञागौरवलक्ष्याणि।
2. पाठ्यक्रमे स्थानम् – एकविषयत्वेन तदीयौ ऐतिहासिकविकासः लक्ष्याणि च, विशेषतो भारतीयशिक्षासन्दर्भे अन्यविषयैः सह सम्बन्धः।
3. स्वास्थ्यस्य शारीरिकशिक्षायाश्च स्थितिः – प्राथमिकात् माध्यमिकशिक्षायाः पर्यन्तं वैश्विकदृष्ट्या, आयुर्वेदीययोगीयस्वास्थ्यशिक्षासंकल्पना, भारते स्वास्थ्य एवं स्वास्थ्यशिक्षायाः न्यायिकदृष्टिः।

पाठ्यांशः(Unit) - 2

स्वास्थ्यशिक्षा

1. स्वास्थ्यसंकल्पना, विशेषतो भारतसन्दर्भे तदीयाः आयामाः निर्धारकाश्च।
2. बालकैः किशोरैश्च विशेषाङ्गशक्तिमद्भिश्च मानसिकसामाजिकाः चिन्ताः।
3. शारीरिकप्रणालीनां (तन्त्राणां) एवं तेषां कार्याणाम् अवबोधनम्।
4. साधारणस्वास्थ्यसमस्याः रोगाश्च – कारणानि निवारणोपायाश्च, प्रतिरक्षाप्रदानं प्राथमिकोपचारश्च।
5. विविधशारीरिकतन्त्राणां शारीरिकगतिविधयः, क्रीडाः योगश्च तेषां प्रभावः।
6. आहारः पोषणं च, पोषकद्रव्याणि तेषां कार्याणि च।

पाठ्यांशः(Unit) - 3

क्रीडाः शारीरिकपरिपुष्टिता च

1. शारीरिकपरिपुष्टिता तदीयाः घटकाश्च –एथलेटिक्स(सामान्यशारिरिकपरिपुष्टिपूरकाभ्यासः) क्रीडाः(अग्रगाम्यक्रीडाः/लीड-अप खेल, धावाक्रीडाः, प्रमुखक्रीडाश्च), लयबद्धगतिविधयः, जिमनास्टिक, तेषां स्वास्थ्येषु प्रभावश्च।
2. शारीरिकपरिपुष्टितायाः विकासः – शारीरिकस्थितिः विश्रामश्च महत्त्वम्। परिपुष्टितापरीक्षाः, स्वास्थय एवं क्रीडासुसाधनसेवाश्च।
3. क्रीडाणां मौलिककौशलानि – विनोदाय स्पर्धार्थं च क्रीडाः, क्रीडापुरस्काराणि छात्रवृत्तयश्च, क्रीडात्मवृत्तिः, स्वदेशीयाः आत्मरक्षाकार्याणि च।
4. विद्यालयपरिवारः, स्वास्थ्यसेवाः, नीतयः, प्रमुखस्वास्थ्यशारीरिकशिक्षासम्बद्धकार्यक्रमाश्च, रक्तपेटिकाः, संचारमाध्यमानां भूमिका च।
5. सुरक्षा।
6. प्राथमिकोपचाराः – आवश्यकता सिद्धान्ताश्च।

पाठ्यांशः(Unit) - 4

नीतयः कार्यक्रमाः मूल्याङ्कनं च

1. स्वास्थ्यावश्यकतासमाधानाय नीतयः कार्यक्रमाः सेवाश्च।
2. विद्यालयस्वास्थ्यकार्यक्रमः – विद्यालयस्वास्थ्यसेवाः, स्वास्थ्यसंवर्धकविद्यालयाः, वैश्विकविद्यालयस्वास्थ्ययोजनाश्च।
3. योगः – अर्थः, उद्भवः, ऐतिहासिकता, वर्गीकरणम्, प्रविधयः, योगशाखाश्च। स्वस्थजीवनजीवनार्थं योगस्य आवश्यकता महत्त्वं मनोविज्ञानोपचारेण योगस्य भूमिका च।
4. पोक्सो (यौनशोषणात् बालानां रक्षणं रक्षाधिनियमः २०१२), पीडब्ल्यूडी २०१६, समन्वितबालसंरक्षणयोजना च।
5. क्रीडासु शारीरिकनिष्पादनस्य परीक्षणम्, बालस्य स्वास्थ्यावस्थाया क्रीडाक्षेत्रेषु निष्पादनस्य च प्रतिवेदनम्।

प्रायोगिकम् (Practicum)

1. बालानां मानसिकस्वास्थ्यस्य च प्रमुखसूचकानां परिचयः।

अथवा

राष्ट्रियशिक्षानीतेः २०२० इत्यस्मिन् क्रीडानिष्ठशिक्षायाः सन्दर्भेण विश्लेषणम्।

अथवा

विद्यालये शारीरिकशिक्षायाः निर्धारणाय आलोचनात्मकसंवादानां आयोजनम्।

2. व्यायामविषयकानां विविधाहारप्रकारविषयकानां च मिथ्याधारणानां सूचीकरणम्।

अथवा

अभिलेखसञ्चिका: वर्तमानस्य राष्ट्रीयपुरस्काराणां परिचयः। पुरस्कार विजेतॄणां (द्रोणाचार्यपुरस्कारस्य, अर्जुनपुरस्कारस्य च मेजरध्यानचन्द्रखेलरत्नपुरस्कारस्य) सचित्रपरिचयः/सूचीनिर्माणम् ।

3. शारीरिकपरिपुष्टितायाः विकासाय गतिविधीनां योजनानिर्माणम्।

अथवा

प्राथमिकोपचारपेटिकायाः निर्माणम्।

4. मूलभूतयोगाभ्यासानाम्, आसनानाम्, प्राणायामस्य, क्रियाणां च ध्यानस्य च अध्ययनं प्रदर्शनं च।

अथवा

कश्चन एकस्य क्रीडाक्षेत्रस्य, उपकरणानां सचित्रवर्णनम् (नियमा:, पारिभाषिकशब्दा:कौशलानि च)।

प्रवचनप्रक्रिया (Mode of Transaction)

विषयवस्तुनः शिक्षणप्रसारणे अधोलिखितानि अन्तर्भविष्यन्ति:

- बहुमाध्यमैः/पॉवरपॉइन्टप्रस्तुतीकरणैः संयुक्तनियोजितव्याख्यानानि।
- लघुसमूहचर्चाः, पैनलवार्ताः, लघुविषयाधारितसंगोष्ठ्यः, समूहचर्चाः, सहकारिशिक्षणम्, कार्यसमूहशिक्षणं च, सैद्धान्तिकाभ्यासग्रन्थादीनां चयनानि, शैक्षिककानां विश्लेषणानि, शैक्षिकदृष्ट्या उपान्तवर्गीयसमुदायजनसमूहैः सह व्यक्तिगतक्षेत्रसंलग्नता च समूहाधारितसंलापैः, सर्वेक्षणैः, अल्पकालिकपरियोजनाकार्यैश्च।
- विविधसमुदायैः, बालकैः, विद्यालयैश्च सह व्यवहारिकानुभवसम्पादनम्।

आकलनप्रक्रिया (Mode of Assessment)

परीक्षासु प्रबन्धकार्येषु च आधारितं मूल्याङ्कनं भविष्यति।

सन्दर्भग्रन्थाः (Reference Books)

अध्यापकाः शिक्षार्थिशिक्षणावश्यकतानुरूपं ग्रन्थान् पठनसामग्रीश्च सूचयिष्यन्ति।

साहित्यम् -1

3.1 साहित्यशास्त्रस्य सामान्यपरिचयः

सत्रार्द्धः- 1 **श्रेयोऽङ्कः-4**

पाठ्यपरिचयः- (About the course) -

अत्र साहित्यशास्त्रस्य सामान्येन परिचयः प्रस्तुतः। इह साहित्येति नाम्नोऽर्थः, साहित्यशास्त्रस्य प्रमुखाः ग्रन्थाः, काव्यस्य प्रयोजनम्, कारणम्, भेदाः, गुणाः, अलंकाराश्च सामान्येन प्रतिपादितानि सन्ति। साहित्यं नाम मानवस्य आत्मा। साहित्यं विना मनुष्यः पुच्छेन शृङ्गेण च रहितः सहायहीनः पशुः। साहित्यमेव काव्यपदेनापि कथ्यते। यत् शास्त्रम् एतस्य साहित्यस्य स्वरूपं प्रयोजनं घटकानि च प्रतिपादयति तदेव साहित्यशास्त्रम् उच्यते। इदमेव काव्यशास्त्रम् अलंकारशास्त्रं चोच्यते। अस्य साहित्यशास्त्रस्य प्रमुखं प्रमेयं काव्यमेव विद्यते, तदङ्गत्वेन तस्य प्रयोजनम्, कारणम्, भेदाः, गुणाः,अलंकाराश्चापि अत्र विवेचिता भवन्ति। अत्र काव्ये हेया दोषा आपि विचार्यन्ते। एषामेव सामान्येन विवेचनम् अत्र विद्यते।

अधिगमपरिणामाः (Learning Outcomes) -

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः-

- साहित्यशब्दार्थं बोधयितुं शक्ष्यन्ति।
- साहित्यशास्त्रस्य प्रमुखान् ग्रन्थान् प्रतिपादयितुं प्रभविष्यन्ति।
- सप्रयोजनस्य, सकारणस्य, सभेदस्य च काव्यस्यावबोधे शक्ता भविष्यन्ति।
- सभेदस्य गुणस्य परिचयं प्राप्स्यन्ति।
- काव्यदोषस्यावबोधे समर्था भविष्यन्ति।
- सभेदमलंकारम् अवगिष्यन्ति।
- साहित्यशास्त्रस्य प्रमेयाणाम् अध्यापने कौशलं लप्स्यन्ते।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	साहित्यशास्त्रस्य सामान्यपरिचयः	40 hr	0	24 hr.	4

पाठ्यांशः (Unit) – 1

साहित्यशास्त्रस्य नामकरणं तद्ग्रन्थाश्च-(1)

- साहित्यशब्दार्थः

- साहित्यशास्त्रस्य नामानि
  साहित्यशास्त्रस्य ग्रन्था :(नाट्यशास्त्रम्, काव्यादर्शः, भामहकृतः काव्यालङ्कारः, काव्यालङ्कारसूत्रवृत्तिः, ध्वन्यालोकः, औचित्यविचारचर्चा, वक्रोक्तिजीवितम्, व्यक्तिविवेकः, काव्यप्रकाशः, साहित्यदर्पणः, रसगङ्गाधरः, काव्यालङ्कारकारिका, काव्यसत्यालोकः, अभिराजयशोभूषणम्, अभिनवकाव्यालङ्कारसूत्रम्)

पाठ्यांशः (Unit) – 2

काव्यस्य प्रयोजन-कारण-लक्षण-भेदाः

- काव्यप्रयोजनम्
- काव्यकारणम्
- काव्यलक्षणम्
- काव्यभेदः

पाठ्यांशः (Unit) – 3

गुणपरिचयः (1)

- गुणस्वरूपम्
- गुणभेदः -
  - त्रयो गुणाः
  - दश गुणाः
  - विंशतिः गुणाः
  - विंशतेः गुणानाम् आलोचनं गुणत्रयवादस्य समर्थनञ्च।

पाठ्यांशः (Unit) – 4

अलङ्कारपरिचयः (1)

- अलङ्कारस्य सामान्यलक्षणम्
- अलङ्कारभेदः
  - शब्दालङ्कारः
  - अर्थालङ्कारः
  - उभयालङ्कारः
- गुणालङ्कारयोः भेदः

प्रायोगिकम् (Practicum)

1. प्रदत्तविषयानुसारेण लेखनम्
2. प्रदत्तविषयानुसारेण वीडियोनिर्माणम्
3. प्रदत्तविषयानुसारेण भाषणम्
4. रघुवंशादौ लभ्यमानानां काव्यभेद-गुणालंकाराणां संग्रहः।

प्रवचनप्रक्रिया (Mode of Transaction)-

समीक्षात्मिका पद्धतिः आश्रयणीया। अनेकविषयसम्बद्धाः समीक्षात्मकग्रन्थाः पूर्वं विलोकनीयः तथा कार्यं येन साहित्यशास्त्रविषयकं ज्ञानसामान्यं छात्राध्यापकेषु जायते। पीपीटी-द्वाराऽपि सम्बद्धाविषयाः प्रदर्शनीयाः।

आकलनप्रक्रिया (Mode of Assessment)-

1. भाषाशुद्धिः
2. अभिव्यक्तिकौशलम्।
3. व्यवहारः।
4. प्रश्नमञ्चः।
5. नियमितता।
6. अधिगमसामर्थ्यम्, परियोजनाकार्याणि प्रयोगाकार्याणि च।

सन्दर्भग्रन्थाः (Reference Books)

1. काव्यप्रकाशः, मम्मटः, भट्टवामनाचार्यः, (भण्डारकर प्राच्यविद्या संशोधकमन्दिरम्-पब्लिकेशनम्, दिल्ली, 2008)
2. साहित्यदर्पणः, शालिग्रामशास्त्री, मोतीलाल बनारसीदास, नई दिल्ली, 2000
3. काव्यालंकारसूत्राणि, वामनः, श्रीगोपेन्द्रत्रिपुरहरभूपालः, चौखम्बासंस्कृतसुरभारती प्रकाशनम् -, वाराणसी, .2001
4. वक्रोक्तिजीवितम्, प्रो,रमाकान्तपण्डेयः, जगदीशपुस्तकालय, जयपुर-2005
5. काव्यात्ममीमांसा, डॉ जयमन्तमिश्रः, चौखम्बा, वाराणसी भवन, वि. 2005
6. संस्कृतवाङ्मय का बृहद् इतिहास (काव्यशास्त्रखण्ड), प्रधानसम्पादकः-डा.बलदेवउपाध्याय, पं. वायुनन्दन पाण्डेय, उत्तरप्रदेशसंस्कृतसंस्थान, लखनऊ

साहित्यम् -2

3.1 शिशुपालवधे वर्णिता राजनीतिः (शिशुपालवधम्-द्वितीयः सर्गः)

सत्रार्द्धः-1 **श्रेयोऽङ्कः - 4**

पाठ्यपरिचयः (About the course)

अत्र महाकविमाघरचितस्य शिशुपालवधमहाकाव्यस्य द्वितीयः सर्गो निर्धारितः, यत्र राजनीतिः प्रतिपादिता। अस्याध्ययनेन प्राचीनराजनीतेरवबोधो भविष्यति।

अधिगमपरिणामाः (Learning Outcomes)

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः-

- महाकविमाघं तत्काव्यरचनारीतिं च परिचेष्यन्ति।
- राजनीतेः सिद्धान्तं बोधयितुं शक्ष्यन्ति।
- श्लोकव्याख्यानकौशलं प्राप्स्यन्ति।
- सम्बद्धव्याकरणादिशास्त्राणाम् अवगमे समर्था भविष्यन्ति।
- कस्यचित् सिद्धान्तस्य काव्यमाध्यमेन उपस्थापयितुं शक्ता भविष्यन्ति।
- महापुरुषस्य लक्षणं भोत्स्यन्ते।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	शिशुपालवधे वर्णिता राजनीतिः(शिशुपालवधम्-द्वितीयः सर्गः)	40 hr	0	24 hr.	4

पाठ्यांशः (Unit) - 1

महाकाव्यपरम्परा (1)

- प्रमुखमहाकाव्यानां परिचयः (रामायणम्, महाभारतम्,रघुवंशम्, कुमारसंभवम्, बुद्धचरितम्)
- माघस्य परिचयः
- शिशुपालवधस्य कथासारः

पाठ्यांशः (Unit) - 2

बलरामस्य उक्तेः याथार्थ्यम् (1)

- महीयसां लक्षणम्
- बलरामस्य स्वरूपम्
- बलरामस्य उक्तौ दण्डनीतेः महत्त्वम्
- बलरामेन कृता श्रीकृष्णवचनस्य प्रशंसा

पाठ्यांशः (Unit) - 3

बलरामोक्तौ युक्तीनाम् उपस्थापना (1)

- वक्तुम् उपस्थितस्य उद्धवस्य कृते आक्षेपः
- शिशुपालं प्रति आक्रमणे युक्तेरुपस्थापना
- यादवसेनायाः शक्तेरतिशयः
- यादवसेनां प्रति कर्तव्यविषये बलरामस्य संदेशः

पाठ्यांशः (Unit) - 4

उद्धवस्योक्तौ सामनीतेर्महत्त्वम् (1)

- उद्धवेन कृता बलरामस्य उक्तेः प्रशंसा
- सत्कविना शब्दार्थयोराश्रयणम् इव राज्ञा पौरुषभाग्ययोः आश्रयणम्
- शिशुपालं प्रति आक्रमणं नोचितम् इति पक्षे उद्धवस्य युक्तिः
- शब्दविद्या इव राजनीतिः अपस्पशा नो भाति।

प्रायोगिकम् (Practicum)

1. श्लोकोच्चारणम्।
2. श्लोकस्मरणम्।
3. श्लोकव्याख्यानम्।
4. प्रदत्तश्लोकानुसारेण बीडियोनिर्माणम्।
5. वाच्यपरिवर्तनम्।
6. सुबन्त-तिङन्त-समस्तादिपदानां संग्रहः।

प्रवचनप्रक्रिया (Mode of Transaction) -

खण्डान्वयः दण्डान्वयश्च विधिराश्रयणीयः पूर्वं श्लोकाः सस्वरम् उच्चारणीयाः। पद-पदार्थादिपरिचयः कारयितव्यः। श्लोकसम्बद्धानि शास्त्रान्तरतत्त्वानि अपि बोधनीयानि। समासविग्रहादिः कार्यः। तथा विधेयम् येन छात्राध्यापकेषु श्लोकव्याख्यानकौशलं वर्धेत।

आकलनप्रक्रिया (Mode of Assessment)

1. श्लोकोच्चारणशुद्धिः।
2. अभिव्यक्तिकौशलम्।
3. व्यवहारः।
4. प्रश्नमञ्चः।
5. नियमितता।
6. अधिगमसामर्थ्यम्, परियोजनाकार्यम्, प्रयोगकार्यं च।

सन्दर्भग्रन्थाः (Reference Books)

- शिशुपालवधमहाकाव्यम्, महाकविमाघः (सर्गः-2) मल्लिनाथ, श्रीपण्डितहरगोविन्दशास्त्री, चौखम्बा विद्याभवन, वाराणसी, 2015
- संस्कृत साहित्य का इतिहास, उमाशंकर शर्मा ऋषि, चौखम्भा भारती अकादमी, वाराणसी221001-
- संस्कृत साहित्य का इतिहास, आचार्य बलदेव उपाध्याय, शारदा निकेतन वाराणसी, 2001
- संस्कृत साहित्य का इतिहास, कपिलदेव द्विवेदी, विश्वविद्यालय-प्रकाशन,वाराणसी।

साहित्यम् -3

3.1 मेघदूते वर्णितानि भौगोलिकक्षेत्राणि (मेघदूतम्-पूर्वमेघः)

सत्रार्द्धः -2 **श्रेयोऽङ्कः - 4**

पाठ्यपरिचयः -

अत्र महाकविकालिदासेन मन्दाक्रान्ताछन्दसा रचितस्य मेघदूतस्य पूर्वभागो निर्धारितः। इह भारतवर्षस्य प्राचीनानि यानि भौगोलिकक्षेत्राणि प्रतिपादितानि, तेषां मनोहरं वर्णनमस्ति। मेघदूतस्य श्लोकानां वर्णितभौगोलिकक्षेत्राणां च अवगमो भविष्यति।

अधिगमपरिणामाः (Learning Outcomes) -

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः -

- महाकविकालिदासं तद्रचनारीतिं च परिचेष्यन्ति।
- प्राचीनभारतीयभौगोलिकक्षेत्राणि प्रतिपादयितुं शक्ष्यन्ति।
- मन्दाक्रान्ताच्छन्दसः प्रयोगे कौशलम् प्राप्स्यन्ति।
- विरहिमनोदशाविज्ञाने समर्था भविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	मेघदूते वर्णितानि भौगोलिकक्षेत्राणि (मेघदूतम्-पूर्वमेघः)	40 hr	0	24 hr.	4

पाठ्यांशः (Unit) - 1

खण्डकाव्यपरम्परा (1)

- खण्डकाव्यस्य परिचयः
- मेघदूतस्य वैशिष्ट्यम्
- कालिदासस्य कवित्वम्
- यक्षस्य विप्रलम्भः

पाठ्यांशः (Unit) - 2

यक्षेण स्वदुःखस्य निवेदनम् (1)

- वर्षभोग्यः शापः

- कामार्त्तस्य प्रकृतिकृपणत्वम्
- कुसुमसदृशं हृदयम्
- शिखरस्य श्यामत्वम्

पाठ्यांशः (Unit) - 3
मेघमार्गस्य दर्शनम् (1)

- विन्ध्यपादे विशीर्णाया रेवाया दर्शनम्
- वेत्रवतीनदीदर्शनम्
- विशालापुरीदर्शनम्
- शिप्रानदीदर्शनम्
- महाकालदर्शनम्।
  19 अध्वक्लान्तम् इति पद्यम् आरभ्य अप्यन्यस्मिन् जलधर इति 38 पद्यपर्यन्तम्।

पाठ्यांशः (Unit) – 4
प्रकृतिवर्णनम् (1)

- सान्ध्यतेजोवर्णनम्
- गम्भीरानदीवर्णनम्
- रन्तिदेवस्य कीर्त्तिकथा
- कैलासवर्णनम्
- मानससरोवर्णनम्
  39 पादन्यासैः क्वणित इति पद्यम् आरभ्य तस्योत्सङ्गे प्रणयिन इव 67 इति पद्यपर्यन्तम्।

प्रायोगिकम् (Practicum)

1. श्लोकोच्चारणम्।
2. श्लोकस्मरणम्।
3. श्लोकव्याख्यालेखनम्
4. प्रदत्तश्लोकाश्रितं व्याख्यानम्
5. रत्यादिभावानाम् अनुसंधानम्।
6. वाच्यपरिवर्तनम्।
7. सुबन्ततिङन्त-समस्तादिपदानां संग्रहः।
8. प्रयुक्तालंकारसंग्रहः
9. वर्णितभौगोलिकाधारेण भारतस्वरूपस्य मानचित्रमाध्यमेन प्रदर्शनम्

प्रवचनप्रक्रिया (Mode of Transaction) -

श्लोकव्याख्याने खण्डान्वयः दण्डान्वयश्च विधिराश्रयाणीयः। श्लोकोच्चारणै करणीयं च। पद-पदार्थादयो वाच्याः। प्रतिश्लोकं यथासंभवं रस-भावादयः काव्यशास्त्रीया विषया बोधनीयाः।

आकलनप्रक्रिया (Mode of Assessment)

1. श्लोकोच्चारणशुद्धिः।
2. अभिव्यक्तिकौशलम्।
3. व्यवहारः।
4. प्रश्नमञ्चः।
5. नियमितता।
6. अधिगमसामर्थ्यम्, परियोजनाकार्यम्, प्रयोगकार्याणि च।

सन्दर्भग्रन्थाः (Reference Books)

- मेघदूतम्, कालिदासः, डा. दयाशङ्करशास्त्री, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2017
- संस्कृत साहित्य का समीक्षात्मक इतिहास, कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन,2007
- संस्कृत साहित्य का इतिहास, आचार्य बलदेव उपाध्याय, शारदा निकेतन, वाराणसी, 2001
- कालिदास का भारत, भगवत्शरण उपाध्या,मोतीलाल बनारसीदास

साहित्यम् -4

3.1 प्रमुखाणि छन्दांसि कविशिक्षा च (छन्दोमञ्जरी काव्यमीमांसा च)

सत्रार्द्धः- 2 **श्रेयोऽङ्कः- 4**

पाठ्यपरिचयः -

इह प्रमुखाणि छन्दांसि, शास्त्राणां संग्रहः, कविशिक्षा च प्रतिपादितानि।

अधिगमपरिणामाः (Learning Outcomes)

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः:-

- छन्दःशास्त्रपरम्परायाः प्रतिपादने समर्था भविष्यन्ति।
- प्रमुखाणां छन्दसां लक्षणानि बोद्धुं प्रभविष्यन्ति।
- कवेः कर्तव्यानि बोद्धुं शक्ष्यन्ति।
- लक्ष्यग्रन्थेषु कविसमयस्य गवेषणे कौशलं प्राप्स्यन्ति।
- छन्दः प्रयोगकौशलम् अधिगमिष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	प्रमुखाणि छन्दांसि कविशिक्षा च (छन्दोमञ्जरी काव्यमीमांसा च)	40 hr	0	24 hr.	4

पाठ्यांशः (Unit) – 1

छन्दः शास्त्रपरम्परा (1)

- छन्दः शास्त्रस्य परिचयः
- गङ्गादासस्य पाण्डित्यं छन्दोमञ्जर्याः मौलिकता च
- वृत्तभेदाः, आर्या-मात्रावृत्तम्, गीतिः च।
  गणवृत्तम् - अर्धसमम्, विषमं च।
- गुरुलघुनिर्देशः-ऽ,।, उक्थादिगणना च।

पाठ्यांशः (Unit) – 2

छन्दांसि –(1)

- अनुष्टुप् छन्दः - श्लोकः - अष्टाक्षरावृत्तिः, विद्युन्माला।
- पङ्क्तिः छन्दः - मत्ता वृत्तम् - दशाक्षरावृत्तिः।
- त्रिष्टुप् छन्दः - इन्द्रवज्रा - एकादशाक्षरा वृत्तिः, उपेन्द्रव्रजा, उपजातिः, शालिनी, दोधकम्।
- जगती छन्दः - वंशस्थम् - द्वादशाक्षरा वृत्तिः, भुजङ्गप्रयातम्, त्रोटकम्, द्रुतविलम्बितम्।

पाठ्यांशः (Unit) – 3

छन्दांसि-(1)

- अतिजगती छन्दः - प्रहर्षिणी - त्रयोदशाक्षरा वृत्तिः, मत्तमयूरम्, मञ्जुभाषिणी।
- शक्वरी छन्दः - वसन्ततिलका - चतुर्दशाक्षरा वृत्तिः।
- अतिशक्करी छन्दः - मालिनी - पञ्चदशाक्षरा वृत्तिः।
- अष्टिः छन्दः - पञ्चचामरम् - षोडशाक्षरा वृत्तिः।
- अत्यष्टिः छन्दः - सप्तदशाक्षरा वृत्तिः, शिखरिणी, मन्दाक्रान्ता, पृथ्वी।
- शार्दूलविक्रीडितम्, स्रग्धरा च।

पाठ्यांशः (Unit) - 4

कविशिक्षा (1)

- शास्त्रसङ्ग्रहः
  (अथातः काव्यं मीमांसिष्यामहे इत्यारभ्य कविभ्यो राजशेखरः इति पर्यन्तम्)
- कविचर्या राजचर्या च
  (गृहीतविद्योपविद्यः इत्यारभ्य स सुखी तत्र तत्र च इति पर्यन्तम्)
  शब्दार्थहरणोपायाः
  (परप्रयुक्तयोः शब्दार्थयोः इत्यारभ्य मन्यतां स महाकविः इति पर्यन्तम्)
- कविसमयः
  (अशास्त्रीयमलौकिकं च परम्परायातम् इत्यारभ्य पातालीयश्च कथ्यते इति पर्यन्तम्)

प्रायोगिकम् (Practicum)

1. प्रदत्तविषयानुसारेण भाषणम्।
2. छन्दोविशेषसंबद्धानां श्लोकानाम् उच्चारणम्।
3. प्रदत्तेन छन्दसा पद्यस्य निर्माणम्

4. पठितानां छन्दसां काव्येषु गवेषणम्
5. कविसमयसंबद्धानां श्लोकानाम् अन्वेषणम्।
6. छन्दोविशेषसंबद्धश्लोकानुसारेण वीडियोनिर्माणम्।

प्रवचनप्रक्रिया (Mode of Transaction) -

व्याख्यनात्मकः प्रत्यक्षात्मकश्च विधिरायश्रणीयः छन्दसाम् उच्चारणं करणीयं कारणीयं च। काव्यमीमांसायाः पङ्क्तयो विषयाश्च प्रतिपादनीयाः। विषयसंबद्धानि अन्यानि अपि उदाहरणानि देयानि।

आकलनप्रक्रिया (Mode of Assessment)

पठितविषयानुसारेण यथानियमम्।

1. प्रदत्तविषयानुसारेण लेखनम्
2. छन्दविशेषस्योच्चारणम्
3. प्रश्नमञ्चः
4. छन्दोविशेषसंबद्धश्लोकस्मरणम्
5. व्यवहारः
6. अधिगमसामर्थ्यम्, परियोजनाकार्यम्, प्रयोगकार्यम् च।

सन्दर्भग्रन्थाः (Reference Books)

- श्रीगङ्गादासप्रणीता छन्दोमञ्जरी, व्याख्या. डा. ब्रह्मानन्द त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी-२२१००१
- हिन्दी काव्यमीमांसा सं. डा. गंगासागर राय, चौखम्बा विद्याभवन, वाराणसी-२२१००१
- काव्यालंकारसूत्राणि, वामनः, श्रीगोपेन्द्रत्रिपुरहरभूपालः, चौखम्बासंस्कृतसुरभारती प्रकाशनम् -, वाराणसी, 2001
- पिङ्गलस्य छन्दःशास्त्रम्, निर्णयसागर प्रेष
- छन्दस्कलावती, डॉरामकिशोरमिश्रः ., प्रकास्वयं ., संस्कृत विभाग, महा.मा. म. वि ., खेकड़ा, । 1991
- छन्दःसन्दोहः, (काव्यम्) दत्तदीनेशचन्द्रः, अन्तर्राष्ट्रीय ग्रन्थागार, पो. आँ. बाक्स 149, प्राप्ति स्थान – मोतीलाल बनारसीदास, बैंग्लो रोड, जवाहर नगर, दिल्ली, जयपुर, 1968
- छन्दोऽभिराजीयम्, (छन्दःशास्त्रम्) अभिराजराजेन्द्रमिश्रः, वैजयन्त प्रकाशन, इलाहाबाद, 1999

साहित्यम् -5

3.1 शतककाव्येषु नीतिशतकम्

सत्रार्द्धः- 2 **श्रेयोऽङ्कः-4**

पाठ्यपरिचयः- (About the course)-

संस्कृतसाहित्ये शतककाव्यानां महती परम्परा। तत्र भर्तृहरेः त्रिषु शतकेषु नीतिशतकं प्रसिद्धं वर्तते, यत्र व्यवहारोपयोगिनोऽनेके विषयाः श्लोकमाध्यमेन प्रतिपादिताः। इदमेव नीतिशतकम् अत्र पाठ्यत्वेन निर्धारितं विद्यते। अस्याध्ययनेन व्यावहारादौ कौशलं भवति। दुर्जनाः सज्जनाश्च कथं परिचेयाः, तैः कथं व्यवहरणीयं चेत्यादि सर्वं नीतिशतकस्य श्लोकेषु निहितं वर्तते। नीतिशतकमाचारशास्त्रमपीति शक्यते वक्तुम्। नैतिकमूल्यानाम् अवबोधनम् अस्य पाठ्यांशस्य प्रमुखम् उद्देश्यम्

अधिगमपरिणामाः (Learning Outcomes) -

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः-

- शतककाव्यपरम्परायाः परिचयं प्राप्स्यन्ति।
- उत्तमस्वभावं ज्ञातुं प्रभविष्यन्ति।
- दुष्टसज्जनयोर्भेदान् अवगमिष्यन्तिः।
- सज्जनसंसर्गे प्रेरणां प्राप्स्यन्ति।
- संसर्गस्य माहात्म्यं च सम्यक् ज्ञास्यन्ति।
- श्लोकानां व्याख्याने समर्था भविष्यन्ति।
- व्यवहारोपयोगीनि नाना तत्त्वानि भोत्स्यन्ति।
- नीतिशतकस्य विषयाणां प्रतिपादने शक्ता भविष्यन्ति।
- चरित्रनिर्माणे प्रभविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	शतककाव्येषु नीतिशतकम्	40 hr	0	24 hr.	4

पाठ्यांशः (Unit) - 1

शतककाव्यपरम्परा (1)

- शतककाव्यस्य परिचयः
- नीतिशतकस्य वैशिष्ट्यम्
- भर्तृहरेः कवित्वम्
- नीतेः सामाजिकं प्राधान्यम्

पाठ्यांशः (Unit) - 2

स्वभावनिर्णयः (1)

- मूर्खाणां वैविध्यं विद्यायाः महत्त्वं च
- वाग्भूषणस्य महत्वम्
- शान्तिदाक्षिण्ययोः महत्वम्
- सत्संगतेः महत्त्वम्
  (दिक्कालाद्यनव -१ इति पद्यादारभ्य जाड्यं धियो -२५ इति पद्यपर्यन्तम्)

पाठ्यांशः (Unit) - 3

दुष्टसज्जनयोः भेदः (1)

- जनानाम् उत्तमत्वम्
- दुरात्मनां प्रकृतिसिद्धम्
- खलसज्जनानां मैत्री
- महात्मनां प्रकृतिः प्रकृतिमहसां मण्डनं च
  (प्राणाघातात् -२६ इति पद्यादारभ्य करे श्वाघ्यस्त्याज्यः -६५ इति पद्यपर्यन्तम्)

पाठ्यांशः (Unit) - 4

संसर्गमाहात्म्यम् (1)

- नराणां वृद्धिक्षयकारणम्
- कर्मणः माहात्म्यम्
- पुराकृतानि पुण्यानि
- नरस्य पूर्वसुकृतं सत्यव्रतव्यसनिनः स्वभावः च
  (सम्पत्सु महतां चित्तं -६६ इति पद्यादारभ्य लज्जागुणौध -१०८ इति पद्यपर्यन्तम्)

प्रायोगिकम् (Practicum) -

- श्लोकानां कण्ठस्थीकरणरम्
- श्लोकानाम् खण्डान्वयस्य दण्डान्वयस्य च प्रक्रिया
- प्रदत्तश्लोकेषु अलंकारस्य गवेषणम्
- श्लोकानां व्याख्यानम्
- पठितविषयस्य समाजे दृष्टान्तेन निरूपणम्
- विषयानुसारेण आडियो-बिडिया-निर्माणम्

प्रवचनप्रक्रिया (Mode of Transaction)-

व्याख्यानात्मिका पद्धतिः आश्रयणीया। श्लोकाः सपदकृत्यं व्याख्येयाः। नीतिशतके प्रतिपादिता विषया यथासंभवं यू.ट्यूब-प्रभृतिमाध्यमेन प्रदर्शनीयाः। पीपीटी-द्वाराऽपि सम्बद्धा विषयाः प्रदर्शनीयाः।

आकलनप्रक्रिया (Mode of Assessment)-

- भाषाशुद्धिः
- अभिव्यक्तिकौशलम्।
- व्यवहारः।
- प्रश्नमञ्चः।
- नियमितता।
- अधिगमसामर्थ्यम्, परियोजनाकार्याणि, प्रयोगकार्याणि च।

सन्दर्भग्रन्थाः (Reference Books)

- नीतिशतकम्, भर्तृहरिः, चौखम्बा कृष्णदास अकादमी,वाराणसी, 2010
- संस्कृत साहित्य का समीक्षात्मक इतिहास, कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन, 2007।
- संस्कृत साहित्य का इतिहास, डा. ए.बी. कीथ, डा. मंगलदेव शास्त्री, मोतीलाल बनारसीदास, दिल्ली, 1967।

साहित्यम् -6

3.1 युवराजोचित उपदेशः (कादम्बरी-शुकनासोपदेशः)

सत्रार्द्धः- 3 **श्रेयोऽङ्कः - 4**

पाठ्यपरिचयः -

अधिगमपरिणामाः (Learning Outcomes) एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः-

- गुरूपदेशस्य माहात्म्यं वक्तुं शक्ष्यन्ति।
- युवावस्थायां संभविनां दोषाणां हेयतां ज्ञास्यन्ति।
- राजस्वभावं परिचेष्यन्ति।
- प्रशासकस्य कर्तव्यानि भोत्स्यन्ते।
- चाटुकारिताया दुष्प्रभावं बोधयितुं समर्था भविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	युवराजोचित उपदेशः (कादम्बरी-शुकनासोपदेशः)	40 hr	0	24 hr.	4

पाठ्यांशः (Unit) - 1
शुकनासोपदेशः (1)

- उपदेशपरम्परा
- बाणस्य परिचयः कादम्बरी च
- शुकनासस्य व्यक्तित्वं दारुणो लक्ष्मीमदः,
- अनर्थपरम्परा, रागमलावलेपदोषः च

पाठ्यांशः (Unit) - 2
युवावस्थायां पुरुषस्य स्वभावः (1)

- युवावस्थाया दोषाः
- मनसः मृगतृष्णिका
- अत्यासङ्गदोषः
- हितोपदेशेषु अश्रद्धा

पाठ्यांशः (Unit) - 3

राजप्रकृतिः (1)

- राजलक्ष्मीप्रभावः
- लक्ष्मीचिह्नानि
- लक्ष्म्याः दुःखेन परिपालनम्
- लक्ष्म्याः विपरीतवृत्तिः लक्ष्म्याः अस्थिरता च

पाठ्यांशः (Unit) – 4

लक्ष्म्याः विलासः (1)

- लक्ष्म्याः विश्वरूपत्वग्रहणम्
- लक्ष्म्याः कोशमण्डलात् मोक्षः
- लक्ष्म्याः चाञ्चल्यम्
- लक्ष्मीः तमोबहुला सर्वाविनयानां पुरः पताका च

प्रायोगिकम् (Practicum)

1. गद्यानां स्मारणम्।
2. प्रदत्तविषयानुसारेण भाषणम्।
3. वीडियोनिर्माणम्।
4. प्रश्नमञ्चः।
5. गद्यानां सपदकृत्यं व्याख्यानम्
6. प्रयुक्तालंकारसंकलनम्।

प्रवचनप्रक्रिया (Mode of Transaction)-

व्याख्यानात्मको विधिराश्रयणीयः। प्रतिवाक्यं पदपदार्थादयोवाच्याः। समासविग्रहोविधेयः। ग्रन्थसम्बद्धानि काव्यशास्त्रीयतत्त्वानि बोधनीयानि। गुरूपदेशादिप्रसङ्गे अन्येऽपि दृष्टान्ताः बोधनीयाः।

आकलनप्रक्रिया (Mode of Assessment)

1. गद्यानां व्याख्यानम्

2. प्रश्नमञ्चः
3. प्रदत्तविषयकं भाषणम्
4. प्रदत्तविषयकं लेखनम्
5. व्यवहारः
6. अधिगमसामर्थ्यम्, परियोजनाकार्यम्, प्रयोगकार्याणि च।

सन्दर्भग्रन्थाः (Reference Books)

1. बाणभट्टविरचिता कादम्बरी (शुकनासोपदेशः)-
2. संस्कृत साहित्य का समीक्षात्मक इतिहास, कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन,2007
3. संस्कृत साहित्य का इतिहास, डा ए.बी. कीथ ., डा . मंगलदेव शास्त्री, मोतीलाल बनारसीदास, दिल्ली,1967

साहित्यम् -7

3.1 दशरूपकपरिचयः शकुन्तलादुष्यन्तयोर्गान्धर्वविवाहश्च

सत्रार्द्धः - 3 **श्रेयोऽङ्कः- 4**

पाठ्यपरिचयः -

(दशरूपकम्, अभिज्ञानशाकुन्तलं च-1-3 अंकाः)

पाठ्यपरिचः– अत्र धनञ्जयरचितस्य दशरूपकस्य अनुसारेण दशानां रूपकाणां सामान्यलक्षणं प्रस्तुतम्। अभिज्ञानशाकुन्तलस्य प्रथमाङ्कम् आरभ्य तृतीयाङ्कम् यावद् ये अंशाः ते निर्धारिताः। एषां विषयाणाम् अवगमो भविष्यति।

अधिगमपरिणामाः (Learning Outcomes)

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः-

- दश रूपकाणि बोधुतुं समर्था भविष्यन्ति।
- पञ्च नाट्यसन्धीन् अवभोत्स्यन्ते।
- रूपकाणां परम्परां प्रतिपादयिष्यन्ति।
- अभिज्ञानशाकुन्तलस्य रामणीयकम् अनुभविष्यन्ति।
- कालिदासस्य नाट्यकौशलं परिचेष्यन्ति।
- अभिनयकलायां निपुणा भविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	दशरूपकपरिचयः शकुन्तलादुष्यन्तयोर्गान्धर्वविवाहश्च	40 hr	0	24 hr.	4

पाठ्यांशः (Unit) – 1

रूपकपरम्परा (1)

- दशरूपकाणां परिचयः
  (नाटकम्, प्रकरणम्, प्रहसनम्, भाणः, व्यायोगः, समवकारः, डिमः, वीथी, अङ्कः, ईहामृगः)
- रूपकाणां सामाजिकं प्राधान्यम्
- धनञ्जयस्य रूपकतत्त्वप्रतिपादनकौशलम्
- अभिज्ञानशाकुन्तलस्य वैशिष्ट्यम्

पाठ्यांशः (Unit) – 2

नाटकस्य वैशिष्ट्यम् (1)

- नाटकलक्षणम्
  पञ्च सन्धयः च
- नायकानां वैविध्यम्
- धीरोदात्तः नायकः
- नायिकानां वैविध्यम्
  नान्दीलक्षणं च

पाठ्यांशः (Unit) – 3

राज्ञः दुष्यन्तस्य आश्रमप्रवेशः (1)

- नान्दीपाठः प्रस्तावना च
- राज्ञः दुष्यन्तस्य आश्रमपदप्रवेशः
- कण्वाश्रमवर्णनम्
- तपस्विकन्यास्वभाववर्णनम्
- शकुन्तलया दुष्यन्तस्य दर्शनम्,

पाठ्यांशः (Unit) – 4

अन्योन्यम् अनुरक्तयोः दुष्यन्तशकुन्तलयोः मनोभावाः (1)

- मृगयाविनोदस्य स्थानम्
- दुष्यन्तेन कृतं शकुन्तलाया वर्णनम्
- दुष्यन्तमाढव्यसंवादः
- शकुन्तलायां मदनभावाः
  दुष्यन्त-शकुन्तलयोः समागमः

प्रायोगिकम् (Practicum)

1. प्रदत्तविषयानुसारेण लेखनम्
2. प्रदत्तविषयानुसारेण भाषणम्
3. प्रदत्तसंवादानुसारेणाभिनयः
4. यथाप्रसङ्गं विभावादीनाम् अनुसंधानम्
5. आडियो-वीडियोनिर्माणम्

प्रवचनप्रक्रिया (Mode of Transaction) -

व्याख्यानात्मकः प्रत्यक्षात्मकश्च विधिः आश्रयणीयः। दशरूपकस्य पङ्क्तयो विषयाश्च बोधनीयाः। अभिज्ञानशाकुन्तलस्य अध्यापने प्रतिपङ्कितः व्याख्येयम्, वाच्य-लक्ष्य-व्यङ्ग्यार्थाः प्रतिपादनीयाः काव्यशास्त्रीयविषया बोधनीयाः। कक्षायाम् छात्राध्यापकेषु नाट्यसंवादा अपि कारणीयाः।

आकलनप्रक्रिया (Mode of Assessment)

अधिगमसामर्थ्यम्, परियोजनाकार्यम्, प्रयोगकार्यं चाश्रित्याकलनं कार्यं।

सन्दर्भग्रन्थाः (Reference Books)

1. धनञ्जयविरचितं दशरूपकम्, भोलाशंकर व्यास, चाखम्भा, वाराणसी
2. अभिज्ञानशाकुन्तलम्, कालिदासः, राघवभट्टः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, 2016
3. संस्कृत साहित्य का समीक्षात्मक इतिहास, कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन,2000
4. संस्कृत साहित्य का इतिहास, आचार्य बलदेव उपाध्याय, शारदा निकेतन, वाराणसी, 2001
5. संस्कृत साहित्य का इतिहास, डा .ए.बी . कीथ, डा . मंगलदेव शास्त्री, मोतीलाल बनारसीदास, दिल्ली,1967

साहित्यम् -8

3.1 - शब्दशक्तिः (साहित्यदर्पणः-द्वितीयः परिच्छेदः)

सत्रार्द्धः – 3 **श्रेयोऽङ्कः - 4**

पाठ्यपरिचयः (About the course)

इह वाक्यलक्षणेन सह अभिधा-लक्षणा-व्यञ्जनारूपाः तिस्रः शब्दशक्तयः प्रतिपादिताः। शब्दशक्तीनाम् अवबोधो भविष्यति।

अधिगमपरिणामाः (Learning Outcomes)

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः-

- वाक्यस्य स्वरूपं भोत्स्यन्ते।
- अभिधाशक्तेः प्रतिपादने समर्था भविष्यन्ति।
- लक्षणाशक्तेः बोधने शक्ता भविष्यन्ति।
- व्यञ्जनाशक्तिं बोधयितुं शक्ष्यन्ति।
- अभिधानियामकान् अवगमिष्यन्ति।
- वाक्यशक्तेः तात्पर्यस्य निरूपणे समर्था भविष्यन्ति।
- प्रयुक्तेषु शब्दान्तरेषु शब्दशक्तीनां गवेषणायां कौशलम् अधिगमिष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	शब्दशक्तिः (साहित्यदर्पणः-द्वितीयः परिच्छेदः)	40 hr	0	24 hr.	4

पाठ्यांशः (Unit) -1

वाक्यादिस्वरूपम् (1)

- वाक्यलक्षणम्
- पदलक्षणम्
- अर्थत्रैविध्यम्
- अभिधालक्षणम्

पाठ्यांशः (Unit) – 2

लक्षणा तद्भेदाश्च (1)

- लक्षणावृत्तिः
- कर्मणि कुशलः
- लक्षणाभेदाः (व्यङ्ग्यस्य गूढागूढभेदपर्यन्ताः षोडश भेदाः)
- गौर्वाहीकः

पाठ्यांशः (Unit) – 3

व्यञ्जना तद्भेदाश्च (1)

- व्यञ्जना स्वरूपम्
- अभिधामूला व्यञ्जना
- लक्षणामूला व्यञ्जना
- शाब्दी व्यञ्जना
- आर्थी व्यञ्जना

पाठ्यांशः (Unit) - 4

संयोगादयः (1)

- संयोगः, विप्रयोगः, साहचर्यम्, विरोधिता
- अर्थः, प्रकरणम्, लिङ्गम्, अन्यस्य शब्दस्य सन्निधिः, सामर्थ्यम्
- औचिती, देशः, कालः, व्यक्तिः, स्वरादिः

प्रायोगिकम् (Practicum)

1. प्रदत्तविषयानुसारेण भाषणम्
2. प्रदत्तविषयानुसारेण आडियो-विडियो निर्माणम्
3. पठितोदाहरणानुसारेण शब्दान्तरेष्वपि शब्दशक्तेरनुसंधानम्
4. प्रश्नमञ्चः
5. अनेकार्थकशब्दानाम् अनुसंधानम्

प्रवचनप्रक्रिया (Mode of Transaction) -

व्याख्यानात्मको विधिराश्रयणीयः। प्रतिपदं प्रतिवाक्यं च व्याख्येम्। निगूढाः अर्थाः प्रकाशनीयाः। शब्दशक्तीनां संस्कृते भाषान्तरे च स्थितानि उदाहरणानि बोध्यानि। शब्दशक्ति ज्ञानस्य काव्यशास्त्रीया उपयोगिता वक्तव्या।

आकलनप्रक्रिया (Mode of Assessment)-

अधिगमसामर्थ्यम्, परियोजनाकार्यम्, प्रयोगकार्यं चाश्रित्याकलनं कार्यं।

सन्दर्भग्रन्थाः (Reference Books)

- साहित्यदर्पणः (द्वितीयपरिच्छेदः) आचार्यलोकमणिदहालः, चौखम्बासुरभारती- प्रकाशनम्, वाराणसी, 2008
- साहित्यदर्पणः,लक्ष्मीटीका
- साहित्यदर्पणः शालिग्रामशास्त्री, मोतीलाल बनारसी दास
- काव्यप्रकाशः, मम्मटः, भट्टवामनाचार्यः, (झलकीकरः), परिमल- पब्लिकेशनम्, दिल्ली, 2008
- रसगंगाधरः, पं.जगन्नाथः, पं.बदरीनाथझा, चौखम्बा विद्याभवन, वाराणसी, 2016

साहित्यम् -9

3.1 शकुन्तलादुष्यन्तयोः पुनः समागमः

सत्रार्द्धः - 4 **श्रेयोऽङ्कः – 4**

पाठ्यपरिचयः (About the course)-

(अभिज्ञानशाकुन्तलम्- 4-7 अङ्काः)

इह अभिज्ञानशाकुन्तलस्य चतुर्थमङ्कम् आरभ्य सप्तमं यावद् विषयो निर्धारितः, यत्र दुर्वाससः शापेन दुष्यन्तस्य विस्मृत्या शकुन्तलाया विरहः,मारीचाश्रमे पुनः समागमश्च मुख्यरूपेण वर्णितः।

अधिगमपरिणामाः (Learning Outcomes)

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः-

- अभिज्ञानशाकुन्तलस्य निर्धारितान् अंशान् अवभोत्स्यते।
- पर्यावरणं प्रति जागरूकता
- पुत्रीवात्सल्यस्यानुभवः
- राजकर्तव्यस्यावगतिः।
- कालिदासरचनारीतेर्ज्ञानम्
- नाट्यरचनायां प्रवृत्तिः

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	शकुन्तलादुष्यन्तयोः पुनः समागमः	40 hr	0	24 hr.	4

पाठ्यांशः (Unit) - 1

शकुन्तलायाः पतिगृहगमनम् (1)

- शकुन्तलायाः पतिगृहगमननिर्णयः
- कण्वस्य वात्सल्यम्
- आश्रमवासिनां विह्वलता
- कण्वोपदेशः
- शकुन्तलायाः सुप्रस्थानम्

पाठ्यांशः (Unit) - 2

विवाहविस्मृतिवृत्तान्तः (1)

- जननान्तरसौहृदम्
- परोपकारिस्वभावः
- वैरीभवति सौहृदम्
- प्रभुतायाः क्लेशः

पाठ्यांशः (Unit) - 3

अभिज्ञानवृत्तान्तः (1)

- धीवरस्योपदेशः व्रीडाविलक्षं गोत्रस्खालित्यं च
- मनसिजेन दुष्यन्ते शरस्य प्रहारः
- चित्रीकृता कान्ता
- वसुन्धरा महते फलाय, जनानां महिम्नः प्रतिपत्तिः च

पाठ्यांशः (Unit) - 4

दुष्यन्तशकुन्तलयोः समागमः (1)

- सत्क्रियागुणगणनम्
- राजमातलिसंवादः धर्माभिषेकक्रिया च
- मारीचाश्रमवर्णनम्
- शकुन्तलाया नियतैकपतिव्रतत्वम्

प्रायोगिकम् (Practicum)

1. रस-भावान्वेषणम्
2. प्रदत्तविषयानुसारेण व्याख्यानम्
3. प्रदत्तसंवादस्याभिनयः
4. प्रदत्तविषयान्तरानुसारेण संवादलेखनम्
5. प्रश्नमञ्चः

प्रवचनप्रक्रिया (Mode of Transaction) -

व्याख्यानात्मको विधिराश्रयणीयः। श्लोकव्याख्याने खण्डान्वय-दण्डान्वय रीतिराश्रयणीयाः। व्यङ्ग्यार्थाः प्रतिपादनीयाः निहिता उपदेशा बोधनीयाः। नाट्यसंवादः कारणीयः।

आकलनप्रक्रिया (Mode of Assessment)

अधिगमसामर्थ्यम्, परियोजनाकार्यम्, प्रयोगकार्यं चाश्रित्याकलनं कार्यं।

प्रदत्तविषयानुसारेण

सन्दर्भग्रन्थाः (Reference Books)

- अभिज्ञानशाकुन्तलम्, कालिदासः, राघवभट्टः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, 2016
- कालिदासग्रन्थावली, कालिदास, ब्रह्मानन्दत्रिपाठी, पण्डित रामतेजशास्त्री, चौखम्बासुरभारती प्रकाशन, वाराणसी, 2019
- संस्कृतसाहित्य का इतिहास, उमाशंकर शर्मा ऋषि, चौखम्भा भारती अकादमी, वाराणसी-2001
- संस्कृतसाहित्य का इतिहास, बलदेव उपाध्याय वाराणसी

साहित्यम् -10

3.1 अलङ्काराः (जयदेवमतानुसारेण)

सत्रार्द्धः- 4 **श्रेयोऽङ्कः-4**

पाठ्यपरिचयः- (About the course)-

पीयूषवर्षजयदेवोऽलंकारशास्त्रस्य मूर्धन्य आचार्यः। अस्य चन्द्रालोकः प्रसिद्धोऽलंकारग्रन्थः। अस्य पञ्चमो मयूखोऽत्र अध्ययनाय निर्धारितः. यत्रार्थालंकारा निरूपिताः। अलंकाराविशेषाणामवबोधनम् अस्य पाठ्यक्रमस्य प्रमुखं प्रयोजनम्।

अधिगमपरिणामाः (Learning Outcomes) -

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः-

- निर्दिष्टानाम् अलङ्काराणां परिचयं प्राप्स्यन्ति।
- विभिन्नप्रतियोगितासु निर्दिष्टपाठ्यक्रमे एतान् अलङ्कारान् प्रत्यभिज्ञास्यन्ति।
- काव्येषु एतान् अलङ्कारान् समीक्षितुं शक्ष्यन्ति।
- अलंकृतवाक्यप्रयोगे समर्था भविष्यन्ति

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	अलङ्काराः (जयदेवमतानुसारेण)	40 hr	0	24 hr.	4

पाठ्यांशः (Unit) - 1

अलङ्कारसामान्यपरिचयः (1)

- काव्ये अलङ्काराणां स्थानम्
- जयदेवस्य परिचयः
- अलङ्कारलक्षणम्
- शब्दालङ्कारः अर्थालङ्कारश्च

पाठ्यांशः (Unit) - 2

अलङ्काराः - १ (1)

- अनुप्रासः, अनुप्रासभेदाः
- यमकम्, उपमा, रूपकम्, परिणामः
- उल्लेखः, अपह्नुतिः, उत्प्रेक्षा,
- अनुमानम्, भ्रान्तिमान्, सन्देहः

पाठ्यांशः (Unit) - 3

अलङ्काराः - २ (1)

- काव्यलिङ्गम्, तुल्ययोगिता, परिकरः,
- दीपकम्, प्रतिवस्तूपमा, दृष्टान्तः,
- निदर्शना, व्यतिरेकः, समासोक्तिः,
- भङ्गश्लेषः, अप्रस्तुतप्रशंसा, अर्थान्तरन्यासः

पाठ्यांशः (Unit) - 4

अलङ्काराः -३ (1)

- व्याजस्तुतिः, विरोधः, विभावना
- विशेषोक्तिः, सारः, परिवृत्तिः
- परिसङ्ख्या, समुच्चयः, तद्गुणः
- व्याजोक्तिः, वक्रोक्तिः, स्वभावोक्तिः

प्रायोगिकम् (Practicum)-

- अलंकारलक्षणस्य कण्ठस्थीकरणरम्
- प्रदत्तश्लोकेषु अलंकारस्य गवेषणम्
- अलंकारविशेषयुक्तस्य वाक्यस्य प्रयोगः
- प्रदत्तालंकारस्य सलक्षणं सोदाहरणं च वाचिकं प्रतिपादनम्
- अलंकारप्रतिपादककारिकाणां व्याख्यनम्

प्रवचनप्रक्रिया (Mode of Transaction)-

व्याख्यानात्मिका पद्धतिः आश्रयणीया। कारिकावाक्यं सपदकृत्यं व्याख्येयम्। भाषान्तरेऽपि लभ्यमानानि संबद्धालंकारवाक्यानि प्रबोधनीयानि। पीपीटी-द्वाराऽपि सम्बद्धालंकारविषयाः प्रदर्शनीयाः।

आकलनप्रक्रिया (Mode of Assessment)-

- भाषाशुद्धिः
- अभिव्यक्तिकौशलम्।
- व्यवहारः।
- प्रश्नमञ्चः।
- नियमितता।
- अधिगमसामर्थ्यम्, परियोजनाकार्याणि, प्रयोगकार्याणि च।

सन्दर्भग्रन्थाः (Reference Books)

- चन्द्रालोकः (पञ्चममयूखः) व्या. डा. श्रीकृष्णमणि त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, के. 37/117 गोपालमन्दिर लेन पो.बा.नं. 1129, वाराणसी- 2016
- भारतीय काव्यशास्त्र के प्रतिनिधि सिद्धान्त, डा. राजवंश सहाय हीरा, चौखम्बा विद्याभवन, वाराणसी 1967
- साहित्यदर्पण विश्वनाथः, आचार्यलोकमणिदहालः,चौखम्बासुरभारती,प्रकाशनम् - वाराणसी, 2008

साहित्यम् -11

3.1 भारतीयकाव्यशास्त्रे रसो नायकश्च (साहित्यदर्पणः- तृतीयः परिच्छेदः)

सत्रार्द्धः - 4 **श्रेयोऽङ्कः - 4**

पाठ्यपरिचयः (About the course)-

रसः काव्यस्यात्मा भवति। रसस्य निष्पत्तिः नायकादिरूपेण विभावेन भवति। अत इह भारतीयकाव्यशास्त्रानुसारेण रसो नायकश्च प्रतिपादितः। रसस्वरूपस्य नायकस्वरूपस्य चावबोधो भविष्यति।

अधिगमपरिणामाः (Learning Outcomes)

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः-

- वेद-साहित्यशास्त्रयोः आलोके रसपदार्थं व्याख्यातुं प्रभविष्यन्ति।
- रससूत्रव्याख्याने कौशलं प्राप्स्यन्ति।
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	गोलपरिभाषा	40 hr	0	24 hr.	4

पाठ्यांशाः (Units) :-

पाठ्यांशः(Unit)- 1. गोललक्षणादिकथनम्

- गोललक्षणम्
- महद्वृत्तलघुवृत्तपरिभाषा
- गर्भकेन्द्रगोलकेन्द्र-पृष्ठकेन्द्रपरिभाषाः
- भूगोलस्वरूपम्
- स्वस्थान-खस्वस्तिक-ध्रुवस्थानपरिचयः।

पाठ्यांशः(Unit)-2. याम्योत्तरवृत्तादीनां परिभाषाः

- याम्योत्तर-क्षितिज-समस्थान-पूर्वापर-कोणवृत्त-नाडीवृत्त-परिभाषाः
- निरक्षदेश-रेखावृत्त-रेखादेश-उन्मण्डल-कदम्बवृत्त-क्रान्तिवृत्त-गोलसन्धि-अयनवृत्तपरिभाषाः

पाठ्यांशः(Unit)-03. विमण्डलादीनां परिभाषाः

- विमण्डल-दृङ्मण्डल-उन्नतांश-शङ्कु-दृग्ज्या-दिगंशपरिभाषाः
- लग्नादिस्वरूपम्
- दृक्षेपदृग्गती
- अग्रा-क्रान्त्यक्षांशलम्बांश-ग्रहस्थान-शरपरिभाषाः

पाठ्यांशः(Unit)- 04. उपवृत्तादीनां परिभाषाः

- उपवृत्त-भुज-कोटिपरिभाषाः
- चर-उदयमान-दृग्लम्बन-स्फुटलम्बन-नतिपरिभाषाः
- हृति-तद्धृति-इष्टहृति-अन्त्या-परिभाषाः
- वृत्त-चाप-ज्या-कुज्या-स्पर्श-कोटिस्पर्श-छेदन-कोटिच्छेदनरेखापरिभाषाः।

प्रायोगिकम् (Practicum) :-

1. गोलयन्त्रस्य निर्माणम्।
2. निर्मिते गोलयन्त्रे क्रान्ति-नाडी-अहोरात्र-पूर्वापरादीनां वृत्तानां प्रदर्शनम्

सन्दर्भग्रन्थाः (Reference Books)

1. गोलपरिभाषा (पं.सीतारामझाकृता), चौखम्बा संस्कृत संस्थान, वाराणसी
2. गोलपरिभाषा (आचार्यहंसधरझाकृता), जगदीश संस्कृत पुस्तकालय, जयपुर - 2007

ज्योतिषम् -9

3.1 आयुर्दायः दशाविचारश्च

सत्रार्द्धः- 4 **श्रेयोऽङ्कः- 4**

पाठ्यक्रमस्य परिचयः (Introduction of the course) :-

- अस्मिन् पाठ्यांशे होराशास्त्रे आयुर्दायस्य गणनाक्रमस्य अध्यापनं भविष्यति।

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

- जैमिनीयमतमवलम्ब्य होरालग्नादीनां वैशिष्ट्यज्ञानम्।
- आयुर्दाये जैमिनीयमतस्य अध्ययनम्।
- नक्षत्रदशापेक्षया (विंशोत्तरीदशापेक्षया) आयुर्दायदशायाः विशेषतायाः अवगमनम्।
- दशाफलनिरूपणम्।

अधिगमस्य परिणामाः (Learning Outcomes) :-

अस्याध्ययनेन छात्रः होरालग्नादीन् साधयितुं तद्द्वारा फलानि निरूपयितुं तथा जातकं दृष्ट्वा स्वल्प-मध्य-दीर्घायुर्भेदान् गणयितुं समर्थः भवति। आयुर्दायदशायां यस्य ग्रहस्य आयुर्दायगणितेन यावत् आयुः प्राप्तं तावदेव तस्य दशावर्षाणि भवन्ति, तत्र लग्नरविचन्द्रेषु बलिष्ठस्य एव आदिमदशा भवति, ततः तत्केन्द्रादिस्थितानां ग्रहाणां बलाबलवशतः दशाः भवन्ति इत्यादिविषयान् प्रतिपादयितुं सक्षमः भवति। अस्य विस्तृतम् अध्ययनम् आचार्यस्तरे भविष्यति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	आयुर्दायः दशाविचारश्च	40 hr	0	24 hr.	4

पाठ्यांशाः (Units) :-

पाठ्यांशः(Unit)-1 होरालग्नादिसाधनम्, जैमिनीयायुर्दायश्च

पाठ्यांशः(Unit)– 2 बृहज्जातकोक्तायुर्दायस्वरूपम्

पाठ्यांशः(Unit) – 3 आयुर्दायदशानिर्णयः

पाठ्यांशः(Unit)- 4 दशाफलानि

प्रायोगिकम् (Practicum) :-

(अधोलिखितानां प्रायोगिकमध्ययनं/गोलरचना/फलक/स्फोरकपत्रनिर्माणं/वृक्षरचना/रेखाचित्रं /PPT/लघुचलच्चित्र (Audio Visual Content)/यन्त्रप्रारूपादीनि रचनीयानि/ जन्मकुण्डलीनां सङ्ग्रहः कर्तव्यः विश्लेषणं च कर्तव्यम्।)

- निर्दिष्टपलभामाध्यमेन अभीष्टकालस्य लग्नसाधनम्
- कल्पितइष्टकालानुरोधेन कुण्डलीनिर्माणम् आयुसाधनञ्च
- अभीष्टजन्माङ्गचक्रनिर्माणं तत्र दशासाधनञ्च

प्रवचनप्रक्रिया (Mode of Transaction) :-

- पाठ्यांशानां सरलमानकसंस्कृतमाध्यमेन ग्रन्थदिशा प्रत्यक्षपद्धत्या कक्षाध्यापनम्।
- पाठ्यांशानां फलक/स्फोरकपत्र/वृक्षरचना/विविधरेखाचित्रमाध्यमेन च प्रत्यक्षशिक्षणम्।
- पाठ्यांशानामाधुनिकपाठ्योपकरण (PPT/लघुचलच्चित्र/दृश्यश्रव्योपकरण) माध्यमेन च प्रत्यक्षशिक्षणम्।
- पाठ्यांशानाम् आगमन-निगमन-विश्लेषणविधिना पाठनम् ।
- पाठ्यांशानां पञ्चाङ्गप्रयोगेन गोलप्रदर्शनपूर्वकं च पाठनम्।

आकलनप्रक्रिया (Mode of Assessment)

- सत्रान्तपरीक्षाद्वारा मूल्याङ्कनम् – 60
- सततमूल्याङ्कनम्/प्रायोगिकम् (PRACTICUM) - 40

सन्दर्भग्रन्थाः (Reference Books)

1. जैमिनिसूत्रम्, सीतारामझा, चौखम्भा विद्याभवन, वाराणसी
2. बृहज्जातकम्, वराहमिरिरचिता, चौखम्भा संस्कृत सीरीज ऑफिस, वाराणसी - 1957
3. फलदीपिका, मन्त्रेश्वररचिता, प्रो. सर्वनारायणझा, इ-संस्करण, राष्ट्रियसंस्कृतसंस्थानम्, लखनऊपरिसरः- 2004
4. सारावली, कल्याणवर्मा, मोतीलाल बनारसीदास, वाराणसी, 2000
5. जातकपारिजातः, कपिलेश्वरशास्त्री, चौखम्भा संस्कृत संस्थान, वाराणसी, संवत् 2036

ज्योतिषम् -10

3.1 आजीविकाविचारः, बहुविधयोगाः-2

सत्रार्द्धः- 4 **श्रेयोऽङ्कः- 4**

पाठ्यक्रमस्य परिचयः (Introduction of the course) :-

- पत्रेऽस्मिन् ज्योतिषशास्त्रगत-आजीविकाविचारस्य मूलभूतसिद्धान्तानामध्यापनं भविष्यति तथा बहुविधयोगानां शास्त्रोक्तविधिना विवेचनं प्रायोगिमध्ययनञ्च भविष्यति।

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

- मनुष्यः केन कर्मणा जीवनं निर्वहति, कथं वा धनं प्राप्नोति इत्यस्य अध्ययनम् ।
- राजत्वप्राप्तिकराणां योगानां (आधिकारिकयोगानां) अवबोधनम् ।
- महापुरुषयोगानाम् अवगमनम् ।
- योगेषु नाभसयोगानां वैशिष्ट्यस्य निरूपणम् ।

अधिगमस्य परिणामाः (Learning Outcomes): -

अस्याध्ययनेन छात्रः जन्मकुण्डलीं दृष्ट्वा वृत्तिचिन्तनं कर्तुं समर्थः भवति। राजकीयक्षेत्रे प्राशासनिकक्षेत्रे वा कस्य अधिकारः भवति इति निरूपयितुं कुशलः भवति । अवशिष्टानां सर्वेषां यगानां फलं तत्तद्दशासु भवति चेदपि नाभसयोगानां फलं सर्वदा अनुभूयते इति प्रायोगिकरूपेण प्रतिपादयितुं सशक्तः भवति ।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	आजीविकाविचारः, बहुविधयोगाः-2	40 hr	0	24 hr.	4

पाठ्यांशाः (Units): -

पाठ्यांशः(Unit) -1 आजीविकाविचारः

पाठ्यांशः(Unit) -2 राजयोगाः

पाठ्यांशः(Unit) -3 पञ्चमहापुरुषयोगादयः प्रमुखाः योगविशेषाः

पाठ्यांशः(Unit) -4 नाभसयोगाः (कुण्डलीविन्यासपूर्वकं समेषां योगानां घटनाऽघटनयोः चिन्तनम्)

प्रायोगिकम् (Practicum) :-

(अधोलिखितानां प्रायोगिकमध्ययनं/गोलरचना/फलक/स्फोरकपत्रनिर्माणं/वृक्षरचना/रेखाचित्रं /PPT/लघुचलच्चित्र (Audio Visual Content)/यन्त्रप्रारूपादीनि रचनीयानि/जन्म- कुण्डलीनां सङ्ग्रहः कर्तव्यः विश्लेषणं च कर्तव्यम्।)

- बहुविधाजीविकायोगानां चिन्तनम्
- जातकपरिशीलनम्
- राजकीयव्यक्तीनां कुण्डलीसङ्ग्रहद्वारा राजयोगानां परिशीलनम्

प्रवचनप्रक्रिया (Mode of Transaction) :-

- पाठ्यांशानां सरलमानकसंस्कृतमाध्यमेन ग्रन्थदिशा प्रत्यक्षपद्धत्या कक्षाध्यापनम्।
- पाठ्यांशानां फलक/स्फोरकपत्र/वृक्षरचना/विविधरेखाचित्रमाध्यमेन च प्रत्यक्षशिक्षणम्।
- पाठ्यांशानामाधुनिकपाठ्योपकरण (PPT/लघुचलच्चित्र/दृश्यश्रव्योपकरण) माध्यमेन च प्रत्यक्षशिक्षणम्।
- पाठ्यांशानाम् आगमन-निगमन-विश्लेषणविधिना पाठनम् ।
- पाठ्यांशानां पञ्चाङ्गप्रयोगेन गोलप्रदर्शनपूर्वकं च पाठनम्।

आकलनप्रक्रिया (Mode of Assessment)

- सत्रान्तपरीक्षाद्वारा मूल्याङ्कनम् – 60
- सततमूल्याङ्कनम्/प्रायोगिकम् (PRACTICUM) - 40

सन्दर्भग्रन्थाः (Reference Books)

1. बृहज्जातकम्, वराहमिरिरचिता, चौखम्भा संस्कृत सीरीज ऑफिस, वाराणसी - 1957
2. जातकपारिजातः, कपिलेश्वरशास्त्री, चौखम्भा संस्कृत संस्थान, वाराणसी, संवत् 2036
3. फलदीपिका, मन्त्रेश्वररचिता, प्रो. सर्वनारायणझा, इ-संस्करण, राष्ट्रियसंस्कृतसंस्थानम्, लखनऊपरिसरः- 2004
4. सारावली, कल्याणवर्मा, मोतीलाल बनारसीदास, वाराणसी, 2000

ज्योतिषम् -11

3.1 प्रारम्भिकं व्यक्तगणितम्

सत्रार्द्धः- 4 **श्रेयोऽङ्कः- 4**

पाठ्यक्रमस्य परिचयः (Introduction of the course) :-

- पत्रेऽस्मिन् व्यक्तराशिसम्बद्धगणितविषये अध्यापनं भविष्यति।

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

- काल-भारप्रभृतिविषयक-भारतीय-प्राचीनपरिभाषाज्ञानम्।
- संख्यानां स्थानज्ञानम्।
- सङ्कलन-व्यवकलन-गुणन-भजनविधीनां सोदाहरणं ज्ञानम्।
- वर्ग-वर्गमूल-घन-घनमूलगणितानां सोदाहरणं ज्ञानम्।
- मिश्रकर्मगणितस्य, इष्टकर्मगणितस्य, सङ्क्रमणगणितस्य तथा त्रैराशिकगणितस्य उदाहरणसहितम् अध्ययनम्।

अधिगमस्य परिणामाः (Learning Outcomes):

अस्य पत्रस्य अध्ययनेन छात्रः सङ्कलनव्यवकलनादिकरणे प्रवीणः भविष्यत्येव विशिष्य वर्ग-वर्गमूल-घन-घनमूलादिविशिष्टगणितेषु अपि प्रावीण्यं प्राप्स्यति। तथा च पाठान्ते मिश्रकर्मादिगणितम्, त्रैराशिगणितं च सर्वमपि ज्ञानवर्धकं भवति। तत्रापि विशिष्य त्रैराशिकगणितज्ञानस्य तु यथा लोके उपयोगः भविष्यति तथैव ग्रहगणितेऽपि भूरिशः प्रयोगं छात्रः करिष्यति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	प्रारम्भिकं व्यक्तगणितम्	40 hr	0	24 hr.	4

पाठ्यांशाः (Units) :-

पाठ्यांशः(Unit) -1 मानपरिभाषा, संख्यास्थानानि , सङ्कलनव्यवकलने, गुणनभजने च (सोदाहरणम् अभ्यासः)

पाठ्यांशः(Unit) -2 वर्गः वर्गमूलं घनः घनमूलं च (सोदाहरणम् अभ्यासः)

पाठ्यांशः(Unit) -3 भिन्नपरिकर्माष्टकम् (सोदाहरणम् अभ्यासः)

पाठ्यांशः(Unit) - 4 त्रैराशिकम् (सोदाहरणम् अभ्यासः)

प्रायोगिकम् (Practicum) :-

(अधोलिखितानां प्रायोगिकमध्ययनं/गोलरचना/फलक/स्फोरकपत्रनिर्माणं/वृक्षरचना/रेखाचित्रं /PPT/लघुचलच्चित्र (Audio Visual Content)/ यन्त्रप्रारूपादीनि रचनीयानि/ जन्मकुण्डलीनां सङ्ग्रहः कर्तव्यः विश्लेषणं च कर्तव्यम्।)

- बहुभिः प्रकारैः गुणनस्य भजनस्य च अभ्यासकरणम् ।
- वर्ग-वर्गमूल-घन-घनमूलगणितानां प्रायोगकरणम्।
- लीलावतीम् अन्तरा अन्येषु ग्रन्थेषु वर्णितानां व्यक्तगणितानां प्रायोगिकम् (Practicum) अध्ययनम् ।

प्रवचनप्रक्रिया (Mode of Transaction) :-

- पाठ्यांशानां सरलमानकसंस्कृतमाध्यमेन ग्रन्थदिशा प्रत्यक्षपद्धत्या कक्षाध्यापनम्।
- पाठ्यांशानां फलक/स्फोरकपत्र/वृक्षरचना/विविधरेखाचित्रमाध्यमेन च प्रत्यक्षशिक्षणम्।
- पाठ्यांशानामाधुनिकपाठ्योपकरण(PPT/लघुचलच्चित्र/दृश्यश्रव्योपकरण)माध्यमेन च प्रत्यक्षशिक्षणम्।
- पाठ्यांशानाम् आगमन-निगमन-विश्लेषणविधिना पाठनम् ।
- पाठ्यांशानां पञ्चाङ्गप्रयोगेन गोलप्रदर्शनपूर्वकं च पाठनम्।

आकलनप्रक्रिया (Mode of Assessment)

- सत्रान्तपरीक्षाद्वारा मूल्याङ्कनम् – 60
- सततमूल्याङ्कनम्/प्रायोगिकम् (PRACTICUM) – 40

सन्दर्भग्रन्थाः (Reference Books)

1. **लीलावती** (भास्कराचार्यविरचिता), आनन्दाश्रममुद्रालयः, 1937
2. लीलावती, पं.सीतारामझा, मास्टर खेलाडीलाल एण्ड सन्स, वाराणसी, संवत् 2013
3. आर्यभटीयम्, सुरकान्तझा, चौखम्बा कृष्णदास अकादमी, वाराणसी
4. ब्राह्मस्फुटसिद्धान्तः, ब्रह्मगुप्त, इंडियन इंस्टीट्यूट ऑफ एस्ट्रोनोमिकल एण्ड संस्कृत रिसर्च, नई दिल्ली-1966

ज्योतिषम् -12

3.1 बहुविधयोगाः- 3, ऋक्षशीलादिविचाराश्च

सत्रार्द्धः- 5 **श्रेयोऽङ्कः- 4**

पाठ्यक्रमस्य परिचयः (Introduction of the course) :-

- पत्रेऽस्मिन् रव्यादीनां ग्रहाणां मध्ये यथासम्भवं द्वित्राणां योगस्य फलानाम् अध्ययनं भविष्यति।

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives):

- ग्रहयुतिवशात् शुभाऽशुभफलज्ञानम्।
- ग्रहाणां प्रव्रज्याकारकत्वस्य अध्ययनम्।
- अश्विन्यादिनक्षत्रोत्पन्नानां मेषादिराशिजानां च फलचिन्तनम्।
- रविकुजादिग्रहेषु मेषादिषु राशिषु सत्सु शुभाशुभफलनिरूपणम् ।

अधिगमस्य परिणामाः (Learning Outcomes) :–

अस्याध्ययनेन छात्रः कुण्डल्यां रव्यादिषु द्व्यादिषु ग्रहेषु एकराशिस्थेषु कानि फलानि भवन्तीति प्रतिपादने कुशलः भवति। कीदृश्यां ग्रहस्थित्यां सत्यां जातः प्रव्रज्यामाप्नोति इति निरूपणे सामर्थ्यं प्राप्नोति। राजयोगे जातानामपि प्रव्रज्याकारकयोगविशेषं सूचयतुं समर्थो भवति। जन्मनक्षत्रवशात् जन्मराशिवशात् च मनुष्यस्य स्वरूपं लक्षणानि च कथयितुं पटुत्वं प्राप्नोति। रविकुजादयः तत्तद्राशिस्थित्या कीदृशेन फलेन सह मनुष्यं संयोजयन्तीति वक्तुं समर्थः भवति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	बहुविधयोगाः- 3, ऋक्षशीलादिविचाराश्च	40 hr	0	24 hr.	4

पाठ्यांशाः (Units) :-

पाठ्यांशः(Unit) -1 द्विग्रहयोगाः

पाठ्यांशः(Unit) -2 प्रव्रज्यायोगाः

पाठ्यांशः(Unit) -3 ऋक्षशील-चन्द्रराशिशीलाध्यायौ

पाठ्यांशः(Unit)- 4 राशिशीलविचाराः

प्रायोगिकम् (Practicum) :-

(अधोलिखितानां प्रायोगिकमध्ययनं/गोलरचना/फलक/स्फोरकपत्रनिर्माणं/वृक्षरचना/रेखाचित्रं /PPT/लघुचलच्चित्र (Audio Visual Content)/यन्त्रप्रारूपादीनि रचनीयानि।)

- बृहज्जातकस्य द्विग्रहयोगाध्यायस्य समीक्षा
- साम्प्रतिके काले प्रव्रज्यायोगस्य समीक्षात्मकम् अध्ययनम्

प्रवचनप्रक्रिया (Mode of Transaction) :-

- पाठ्यांशानां सरलमानकसंस्कृतमाध्यमेन ग्रन्थदिशा प्रत्यक्षपद्धत्या कक्षाध्यापनम्।
- पाठ्यांशानां फलक/स्फोरकपत्र/वृक्षरचना/विविधरेखाचित्रमाध्यमेन च प्रत्यक्षशिक्षणम्।
- पाठ्यांशानामाधुनिकपाठ्योपकरण(PPT/लघुचलच्चित्र/दृश्यश्रव्योपकरण)माध्यमेन च प्रत्यक्षशिक्षणम्।
- पाठ्यांशानाम् आगमन-निगमन-विश्लेषणविधिना पाठनम् ।
- पाठ्यांशानां पञ्चाङ्गप्रयोगेन गोलप्रदर्शनपूर्वकं च पाठनम्।

आकलनप्रक्रिया (Mode of Assessment)

- सत्रान्तपरीक्षाद्वारा मूल्याङ्कनम् – 60
- सततमूल्याङ्कनम्/प्रायोगिकम् (PRACTICUM) - 40

सन्दर्भग्रन्थाः (Reference Books)

1. बृहज्जातकम्, वराहमिरिरचिता, चौखम्भा संस्कृत सीरीज ऑफिस, वाराणसी - 1957
2. जातकपारिजातः, कपिलेश्वरशास्त्री, चौखम्भा संस्कृत संस्थान, वाराणसी, संवत् 2036
3. फलदीपिका, मन्त्रेश्वररचिता, प्रो. सर्वनारायणझा, इ-संस्करण, राष्ट्रियसंस्कृतसंस्थानम्, लखनऊपरिसरः- 2004
4. सारावली, कल्याणवर्मा, मोतीलाल बनारसीदास, वाराणसी, 2000

ज्योतिषम् -13

3.1 प्रारम्भिकम् अव्यक्तगणितम्

सत्रार्द्धः- 5 **श्रेयोऽङ्कः- 4**

पाठ्यक्रमस्य परिचयः (Introduction of the course) :-

- अस्मिन् पाठ्यांशे अव्यक्तगणितस्य महत्त्वस्य उपयोगितायाश्च विवेचनं वर्त्तते।

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

- सङ्कलन-व्यकलनादि-धनर्णषड्विधगणितस्य ससूत्रमध्ययनम् ।
- अनेकवर्णषड्विधगणितस्य सोदाहरणम् अध्ययनम्।
- करणीषड्विधगणितस्य विस्तृतमध्ययनम्।

अधिगमस्य परिणामाः (Learning Outcomes):

अस्य पाठस्य अध्ययनेन संकलन-व्यकलन-गुणन-भजन-वर्ग-वर्गमूलादि-अव्यक्त-गणिते तु प्रावीण्यं भविष्यत्येव करणीगणितेऽपि पाटवम् आगमिष्यति। अवर्गाङ्कानां (येषाम् अङ्कानां वर्गमूलं न भवति तेषामङ्कानामपि) संकलन-व्यवकलन-गुणन-भजन-वर्ग-वर्गमूलगणितं करणीषड्विधगणितमिति कथ्यते। एतदध्ययनेन अवर्गाङ्कानां योग-वियोग-गुणन-भजनादिषु छात्रः पटुः भविष्यति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	प्रारम्भिकम् अव्यक्तगणितम्	40 hr	0	24 hr.	4

पाठ्यांशाः (Units) :-

पाठ्यांशः(Unit) – 1 अव्यक्तपरिभाषा, धनर्णषड्विधं च (सोदाहरणम् अभ्यासः)

पाठ्यांशः(Unit) - 2 खसङ्कलनादि, अनन्तपरिभाषा, अव्यक्तषड्विधं च (सोदाहरणम् अभ्यासः)

पाठ्यांशः(Unit) - 3 अनेकवर्णषड्विधम् , करणीस्वरूपम्, करण्याःसङ्कलनव्यवकलनगुणनानि च (सोदाहरणम् अभ्यासः)

पाठ्यांशः(Unit)– 4 करण्याः भजनवर्गवर्गमूलानि (सोदाहरणम् अभ्यासः)

प्रायोगिकम् (Practicum) :-

(अधोलिखितानां प्रायोगिकमध्ययनं/गोलरचना/फलक/स्फोरकपत्रनिर्माणं/वृक्षरचना/रेखाचित्रं /PPT/लघुचलच्चित्र (Audio Visual Content)/यन्त्रप्रारूपादीनि रचनीयानि/जन्म- कुण्डलीनां सङ्ग्रहः कर्तव्यः विश्लेषणं च कर्तव्यम्।)

- अव्यक्तगणितीयतत्त्वानां व्यक्तगणितेन सह तुलना
- भास्करीयबीजगणितेन सह अन्येषां बीजग्रन्थानां तुलनात्मकम् अध्ययनम्
- पाश्चात्त्यग्रन्थेषु उपलभ्यमानानां बीजतत्त्वानां पारम्परिकग्रन्थैः सह विमर्शः

प्रवचनप्रक्रिया (Mode of Transaction) :-

- पाठ्यांशानां सरलमानकसंस्कृतमाध्यमेन ग्रन्थदिशा प्रत्यक्षपद्धत्त्या कक्षाध्यापनम्।
- पाठ्यांशानां फलक/स्फोरकपत्र/वृक्षरचना/विविधरेखाचित्रमाध्यमेन च प्रत्यक्षशिक्षणम्।
- पाठ्यांशानामाधुनिकपाठ्योपकरण(PPT/लघुचलच्चित्र/दृश्यश्रव्योपकरण)माध्यमेन च प्रत्यक्षशिक्षणम्।
- पाठ्यांशानाम् आगमन-निगमन-विश्लेषणविधिना पाठनम् ।
- पाठ्यांशानां पञ्चाङ्गप्रयोगेन गोलप्रदर्शनपूर्वकं च पाठनम्।

आकलनप्रक्रिया (Mode of Assessment)

- सत्रान्तपरीक्षाद्वारा मूल्याङ्कनम् – 60
- सततमूल्याङ्कनम्/प्रायोगिकम् (PRACTICUM) - 40

सन्दर्भग्रन्थाः (Reference Books)

1. **बीजगणितम्** (भास्कराचार्यविरचितम्), चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी – 1949
2. गणितकौमुदी, नारायणपण्डितकृता, गवर्मेन्ट प्रिन्टिंग, इलाहाबाद, 1936

ज्योतिषम् -14

3.1 दृष्टिफलचिन्तनम्

सत्रार्द्धः- 5 **श्रेयोऽङ्कः- 4**

पाठ्यक्रमस्य परिचयः (Introduction of the course) :-

- अस्मिन् पाठ्यांशे ग्रहाणां दृष्टिवशेन फलानाम् अनुशीलनं वर्त्तते।

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

- ग्रहदृष्टिवशात् शुभाऽशुभफलज्ञानम् ।
- लग्नादिभावगतानां रव्यादिग्रहाणां फलविशेषस्याध्ययनम् ।
- स्वक्षेत्रादिस्थानां ग्रहाणां वैशिष्ट्यकथनम्।
- ग्रहाणाम् अन्योन्यकारकत्वस्य अशुभयोगविशेषाणां च निरूपणम्
- स्त्रीजातके चिन्तनीयानां विशेषविचाराणाम् अध्ययनम् ।
- मरणस्य देश-काल-हेतूनां निरूपणम् ।
- अज्ञातजन्मसमयानां कुण्डलीनिर्माणविधेः अध्ययनम्।

अधिगमस्य परिणामाः (Learning Outcomes):

अस्याध्ययनेन छात्रः कुण्डल्यां ग्रहाणां परस्परं दृष्टिवशात् शुभाशुभत्वस्य निर्णये पटुत्वं प्राप्नोति। लग्नादिषु भावेषु स्थिताः रव्यादयः ग्रहाः कीदृशं फलं प्रयच्छन्तीति प्रतिपादयितुं कुशलो भवति। एकाधिकसंख्यया ग्रहाः स्वक्षेत्रादिषु स्थिताः चेत् किं फलं वितन्वन्ति ? बृहज्जातकदिशा अन्योन्यकारकत्वं कथम्? अङ्गभङ्गाद्यनिष्टयोगनिरूपणाविधिः कः? इत्याद्यनेकविषयाणाम् अध्ययनद्वारा सूक्ष्मफलचिन्तनक्रमम् अधिगच्छति। इत्येवं प्राधान्येन फलचिन्तनस्य मूलभूतानां सर्वेषाम् अंशानाम् अध्ययनं शास्त्रिस्तरस्य फलितज्यौतिषपाठ्यक्रमद्वारा सेत्स्यति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	दृष्टिफलचिन्तनम्	40 hr	0	24 hr.	4

पाठ्यांशाः (Units) :-

पाठ्यांशः(Unit) - 1.दृष्टिफलाध्यायः, भावाध्यायश्च ।

पाठ्यांशः(Unit) - 2. आश्रययोगाध्यायः, प्रकीर्णाध्यायश्च

पाठ्यांशः(Unit) - 3.अनिष्टाध्यायः, स्त्रीजातकाध्यायश्च

पाठ्यांशः(Unit) - 4. निर्याणाध्यायः, नष्टजातकाध्यायश्च

प्रायोगिकम् (Practicum) :-

(अधोलिखितानां प्रायोगिकमध्ययनं/गोलरचना/फलक/स्फोरकपत्रनिर्माणं/वृक्षरचना/रेखाचित्रं /PPT/लघुचलच्चित्र (Audio Visual Content)/यन्त्रप्रारूपादीनि रचनीयानि/ जन्मकुण्डलीनां सङ्ग्रहः कर्तव्यः विश्लेषणं च कर्तव्यम्।)

1. दृष्टिभेदेन फलभेदस्य अनुशीलनम्
2. स्त्रीजातकविमर्शः
3. अनिष्टयोगानां फलविवेकः
4. निर्याणचिन्तनम्

प्रवचनप्रक्रिया (Mode of Transaction) :-

1. पाठ्यांशानां सरलमानकसंस्कृतमाध्यमेन ग्रन्थदिशा प्रत्यक्षपद्धत्त्या कक्षाध्यापनम्।
2. पाठ्यांशानां फलक/स्फोरकपत्र/वृक्षरचना/विविधरेखाचित्रमाध्यमेन च प्रत्यक्षशिक्षणम्।
3. पाठ्यांशानामाधुनिकपाठ्योपकरण(PPT/लघुचलच्चित्र/दृश्यश्रव्योपकरण)माध्यमेन च प्रत्यक्षशिक्षणम्।
4. पाठ्यांशानाम् आगमन-निगमन-विश्लेषणविधिना पाठनम् ।
5. पाठ्यांशानां पञ्चाङ्गप्रयोगेन गोलप्रदर्शनपूर्वकं च पाठनम्।

आकलनप्रक्रिया (Mode of Assessment)

- सत्रान्तपरीक्षाद्वारा मूल्याङ्कनम् – 60
- सततमूल्याङ्कनम्/प्रायोगिकम् (PRACTICUM) - 40

सन्दर्भग्रन्थाः (Reference Books)

1. बृहज्जातकम्, वराहमिरिरचिता, चौखम्भा संस्कृत सीरीज ऑफिस, वाराणसी - 1957
2. बृहत्पराशरहोराशास्त्रम्, महर्षिपराशरः, चौखम्भा संस्कृत संस्थान, वाराणसी, वि.सं. 20
3. जातकपारिजातः, कपिलेश्वरशास्त्री, चौखम्भा संस्कृत संस्थान, वाराणसी, संवत् 2036
4. फलदीपिका, मन्त्रेश्वररचिता, प्रो. सर्वनारायणझा, इ-संस्करण, राष्ट्रियसंस्कृतसंस्थानम्, लखनऊपरिसरः-2004
5. सारावली, कल्याणवर्मा, मोतीलाल बनारसीदास, वाराणसी, 2000
6. सर्वार्थचिन्तामणिः, महीधरशर्मा, खेमराज श्रीकृष्णदास, श्रीवेङ्कटेश्वरप्रेस, मुम्बई- 2010

ज्योतिषम् -15

3.1 प्रारम्भिकं वास्तुशास्त्रम्

सत्रार्द्धः- 6 **श्रेयोऽङ्कः- 4**

पाठ्यक्रमस्य परिचयः (Introduction of the course) :-

- अस्मिन् पाठ्यांशे वास्तुशास्त्रस्य सामान्यपरिचयः वर्त्तते।

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

- ज्यौतिषच्छात्राणां वास्तुविषयकसामान्यज्ञानसम्पादनम्।
- गृहनिर्माणयोग्यभूमेः चयनप्रकारस्य अध्ययनम्।
- भूमेः आकारवशेन फलचिन्तनक्रमादीनां ज्ञानम्।
- आयव्ययादीनां निर्धारणम्।
- गृहे प्रकोष्ठविभागकरणं ग्राह्य-निषिद्धकाष्ठविशेषज्ञानं प्रवेशकालविमर्शश्च।

अधिगमस्य परिणामाः (Learning Outcomes)

अस्याध्ययनेन छात्रः वास्तुशास्त्रे प्रवेशं प्राप्य प्राचीनभारतीयवास्तुशास्त्रदृष्ट्या गृहनिर्माणप्रक्रियामधिगन्तुं सक्षमः भवति। भूमिशोधनस्य शल्योद्धारस्य च महत्त्वं किमिति जनेभ्यः अवबोधयितुं पटुः भवति। कीदृशी भूमिः कस्य कृते योग्या भवतीति वक्तुं समर्थः भवति। शिलान्यासस्य गृहप्रवेशस्य च मुहूर्तं गणयितुं कौशलं प्राप्नोति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	प्रारम्भिकं वास्तुशास्त्रम्	40 hr	0	24 hr.	4

पाठ्यांशाः (Units) :-

पाठ्यांशः(Unit)- 1. वास्तुशास्त्रस्य परिचयादिकथनम्।

- वास्तुशास्त्रस्य परिचयः
- काकिणीविचारः
- भूमिचयनं भूमिशोधनं च
- गजपृष्ठादिभूलक्षणानि तत्फलानि च

पाठ्यांशः(Unit)- 2 शल्योद्धारादिचिन्तनम्।

- शल्योद्धारः
- दिग्ज्ञानम्
- आयसाधनम्
- वृषवास्तुचक्रम्

पाठ्यांशः(Unit)- 3. पिण्डानयनादिचिन्तनम्।

- पिण्डानयनम्
- राहुमुखविचारः
- गृहारम्भमुहूर्तः
- शिलान्यासः

पाठ्यांशः(Unit) - 4. गृहविभागादिचिन्तम्।

- दिक्परत्वेन गृहविभागः
- निषिद्धग्राह्यकाष्ठानि
- गृहप्रवेशविचारः

प्रायोगिकम् (Practicum) :-

(अधोलिखितानां प्रायोगिकमध्ययनं/गोलरचना/फलक/स्फोरकपत्रनिर्माणं/वृक्षरचना/रेखाचित्रं /PPT/लघुचलच्चित्र (Audio Visual Content)/यन्त्रप्रारूमानचित्रादीनि रचनीयानि/ विश्लेषणं च कर्तव्यम्।)

- भूमिशोधनप्रकारः
- शल्योद्धारप्रक्रिया
- वास्तुनि दिग्ज्ञानम्
- शिलान्यासविधिः

प्रवचनप्रक्रिया (Mode of Transaction) :-

1. पाठ्यांशानां सरलमानकसंस्कृतमाध्यमेन ग्रन्थदिशा प्रत्यक्षपद्धत्त्या कक्षाध्यापनम्।
2. पाठ्यांशानां फलक/स्फोरकपत्र/वृक्षरचना/विविधरेखाचित्रमाध्यमेन च प्रत्यक्षशिक्षणम्।
3. पाठ्यांशानामाधुनिकपाठ्योपकरण(PPT/लघुचलच्चित्र/दृश्यश्रव्योपकरण)माध्यमेन च प्रत्यक्षशिक्षणम्।
4. पाठ्यांशानाम् आगमन-निगमन-विश्लेषणविधिना पाठनम् ।
5. पाठ्यांशानां पञ्चाङ्गप्रयोगेन गोलप्रदर्शनपूर्वकं च पाठनम्।

आकलनप्रक्रिया (Mode of Assessment)

- सत्रान्तपरीक्षाद्वारा मूल्याङ्कनम् – 60
- सततमूल्याङ्कनम्/प्रायोगिकम् (PRACTICUM) - 40

सन्दर्भग्रन्थाः (Reference Books)

1. बृहद्वास्तुमाला, चौखम्बा सुरभारती प्रकाशन, वाराणसी - 2016
2. मुहूर्तचिन्तामणिः (वास्तुप्रकरणम्, गृहप्रवेशप्रकरणं च) , मुहूर्तचिन्तामणिः, श्रीरामदैवज्ञः, मोतीलाल बनारसीदास, वाराणसी
3. वास्तुरत्नावली, पं. जीवनाथझा विरचिता, चौखम्बा ओरियान्टालिया, दिल्ली – 2009
4. वास्तुराजवल्लभः, मण्डनसूत्रधारः, मास्टर खिलाडी लाल, कचौरीगली, वाराणसी - 1996

ज्योतिषम् -16

3.1 संस्कृतवाङ्मयस्य परिज्ञानम्

सत्रार्द्धः - 6 **श्रेयोऽङ्कः - 4**

पाठ्यपरिचयः (About the course)

पाठ्येऽस्मिन् व्याकरण-साहित्य-ज्यौतिष-दर्शनादिशास्त्राणां विभिन्नविषयाः प्रतिपाद्यन्ते। अत्र संस्कृतवाङ्मयस्य सामान्यपरिचयः प्रतिपाद्यते।

अधिगमपरिणामाः (Learning Outcomes) – छात्राध्यापका अमुं पाठ्यमधीत्य –

- व्याकरणसंज्ञा-उच्चारणस्थानानां विशिष्टार्थस्य ज्ञानं प्राप्स्यन्ति।
- सन्धीनां भेदज्ञानं विशिष्टार्थं च ज्ञास्यन्ति।
- संस्कृतभाषायां कारकविभक्त्यनुसारं अनुवादकौशलं प्राप्स्यन्ति।
- छन्दसां लक्षणोदाहरणसहितं भेदज्ञानं विज्ञाय अन्यानपि बोधयितुं समर्था भविष्यन्ति।
- अलङ्काराणां लक्षणोदाहरणसहितं भेदज्ञानं विज्ञाय अन्यानपि बोधयितुं समर्था भविष्यन्ति।
- लौकिकवैदिकयोः संस्कृतसाहित्यस्य ज्ञानं प्राप्स्यन्ति।
- ज्यौतिषशास्त्रे काल-ग्रह-नक्षत्र-राशीनां ज्ञानं प्राप्स्यन्ति।
- षड्दर्शनानां सामान्यपरिचयं प्राप्स्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	संस्कृतवाङ्मयस्य परिज्ञानम्	40 hr	0	24 hr.	4

पाठ्यांशः - संस्कृतवाङ्मयस्य परिचयः

पाठ्यांशः(Unit) - 1 व्याकरणशास्त्रम्

- माहेश्वरसूत्राणि, इत्सञ्ज्ञा, लोपः, प्रत्याहारसञ्ज्ञा, स्वरभेदाः, सवर्णम्, संयोगः, संहिता, प्रयत्नः (आभ्यन्तरः बाह्यश्च), उच्चारणस्थानानि, पदम्।
  - अच्सन्धयः - सवर्णदीर्घ-गुण-वृद्धि-यण्-अयादि-पररूप-पूर्वरूप-प्रकृतिभावाः।
  - हल्सन्धयः – श्चुत्व-ष्टुत्व-जश्त्व-परसवर्ण-अनुनासिक-अनुस्वाराः।
  - विसर्गसन्धयः – सत्व-रुत्व-उत्व-यत्व-लोपाः।

पाठ्यांशः(Unit) - 2. व्याकरणशास्त्रम्

- हिन्दीवाक्यानां संस्कृतानुवादः। (कारकविभक्त्याधारेण)।
- कारक-प्रत्यय-समासाधारितवाक्यानाम् अशुद्धिसंशोधनम्।
- उपसर्गाणाम् अव्ययानां च वाक्यप्रयोगः।

पाठ्यांशः(Unit) - 3. संस्कृतसाहित्यस्य परिचयः -

- **छन्दसां लक्षणोदाहरण-सम्बन्धिसामान्यपरिचयः** -
  आर्या, अनुष्टुप्, इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः, वंशस्थम्, द्रुतविलम्बितम्, भुजङ्गप्रयातम्, वसन्ततिलका, मालिनी, मन्दाक्रान्ता, शिखरिणी, हरिणी, शार्दूलविक्रीडितम्, स्रग्धरा।
- **अलंकाराणां लक्षणोदाहरण-सम्बन्धिसामान्यपरिचयः** -
  अनुप्रासः, यमकम्, श्लेषः, स्वभावोक्तिः, उपमा, अनन्वयः, रूपकम्, उत्प्रेक्षा, व्यतिरेकः सन्देहः, भ्रान्तिमान्, निदर्शना, दृष्टान्तः, अर्थान्तरन्यासः, दीपकम्, तुल्ययोगिता, समासोक्तिः, अतिशयोक्तिः, अपह्नुतिः, विभावना, विशेषोक्तिः, वक्रोक्तिः ॥
- **वैदिकसाहित्यम्** - वेद-ब्राह्मण-आरण्यक-उपनिषदाम्, याज्ञवल्क्यस्मृतेः आचाराध्यायस्य च सामान्यपरिचयः।
  ऋग्वेदः- अग्निसूक्तम् (1.1), वरुणसूक्तम् (1.25), विष्णुसूक्तम् (1.154), पुरुषसूक्तम् (10.90), संज्ञानसूक्तम् (10.191)।
  यजुर्वेदः - शिवसंकल्पसूक्तम् (अध्यायः 34)।
- **लौकिकसाहित्यम्-**
  - वीरकाव्यम् - रामायणम् (वाल्मीकिः), महाभारतम् (वेदव्यासः)।
  - महाकाव्यकवयः - कालिदासः, अश्वघोषः, भारविः, माघः, श्रीहर्षः।
  - गद्यकाव्यकवयः - दण्डी, सुबन्धुः, बाणभट्टः, अम्बिकादत्तव्यासः।
  - दृश्यकाव्यकवयः - भासः, भवभूतिः, शूद्रकः, विशाखदत्तः।
- **अर्वाचीनकवयः तेषां रचनाश्च** -
  भट्टमथुरानाथशास्त्री, देवर्षिः कलानाथशास्त्री, अभिराजराजेन्द्रमिश्रः, प्रो. हरिरामः आचार्यः, डा.राघवराघवन्।

पाठ्यांशः(Unit) - 4. अधोलिखितशास्त्रानुसारं परिचयः -

- **ज्यौतिषशास्त्रम्-** नवविधकालमानम्, द्वादश राशीनां सामान्यपरिचयः, नवग्रहाणां सामान्यपरिचयः, नक्षत्राणां सामान्यपरिचयः।
- **दर्शनशास्त्रम्** - षड्दर्शनानां सामान्यपरिचयः (प्रवर्तकः, प्रतिनिधिग्रन्थः, प्रयोजनम्, प्रमाणानि, प्रतिपाद्यविषयः)।

प्रायोगिकम् (Practicum)

- व्याकरणसूत्राणां कण्ठस्थीकरणम् कृत्वा नवीनोदाहरणानां लेखनं कुर्युः ।
- पाठितानां छन्दसां नवीनानि उदाहरणानि लिखेयुः ।
- प्रदत्तविषयानुसारेण लिखेयुः।
- प्रदत्तविषयानुसारेण भाषेरन्।
- पाठितान् विषयान् आधृत्य प्रश्नमञ्चो भवेत्।
- पाठ्यांशस्य पारायणं भवेत्।
- अधीतविषयाणाम् उपस्थापनं कुर्युः ।
- अधीतग्रन्थस्य गणशः सामूहिकीं चर्चां कुर्युः।
- अध्यापकेन षड्दर्शनानां परिचयः फलकमाध्यमेन (चार्टमाध्यमेन) कारणीयः।

विशेषः - प्रतिमासमेकैकं प्रायोगिकं करणीयम्। आहत्य उपर्युक्तेषु चत्वारि प्रायोगिकाणि करणीयानि।

प्रवचनप्रक्रिया (Mode of Transaction)

- आगमनविधिः
- निगमनविधिः
- व्याख्यानविधिः
- फलकविधिः
- दृष्टान्तविधिः
- प्रतिदृष्टान्तविधिः
- प्रश्नोत्तरविधिः
- ई-कन्टेन्ट (P.P.T.) विडियोमाध्यमेन

आकलनप्रक्रिया (Mode of Assessment)

आकलनप्रक्रिया परीक्षणाधारिता प्रायोगिककार्याधारिता च भविष्यति।

सन्दर्भग्रन्थाः (Reference Books)

- तत्त्वबोधिनीव्याख्या, बालमनोरमाव्याख्या, मोतीलाल बनारसी दास, दिल्ली – 7 ।
- संस्कृत साहित्य का इतिहास – डॉ.उमाशङ्करशर्मा ऋषि, चौखम्भा भारती अकादमी, वाराणसी।
- संस्कृतसाहित्येतिहासः- आचार्यलोकमणिदाहालः, चौखम्बा कृष्णदास अकादमी, वाराणसी।
- भारतीयं शिक्षादर्शनम् – डॉ.कुलदीपशर्मा , प्रकाशकः- जगदीशसंस्कृतपुस्तकालयः
- अवकहडाचक्रम् – पं.सतीशचन्द्रशास्त्री, प्रकाशकः- हंसाप्रकाशनम्, जयपुरम्
- सूर्यसिद्धान्तः- कपिलेश्वर शास्त्री, प्रकाशकः- चौखम्बाप्रकाशनम्, वाराणसी

दर्शनम् - 1

3.1 भारतीयदर्शनपरिचयः

सत्रार्द्धः – 1 **श्रेयोऽङ्कः- 4**

पाठ्यपरिचयः (About the course) -

भारतीयदर्शनस्य परिचयार्थम् इदं पाठ्यं निर्धारितमस्ति । भारतीयदर्शनस्य आरम्भः कदा जातः? भारतीयदर्शनस्य प्रयोजनं किम्? भारतीयदर्शने कति प्रस्थानानि सन्ति? तेषां प्रस्थानानां के महत्त्वपूर्णाः सिद्धान्ताः सन्ति? एतेषां विविधदार्शनिकप्रस्थानानां कीदृशी आचार्यपरम्परा ग्रन्थपरम्परा वा विद्यते? विविधैः आचार्यैः प्रतिपादितेषु सिद्धान्तेषु कथं कालक्रमेण परिष्काराः सञ्जाताः? इत्येतासां जिज्ञासानां समाधानम् एतस्य पाठ्यविषयस्य अध्ययनेन सम्भविष्यति । वैदिककालादारभ्य अद्यावधि भारतीयदर्शनस्य ज्ञानपरम्परा निरन्तरं परिवर्धमाना विद्यते। एषः पाठ्यविषयः दर्शनस्य ज्ञानपरम्परायाः विकासक्रमं वैशिष्ट्यं च बोधयति।

अधिगमपरिणामाः (Learning Outcomes) – एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः

- भारतीयदर्शनस्य स्वरूपं प्रयोजनं प्रवृत्तिं च विज्ञापयितुं समर्थाः भविष्यन्ति।
- न्याय-वैशेषिकशास्त्रस्य तर्कप्रणालीं बोधयितुं शक्ष्यन्ति।
- साङ्ख्य-योगयोः समानतन्त्रतां विज्ञाय साङ्ख्य-योगसिद्धान्तानां प्रवचनकौशलं प्राप्स्यन्ति।
- मीमांसाशास्त्रदृष्ट्या वेदवाक्यार्थप्रक्रियां प्रबोधयितुं योग्याः भविष्यन्ति।
- वेदान्तशास्त्रस्य सिद्धान्तान् प्रस्थानभेदांश्च पाठयितुं प्रभविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	भारतीयदर्शनपरिचयः	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) -1

भारतीयदर्शनपरिचयः

(चार्वाक-जैन-बौद्ध-पाश्चात्यदर्शनानां परिचयः)

1. भारतीयदर्शनम्, दर्शनशब्दस्य व्युत्पत्तिः, दर्शनशास्त्रस्योद्गमः विकासः, भारतीयदर्शनस्य प्रवृत्तयः प्रयोजनं च। उपनिषत्सु वर्णिताः प्रमुखाः दार्शनिकविचाराः (आत्मा, ब्रह्म, जगत्, पुनर्जन्म, उपासना, कर्मवादः, मोक्षः) विविधदर्शनानां बीजसिद्धान्ताः। दर्शनशास्त्रस्य प्रस्थानानि, भारतीयदर्शनस्य विविधप्रस्थानानां परिचयः, आस्तिकदर्शनानां वैशिष्ट्यम्।
2. चार्वाकदर्शनस्य परिचयः वैशिष्ट्यं च।
3. जैनदर्शनस्य परिचयः वैशिष्ट्यं च।
4. बौद्धदर्शनस्य परिचयः वैशिष्ट्यं च।

5. पाश्चात्यदर्शनस्य परिचयः वैशिष्ट्यं च।

पाठ्यांशः(Unit) – 2

न्यायवैशेषिकदर्शनपरिचयः

1. न्यायदर्शनस्य परिचयः, न्यायदर्शनस्य आचार्यपरम्परा, न्यायदर्शनस्य प्रमाणमीमांसा न्यायदर्शनस्य प्रमुखाः सिद्धान्ताः।
2. वैशेषिकदर्शनस्य परिचयः, वैशेषिकदर्शनस्य आचार्यपरम्परा, वैशेषिकदर्शनस्य प्रमुखाः सिद्धान्ताः, न्यायवैशेषिकदर्शनयोः समानतन्त्रता।

पाठ्यांशः(Unit) - 3

साङ्ख्ययोगदर्शनपरिचयः

1. साङ्ख्यदर्शनम् – साङ्ख्यशब्दस्य व्युत्पत्तिः, साङ्ख्यशास्त्रस्योद्गमः विकासश्च । साङ्ख्यशास्त्रस्य प्रयोजनम्। साङ्ख्यदर्शनस्य आचार्यपरम्परा। साङ्ख्यदर्शनस्य प्रमुखाः सिद्धान्ताः।
2. योगदर्शनस्य परिचयः, योगशब्दस्य व्युत्पत्तिः योगदर्शनस्य आचार्यपरम्परा। समाधियोगः, साधनयोगः, योगदर्शनस्य प्रमुखाः सिद्धान्ताः, साङ्ख्ययोगदर्शनयोः समानतन्त्रता।

पाठ्यांशः(Unit) – 4

मीमांसा-वेदान्तपरिचयः

1. मीमांसादर्शनम् – मीमांसाशब्दस्य व्युत्पत्तिः, मीमांसाशास्त्रस्योद्गमः विकासः प्रयोजनं च। मीमांसाशास्त्रस्य प्रस्थानानि। मीमांसादर्शनस्य आचार्यपरम्परा ग्रन्थपरम्परा च। मीमांसादर्शनस्य प्रमुखाः सिद्धान्ताः।
2. वेदान्तदर्शनम् - वेदान्तशब्दस्य व्युत्पत्तिः, वेदान्तशास्त्रस्योद्गमः विकासः प्रयोजनं च। वेदान्तदर्शनस्य प्रस्थानानि। वेदान्तदर्शनस्य आचार्यपरम्परा ग्रन्थपरम्परा च। वेदान्तदर्शनस्य प्रमुखाः सिद्धान्ताः।

प्रायोगिकम् (Practicum) – अस्मिन् पाठ्ये छात्राध्यापकैः करणीयाः प्रयोगाः -

- भारतीयदर्शनस्य कस्यापि एकस्य आचार्यस्य (प्राध्यापकेन सूचितस्य आचार्यविशेषस्य) जीवनं कर्तृत्वं च सरलभाषया प्रभाषणीयम्।
- भारतीयदर्शनस्य प्रमुखसिद्धान्तानां प्रबोधनाभ्यासः, लेखनं भाषणं च।
- पूर्वपक्षम् अवलोक्य सिद्धान्तपक्षस्य सिद्धान्तपक्षमवलोक्य वा पूर्वपक्षस्य प्रवचनम्।
- आचार्य-ग्रन्थ-नामस्मरणक्रीडा
- पुस्तकालय-परियोजना – कमप्येकं दार्शनिकसिद्धान्तम् अधिकृत्य कयोरपि द्वयोः आचार्ययोः मतसंकलनं समीक्षणं च।
- प्रस्थानविशेषे प्रयुक्तानां पारिभाषिकपदानां संकलनपरियोजना।

प्रवचनप्रक्रिया (Mode of Transaction) -

- व्याख्यान-प्रश्नोत्तरद्वारा संवादः सम्प्रेषणं च – पाठ्यप्रकरणविशेषमवलम्ब्य आदौ सिद्धान्तस्वरूपबोधकं विविधनिदर्शनसमन्वितं व्याख्यानं तदनु च व्याख्याते अंशे प्रश्नानां द्वारा सम्प्रेषितस्य पाठ्यांशस्य दृढीकरणम् । उत्थाप्यसमाधानपद्धतिः अपि आश्रयणीया । छात्राध्यापकाः विषयसम्बद्धान् अधिकाधिकप्रश्नान् यथा पृच्छेयुः तथा प्रेरणीयाः ।
- तुलनात्मकविमर्शः – विविधदर्शनानां परिचयप्रबोधनसमये तत्तद्दर्शनेषु ज्ञान-तत्त्व-मूल्यमीमांसासन्दर्भे विद्यमानानां भेदानां परिचर्चा तोलनं च कर्तव्यं येन छात्राध्यापकाः तुलनात्मकं विमर्शं कर्तुं शक्नुयुः ।
- तात्पर्यबोधकानि यानि षड् लिङ्गानि तेषामपि प्रवचनप्रक्रियायां प्रयोगः शक्यते । यथा विषयस्य **उपक्रमः**, **अभ्यासः**, तत्र का **अपूर्वता**,किं **फलम्**, कश्च तत्र **अर्थवादः**, का **उपपत्तिः उपसंहारश्च** इत्यादयः अंशाः पृथक् पृथक् बोधनीयाः ।

आकलनप्रक्रिया (Mode of Assessment) -

- आकलनप्रक्रिया परीक्षणाधारिता प्रायोगिककार्याधारिता च भविष्यति।

सन्दर्भग्रन्थाः (Reference Books) –

- भारतीय दर्शन - बलदेव उपाध्याय, शारदा मन्दिर, वाराणसी, १९९७
- सर्वदर्शनसङ्ग्रहः - भण्डारकर्-शोधसंस्थानम्, पूणे, १९२४
- दर्शन दिग्दर्शन - राहुल सांकृत्यायन, किताब महल, इलाहाबाद, २०१७

दर्शनम् -2

4.1 तर्कपरिचयः (तर्कभाषा)

सत्रार्द्धः – 1 **श्रेयोऽङ्कः- 4**

पाठ्यपरिचयः (About the course) –

भारतीयन्यायशास्त्रे प्रवेशार्थम् इदं पाठ्यं परिकलितं विद्यते। एतस्मिन् पाठ्यविषये न्यायनये प्रवेशं प्राप्तुं समुत्सुकानां कृते सरलया रीत्या न्यायदर्शनस्य प्रमाणनिरूपणं प्रमाणप्रक्रिया प्रामाण्यवादः प्रमेयाणि च निरूपितानि सन्ति। संस्कृतजगति पद-वाक्य-प्रमाणशास्त्राणि प्रसिद्धानि सन्ति। तत्र पदशास्त्रं नाम व्याकरणम्, वाक्यशास्त्रं नाम मीमांसा, प्रमाणशास्त्रं नाम न्यायशास्त्रम्। तदेतस्य प्रमाणशास्त्रस्य सरलतया बोधनाय श्रीमता केशवमिश्रेण तर्कभाषा विरचिता।

अधिगमपरिणामाः (Learning Outcomes) – एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः

- न्यायदर्शनस्य स्वरूपं प्रयोजनं च विज्ञापयितुं समर्थाः भविष्यन्ति।
- न्याय-शास्त्रस्य तर्कप्रणालीं बोधयितुं शक्ष्यन्ति।
- न्यायदर्शनस्य उद्देश-लक्षण-परीक्षात्मिकां प्रवृत्तिं प्रबोधयितुं प्रभविष्यन्ति
- प्रमाणस्य लक्षणं प्रक्रियां च बोधयितुं योग्याः भविष्यन्ति।
- न्यायशास्त्रस्य सिद्धान्तान् प्रस्थानभेदांश्च पाठयितुं प्रभविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	तर्कपरिचयः (तर्कभाषा)	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) -1

तर्कप्रवेशः

1. न्यायदर्शमस्य प्रवृत्तयः उद्देशः लक्षणं, परीक्षाः च
2. प्रमाणसामान्यलक्षणम्
3. कारणलक्षणं भेदाश्च
4. समवायिकारणम्
5. समवायसम्बन्धः
6. असमवायिकारणम्
7. निमित्तकारणम्

पाठ्यांशः(Unit) -2

तर्कबोधः

1. प्रमालक्षणम्
2. करणम्
3. व्यापार:
4. प्रत्यक्षलक्षणम्
5. इन्द्रियार्थसन्निकर्ष:
6. विशेषणविशेष्यभावसन्निकर्ष:
7. अलौकिकसन्निकर्ष :
8. प्रत्यक्षप्रमा (निर्विकल्पकज्ञानं सविकल्पकज्ञानं च)
9. प्रत्यक्ष प्रमानविमारशः विविध दर्शनानां प्रत्यक्षलक्षणानां न्यायदर्शनमतेन विचारः

पाठ्यांशः(Unit) - 3
तर्कपरिचय

1. अनुमानलक्षणम्
2. व्याप्तितद्भेदाश्च :
3. उपाधि:
4. परामर्श:
5. स्वार्थानुमानम्
6. परार्थानुमानम्
7. अन्वयव्यतिरेकी हेतु:
8. केवलान्वयी हेतु:
9. केवलव्यतिरेकी हेतु:
10. पक्ष:सपक्ष-विपक्षा-
11. हेत्त्वाभासस्वरूपम्
12. असिद्धहेत्त्वाभास:
13. विरुद्धहेत्त्वाभास:
14. अनैकान्तिकहेत्त्वाभास:
15. प्रकरणसमहेत्त्वाभास:
16. कालत्ययापदिष्टहेत्त्वाभास:

पाठ्यांशः(Unit) - 4
प्रमाणबोधः

1. उपमानप्रमाणम्
2. उपमिति प्रमा
3. शब्दप्रमाणलक्षणम् (आप्तलक्षणं वाक्यलक्षणं च)
4. आकाङ्क्षा
5. योग्यता
6. सन्निधि:
7. शाब्दबोधप्रक्रिया

8. अर्थापत्तिः
9. अर्थापत्ते :प्रमाणान्तरत्वखण्डनम्
10. अभावप्रमाणम्
11. अभावस्य प्रत्यक्षे अन्तभार्वः
12. विविधदर्शनेषु प्रमाणसङ्ख्याभेदः
13. प्रामाण्यवादः
14. स्वतप्रामाण्यम् :
15. परतप्रामाण्यम् :
16. विविधदर्शनेषु प्रामाण्यवादविचारः

प्रायोगिकम् (Practicum) – अस्मिन् पाठ्ये छात्राध्यापकैः करणीयाः प्रयोगाः -

- न्यायदर्शनस्य प्रमुखसिद्धान्तानां प्रबोधनाभ्यासः, लेखनं भाषणं च।
- पूर्वपक्षम् अवलोक्य सिद्धान्तपक्षस्य सिद्धान्तपक्षमवलोक्य वा पूर्वपक्षस्य प्रवचनम्।
- उदाहरणवाक्यम् अवलोक्य हेत्त्वाभासान्वेषणम्।
- अनुमानवाक्येषु पक्ष-सपक्ष-हेत्त्वाद्यन्वेषणम्।
- पुस्तकालय-परियोजना – कमप्येकं न्यायसिद्धान्तम् अधिकृत्य कयोरपि द्वयोः आचार्ययोः मतसंकलनं समीक्षणं च।
- न्यायशास्त्रस्य प्रकरणविशेषे प्रयुक्तानां पारिभाषिकपदानां संकलनपरियोजना।

प्रवचनप्रक्रिया (Mode of Transaction) -

- न्यायदर्शनस्य प्रवचने उद्देश्यलक्षणपरीक्षाक्रमेण छात्राध्यापकाः बोधनीयाः । न्यायदर्शनस्य लक्षणपरिष्कारशैलीं यथा ते अवगच्छेयुः अपि च स्वयमपि परिष्कार-सङ्गतिं च प्रतिपादयितुं यथा समर्थाः भवेयुः तथा अन्यानि अपि लौकिकनिदर्शनानि स्वीकृत्य अभ्यासः कारणीयः। (व्याख्यानद्वारा/PPT द्वारा)।
- व्याख्यान-प्रश्नोत्तरद्वारा संवादः सम्प्रेषणं च - पाठ्यप्रकरणविशेषमवलम्ब्य आदौ सिद्धान्तस्वरूपबोधकं विविधनिदर्शनसमन्वितं व्याख्यानं तदनु च व्याख्याते अंशे प्रश्नानां द्वारा सम्प्रेषितस्य पाठ्यांशस्य दृढीकरणम्। उत्थाप्यसमाधानपद्धतिः अपि आश्रयणीया । छात्राध्यापकाः विषयसम्बद्धान् अधिकाधिकप्रश्नान् यथा पृच्छेयुः तथा प्रेरणीयाः। (व्याख्यानद्वारा/PPT द्वारा)।

आकलनप्रक्रिया (Mode of Assessment) -

- आकलनप्रक्रिया परीक्षणाधारिता प्रायोगिककार्याधारिता च भविष्यति।

सन्दर्भग्रन्थाः (Reference Books)

- तर्कभाषा - केशवमिश्र, चौखम्बा प्रकाशन, वाराणसी।
- तर्कसङ्ग्रहः - अन्नम्भट्टः, चौखम्बा प्रकाशन, वाराणसी।

- तर्कसोपानम् - राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः ।
- न्यायस्य भाषा संस्कृतम् - संस्कृतसंवर्द्धनप्रतिष्ठानम्, नवदेहली ।

दर्शनम् -3

3.1 योगदर्शनम् (योगसूत्रभोजवृत्तिः)

सत्रार्द्धः – 2 **श्रेयोऽङ्कः- 4**

पाठ्यपरिचयः (About the course)

भारतीययोगदर्शने प्रवेशार्थम् इदं पाठ्यं परिकलितं विद्यते। एतस्मिन् पाठ्यविषये योगशास्त्रे प्रवेशं प्राप्तुं समुत्सुकानां कृते सरलया रीत्या योगदर्शनस्य सिद्धान्ताः निरूपिताः सन्ति। भारतीयदार्शनिकचिन्तने योगदर्शनस्य यागदर्शनस्य च व्यापकः प्रभावो विद्यते । एतस्मिन् पाठ्यविषये महर्षिपतञ्जलिविरचितेषु योगसूत्रेषु महाराजभोजस्य राजमार्तण्डवृत्तिः निर्धारिता अस्ति । योगसूत्राणां तात्पर्यनिर्णये व्यासभाष्येण समं भोजवृत्तेरपि अनन्यसाधारणं योगदानम् अस्ति। एषः पाठ्यविषयः साध्ययोगस्य साधनयोगस्य च स्वरूपप्रतिपत्तौ उपकारको विद्यते।

अधिगमपरिणामाः (Learning Outcomes) – एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः -

- योगदर्शनस्य स्वरूपं प्रयोजनं च प्रतिपादयितुं समर्थाः भविष्यन्ति।
- योग-शास्त्रस्य ज्ञानपरम्परां बोधयितुं शक्ष्यन्ति।
- योगदर्शनस्य प्रवृत्तिं प्रबोधयितुं प्रभविष्यन्ति।
- योगस्य समाधेः लक्षणं प्रक्रियां च बोधयितुं योग्याः भविष्यन्ति।
- योगशास्त्रस्य सिद्धान्तान् प्रस्थानभेदांश्च पाठयितुं प्रभविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	योगदर्शनम् (योगसूत्रभोजवृत्तिः)	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) – 1

योगप्रवेशः

1. योगदर्शनस्य प्रमुखाः आचार्याः ग्रन्थाश्च
2. राजमार्तण्डवृत्तेः वैशिष्ट्यम्
3. अथ योगानुशासनम्
4. योगस्य स्वरूपम्
5. चित्तभूमयः
6. चित्तवृत्तयः तासां स्वरूपं च।

पाठ्यांशः(Unit) – 2

समाधियोगः

1. चित्तवृत्तिनिरोधोपायाः (अभ्यासः वैराग्यम्)
2. सम्प्रज्ञातसमाधिः
3. सम्प्रज्ञातसमाधिविशेषाः
4. ईश्वरस्वरूपम्
5. योगान्तरायाः
6. परिकर्माणि
7. समापत्तयः
8. ऋतम्भरा प्रज्ञा
9. निर्बीजसमाधिः

पाठ्यांशः(Unit) – 3

साधनयोगः

1. क्रियायोगः
2. पञ्च क्लेशाः
3. कर्माशयः
4. हेयम्
5. हेयहेतुः
6. गुणपर्वाणि
7. संयोगः संयोगहेतुश्च
8. हानोपायः

पाठ्यांशः(Unit) - 4

अष्टाङ्गयोगः

1. अष्टाङ्गयोगः
2. यमाः (अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहाः)
3. नियमाः (शौच-सन्तोष-तपः-स्वाध्याय-ईश्वरप्रणिधानानि)
4. यम-नियम-प्रतिष्ठाजन्यानि फलानि
5. आसनम्
6. प्राणायामः
7. प्रत्याहारः
8. धारणा
9. ध्यानम्
10. समाधिः

प्रायोगिकम् (Practicum) – अस्मिन् पाठ्ये छात्राध्यापकैः करणीयाः प्रयोगाः -

1. योगदर्शनस्य प्रमुखसिद्धान्तानां प्रबोधनाभ्यासः, लेखनं भाषणं च ।
2. पूर्वपक्षम् अवलोक्य सिद्धान्तपक्षस्य सिद्धान्तपक्षमवलोक्य वा पूर्वपक्षस्य प्रवचनम् ।
3. क्रियायोग-अष्टाङ्गयोगाधारित प्रायोगिककार्याणि। आसनं प्राणायामः ध्यानमित्यादयः।

4. यमनियमादीनाम् प्रयोगाः ।
5. पुस्तकालय-परियोजना – कमप्येकं योगसिद्धान्तम् अधिकृत्य कयोरपि द्वयोः आचार्ययोः मतसंकलनं समीक्षणं च ।
6. योगदर्शनस्य दर्शनान्तरैः सह तुलनात्मकम् अध्ययनदृशा परियोजना/प्रश्नमञ्च/भाषणदृश्यांकन-कार्याणि ।
7. योगशास्त्रस्य प्रकरणविशेषे प्रयुक्तानां पारिभाषिकपदानां संकलनपरियोजना ।

आकलनप्रक्रिया (Mode of Assessment) - –

- आकलनप्रक्रिया परीक्षणाधारिता प्रायोगिककार्याधारिता च भविष्यति।

प्रवचनप्रक्रिया (Mode of Transaction) -

- व्याख्यान-प्रश्नोत्तरद्वारा संवादः सम्प्रेषणं च - पाठ्यप्रकरणविशेषमवलम्ब्य आदौ सिद्धान्तस्वरूपबोधकं विविधनिदर्शनसमन्वितं व्याख्यानं तदनु च व्याख्याते अंशे प्रश्नानां द्वारा सम्प्रेषितस्य पाठ्यांशस्य दृढीकरणम् । उत्थाप्यसमाधानपद्धतिः अपि आश्रयणीया । छात्राध्यापकाः विषयसम्बद्धान् अधिकाधिकप्रश्नान् यथा पृच्छेयुः तथा प्रेरणीयाः । (व्याख्यानद्वारा/PPT द्वारा) ।
- वृत्तिकारस्य लक्षणपरिष्कारशैलीं यथा ते अवगच्छेयुः अपि च स्वयमपि परिष्कार-सङ्गतिं च प्रतिपादयितुं यथा समर्थाः भवेयुः तथा अन्यानि अपि लौकिकनिदर्शनानि स्वीकृत्य अभ्यासः कारणीयः । (व्याख्यानद्वारा/PPT द्वारा)।

सन्दर्भग्रन्थाः (Reference Books) –

- योगदर्शनम् - महर्षिः पतञ्जलिः, चौखम्बा प्रकाशन, वाराणसी
- योगसूत्रभोजवृत्ति - महाराजभोजः, जगदीशसंस्कृतपुस्तकालयः, जयपुर
- योगस्य भाषा संस्कृतम् - संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली

दर्शनम् - 4

3.1 पदार्थपरिचयः (तर्कभाषा)

सत्रार्द्धः– 2 **श्रेयोऽङ्कः- 4**

पाठ्यपरिचयः (About the course) -

भारतीयन्यायशास्त्रस्य पदार्थविचारान् परिज्ञातुम् इदं पाठ्यं परिकलितं विद्यते । एतस्मिन् पाठ्यविषये न्यायनये प्रवेशं प्राप्तुं समुत्सुकानां कृते सरलया रीत्या न्यायदर्शनस्य प्रमेयानि पदार्थाश्च वर्णिताः सन्ति। संस्कृतजगति पद-वाक्य-प्रमाणशास्त्राणि प्रसिद्धानि सन्ति। तत्र पदशास्त्रं नाम व्याकरणम्, वाक्यशास्त्रं नाम मीमांसा, प्रमाणशास्त्रं नाम न्यायशास्त्रम्। तदेतस्य प्रमाणशास्त्रस्य सरलतया बोधनाय श्रीमता केशवमिश्रेण तर्कभाषा विरचिता। एतस्मिन् पाठ्यविषये निर्धारिताः न्यायशास्त्रस्य प्रमेयविचाराः अध्येतुः पदार्थबोधाय उपकारकाः भवन्ति।

अधिगमपरिणामाः (Learning Outcomes) – एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः

- न्यायदर्शनस्य तत्त्वमीमांसां विज्ञापयितुं समर्थाः भविष्यन्ति।
- न्याय-शास्त्रस्य तर्कप्रणालीं बोधयितुं शक्ष्यन्ति।
- न्यायदर्शनस्य वादप्रक्रियां प्रबोधयितुं प्रभविष्यन्ति
- न्यायशास्त्रस्य सिद्धान्तान् प्रस्थानभेदांश्च पाठयितुं प्रभविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	पदार्थपरिचयः (तर्कभाषा)	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) -1

प्रमेयबोधः

- न्यायदर्शनस्य तत्त्वमीमांसा
- प्रमेयाणि
- आत्मनिरूपणम् (आत्मनः लक्षणम्, आत्मनः अस्तित्वे प्रमाणम्)
- न्यायमतेन ईश्वरनिरूपणम्
- शरीरम्
- इन्द्रियाणि

पाठ्यांशः(Unit) - 2

पदार्थबोधः

- अर्थाः (षड् पदार्थाः)
- द्रव्याणि
- कार्यद्रव्याणाम् उत्पत्तिविनाशक्रमः
- परमाणुलक्षणम्
- गुणाः
- कर्माणि
- सामान्यम्

पाठ्यांशः(Unit) - 3

पदार्थपरिचयः

- विशेषः
- समवायः
- अभावः तद्भेदाश्च
- बुद्धिः
- मनः
- प्रवृत्तिः
- दोषाः
- प्रेत्यभावः
- फलम्
- दुःखम्
- अपवर्गः

पाठ्यांशः(Unit)- 4

तत्त्वबोधः

- संशयः तद्भेदाश्च
- प्रयोजनम्
- दृष्टान्तः
- सिद्धान्तः
- अवयवाः
- तर्कः
- निर्णयः

- वादः
- जल्पः
- वितण्डा
- हेत्त्वाभासाः
- च्छलम्
- जातिः
- निग्रहस्थानम्

प्रायोगिकम् (Practicum) – अस्मिन् पाठ्ये छात्राध्यापकैः करणीयाः प्रयोगाः -

- न्यायदर्शनस्य प्रमुखसिद्धान्तानां प्रबोधनाभ्यासः, लेखनं भाषणं च।
- पूर्वपक्षम् अवलोक्य सिद्धान्तपक्षस्य सिद्धान्तपक्षमवलोक्य वा पूर्वपक्षस्य प्रवचनम्।
- उदाहरणवाक्यम् अवलोक्य हेत्त्वाभासान्वेषणम्।
- पुस्तकालय-परियोजना – कमप्येकं न्यायसिद्धान्तम् अधिकृत्य कयोरपि द्वयोः आचार्ययोः मतसंकलनं समीक्षणं च।
- न्यायदर्शनस्य दर्शनान्तरैः सह तुलनात्मकम् अध्ययनदृशा परियोजना/प्रश्नमञ्च/भाषणदृश्यांकन-कार्याणि।
- न्यायशास्त्रस्य प्रकरणविशेषे प्रयुक्तानां पारिभाषिकपदानां संकलनपरियोजना।

प्रवचनप्रक्रिया (Mode of Transaction) –

- न्यायदर्शनस्य प्रवचने उद्देश्यलक्षणपरीक्षाक्रमेण छात्राध्यापकाः बोधनीयाः । न्यायदर्शनस्य लक्षणपरिष्कारशैलीं यथा ते अवगच्छेयुः अपि च स्वयमपि परिष्कार-सङ्गतिं च प्रतिपादयितुं यथा समर्थाः भवेयुः तथा अन्यानि अपि लौकिकनिदर्शनानि स्वीकृत्य अभ्यासः कारणीयः।
- व्याख्यान-प्रश्नोत्तरद्वारा संवादः सम्प्रेषणं च - पाठ्यप्रकरणविशेषमवलम्ब्य आदौ सिद्धान्तस्वरूपबोधकं विविधनिदर्शनसमन्वितं व्याख्यानं तदनु च व्याख्याते अंशे प्रश्नानां द्वारा सम्प्रेषितस्य पाठ्यांशस्य दृढीकरणम् । उत्थाप्यसमाधानपद्धतिः अपि आश्रयणीया । छात्राध्यापकाः विषयसम्बद्धान् अधिकाधिकप्रश्नान् यथा पृच्छेयुः तथा प्रेरणीयाः।

आकलनप्रक्रिया (Mode of Assessment) –

- आकलनप्रक्रिया परीक्षणाधारिता प्रायोगिककार्याधारिता च भविष्यति।

सन्दर्भग्रन्थाः (Reference Books)–

- तर्कभाषा - केशवमिश्र, चौखम्बा प्रकाशन, वाराणसी।
- तर्कसङ्ग्रहः - अन्नम्भट्टः, चौखम्बा प्रकाशन, वाराणसी।

दर्शनम् -5

3.1 नव्यन्यायभाषाप्रदीपः

सत्रार्द्धः - 2 **श्रेयोऽङ्कः- 4**

पाठ्यपरिचयः (About the course)

नव्यन्यायशास्त्रस्य पारिभाषिकशब्दान् भाषाशैलीं शास्त्रवैशिष्ट्यञ्च परिज्ञातुम् इदं पाठ्यं परिकलितं विद्यते। एतस्मिन् पाठ्यविषये नव्यन्यायनये प्रवेशं प्राप्तुं समुत्सुकानां छात्राणां कृते सरलया रीत्या नव्यन्यायदर्शनस्य विषयाः वर्णिताः सन्ति। संस्कृतजगति पद-वाक्य-प्रमाणशास्त्राणि प्रसिद्धानि सन्ति। तत्र प्रमाणशास्त्रं नाम न्यायशास्त्रम्। प्राचीन-नव्यभेदेन प्रमाणशास्त्रं द्विधा व्यवस्थापितमस्ति। तदेतस्य प्रमाणशास्त्रस्य उत्कर्षः नव्यन्याये विद्यते। नव्यन्यायशास्त्रस्य सरलतया बोधनाय श्रीमता महामहोपाध्यायेन महेशचन्द्रन्यायरत्नेन नव्यन्यायभाषाप्रदीपः विरचितः। अयं पाठ्यविषयः नव्यन्यायस्य भाषाशैलीम् अधिगन्तुं नव्यन्यायमतेन च सिद्धान्तावबोधाय उपकारको भविष्यति।

अधिगमपरिणामाः (Learning Outcomes)

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः

- नव्यन्यायस्य सिद्धान्तान् पाठयितुं प्रभविष्यन्ति।
- नव्यन्याय-शास्त्रस्य तर्कप्रणालीं बोधयितुं शक्ष्यन्ति।
- नव्यन्यायस्य पारिभाषिकशब्दान् प्रबोधयितुं प्रभविष्यन्ति।
- नव्यन्यायशास्त्रस्य भाषाशैलीं शास्त्रवैशिष्ट्यञ्च विज्ञापयितुं समर्थाः भविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	नव्यन्यायभाषाप्रदीपः	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) – 1

नव्यन्यायप्रवेशः

- नव्यन्यायस्य परिचयः इतिहासश्च
- नव्यन्यायस्य प्रवृत्तयः वैशिष्ट्यं च
- नव्यन्यायपरम्परायाम् आचार्यमहेशचन्द्रन्यायरत्नस्य योगदानम्
- नव्यन्यायभाषाप्रदीपः वैशिष्ट्यम्
- धर्मपदस्य व्याख्यानम्
- जातेः स्वरूपम्

- सखण्डोपाधेः स्वरूपम्
- अखण्डोपाधेः स्वरूपम्
- जात्यखण्डोपाध्योर्मध्ये भेदकथनम्

पाठ्यांशः(Unit) – 2

नव्यन्यायसम्मतं सम्बन्धनिरूपणम्

- सम्बन्धस्य प्रयोजनम्
- साक्षात्सम्बन्धस्य व्याख्यानम्
- समवायसम्बन्धस्य निरूपणम्
- स्वरूपसम्बन्धस्य निरूपणम्
- परम्परासम्बन्धस्य व्याख्यानम्
- वृत्तिनियामकसम्बन्धस्य व्याख्यानम्
- वृत्त्यनियामकसम्बन्धस्य व्याख्यानम्
- कालिकसम्बन्धस्य निरूपणम्
- पर्याप्तिसम्बन्धस्य निरूपणम्
- सम्बन्धस्य प्रतियोगि-अनुयोगिकथनम्
- वृत्तिताऽधिकरणतयोः सापेक्षत्वप्रतिपादनम्

पाठ्यांशः(Unit) – 3

नव्यन्यायसम्मतम् अभावनिरूपणम्

- अभावस्य प्रतियोगि-अनुयोगिकथनम्
- सम्बन्धान्तरेण अभावकथनम्
- प्रतियोगितायाः अवच्छेदकनिरूपणम्
- सम्बन्धस्य प्रतियोगीतावच्छेदकत्वस्वीकारे युक्तिः
- धर्मस्य प्रतियोगितावच्छेदकत्वस्वीकारे युक्तिः
- अवच्छेदकनिरूपणम्
- अभावस्य प्रतियोगिकथनम्
- अभावस्य व्याप्यवृत्तिरव्याप्यवृत्तिकथनम्
- अन्योन्याभावस्य निरूपणम्
- संसर्गाभावस्य निरूपणम्

पाठ्यांशः(Unit) – 4

नव्यन्यायस्य विषयावबोधः

- निर्विकल्पकज्ञानस्य स्वरूपम्
- सविकल्पकज्ञानस्य स्वरूपम्
- विशिष्टवैशिष्ट्यावगाहिज्ञानस्य स्वरूपम्
- सिद्धविशेषणस्य निरूपणम्
- साध्यविशेषणस्य निरूपणम्
- विधेयस्य विधानम्
- प्रकारता-विशेष्यतयो: च मुख्यत्वप्रतिपादनम्
- निश्चयस्य स्वरूपम्
- संशयनिरूपणम्
- समूहालम्बनस्य संशयात् भेदकथनम्
- सम्भावनानिरूपणम्

प्रायोगिकम् (Practicum)

अस्मिन् पाठ्ये छात्राध्यापकैः करणीयाः प्रयोगाः -

- नव्यन्यायस्य प्रमुखसिद्धान्तानां प्रबोधनाभ्यासः लेखनं भाषणं च।
- पुस्तकालयपरियोजना- कमप्येकं न्यायसिद्धान्तम् अधिकृत्य कयोरपि द्वयोः आचार्ययोः मतसंकलनं समीक्षणं च।
- नव्यन्यायस्य दर्शनान्तरैः सह तुलनात्मकम् अध्ययनदृशा परियोजना/प्रश्नमञ्च/भाषणदृश्यांकनकार्याणि।
- नव्यन्यायशास्त्रस्य प्रकरणविशेषे प्रयुक्तानां पारिभाषिकपदानां संकलनपरियोजना।
- नव्यन्यायशैल्या शास्त्रार्थप्रस्तुतिः |

आकलनप्रक्रिया (Mode of Assessment)

- आकलनप्रक्रिया परीक्षणाधारिता प्रायोगिककार्याधारिता च भविष्यति।
- छात्रस्य कक्षायां अधिगमसामर्थ्यं परियोजनाकार्याणि प्रयोगकार्याणि च समीक्ष्य आकलनं विधेयम्।

प्रवचनप्रक्रिया (Mode of Transaction)

- न्यायदर्शनस्य प्रवचने उद्देशलक्षणपरीक्षाक्रमेण छात्राध्यापकाः बोधनीयाः। न्यायदर्शनस्य लक्षणपरिष्कारशैलीं यथा ते अवगच्छेयुः अपि च स्वयमपि परिष्कार-सङ्गतिं च प्रतिपादयितुं यथा समर्थाः भवेयुः तथा अन्यानि अपि लौकिकनिदर्शनानि स्वीकृत्य अभ्यासः कारणीयः।
- व्याख्यान-प्रश्नोत्तरद्वारा संवादः सम्प्रेषणं च पाठ्यप्रकरणविशेषमवलम्ब्य आदौ सिद्धान्तस्वरूपबोधकं विविधनिदर्शनसमन्वितं व्याख्यानं तदनु च व्याख्याते अंशे प्रश्नानां द्वारा सम्प्रेषितस्य पाठ्यांशस्य

दृढीकरणम्। उत्थाप्यसमाधानपद्धतिः अपि आश्रयणीया। छात्राध्यापकाः विषयसम्बद्धान् अधिकाधिकप्रश्नान् यथा पृच्छेयुः तथा प्रेरणीयाः।

सन्दर्भग्रन्थाः (Reference Books)

- महेशचन्द्रन्यायरत्नः, नव्यन्यायभाषाप्रदीपः, द्वितीयसंस्करणम्, (2025), : अहमदाबाद, पार्श्वपब्लिकेशन।
- अन्नम्भट्टः, तर्कसङ्ग्रहः, (2001), वाराणसी: विश्वविद्यालय प्रकाशन।
- वि. नवीनहोळळः, तर्कप्रवेशः गौतमसरणिः, देहली: संस्कृतसंवर्धनप्रतिष्ठानम्।
- वि. नवीनहोळळः, तर्कप्रवेशः काणादसरणिः, देहली: संस्कृतसंवर्धनप्रतिष्ठानम्।

दर्शनम् -6

3.1 नव्यन्यायः (न्यायसिद्धान्तमुक्तावली)

सत्रार्द्धः – 3 **श्रेयोऽङ्कः- 4**

पाठ्यपरिचयः (About the course)

नव्यन्यायशास्त्रस्य सिद्धान्तान् परिज्ञातुम् इदं पाठ्यं परिकलितं विद्यते । अयं पाठ्यविषयः नव्यन्यायस्य लक्षणपरिष्कारात्मिकां शैलीम् अधिगन्तुं नव्यन्यायमतेन च पदार्थबोधाय उपकारको भविष्यति। संस्कृतजगति पद-वाक्य-प्रमाणशास्त्राणि प्रसिद्धानि सन्ति । तत्र पदशास्त्रं नाम व्याकरणम्, वाक्यशास्त्रं नाम मीमांसा, प्रमाणशास्त्रं नाम न्यायशास्त्रम् । तदेतस्य प्रमाणशास्त्रस्य उत्कर्षः नव्यन्याये विद्यते । एतस्मिन् पाठ्यविषये निर्धारिताः नव्यन्यायशास्त्रस्य पदार्थविचाराः अध्येतुः शास्त्रबोधाय उपकारकाः भवन्ति ।

अधिगमपरिणामाः (Learning Outcomes) –

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः

- नव्यन्यायस्य तत्त्वमीमांसां विज्ञापयितुं समर्थाः भविष्यन्ति।
- न्याय-शास्त्रस्य तर्कप्रणालीं बोधयितुं शक्ष्यन्ति ।
- नव्यन्यायस्य लक्षणपरिष्कारान् प्रबोधयितुं प्रभविष्यन्ति
- न्यायशास्त्रस्य सिद्धान्तान् प्रस्थानभेदांश्च पाठयितुं प्रभविष्यन्ति ।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	नव्यन्यायः (न्यायसिद्धान्तमुक्तावली)	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) -1

नव्यन्यायप्रवेशः

- नव्यन्यायस्य परिचयः इतिहासश्च
- नव्यन्यायस्य प्रवृत्तयः वैशिष्ट्यं च
- नव्यन्यायपरम्परायाम् आचार्यविश्वनाथपञ्चाननभट्टाचार्यस्य योगदानम्
- न्यायसिद्धान्तमुक्तावल्याः वैशिष्ट्यम्
- मङ्गलवादः
- मङ्गलस्य फलविचारः
- ईश्वरास्तित्ववादः

- पदार्थविभागः
- शक्तिसादृश्यपूर्वपक्षः
- शक्तिसादृश्यादीनाम् अतिरिक्तपदार्थत्वखण्डनम्
- द्रव्यविभागः
- द्रव्यत्वजातिसिद्धिः
- तमसो द्रव्यत्वे पूर्वपक्षः
- तमसो द्रव्यत्वे सिद्धान्तपक्षः
- गुणविभागः

पाठ्यांशः(Unit) - 2

नव्यन्यायपरिचयः

- कर्मविभागः
- सामान्यनिरूपणम्
- जातिनिरूपणम्
- जातेः परापरभेदौ
- विशेषनिरूपणम्
- समवायनिरूपणम्
- समवायसिद्धिः
- अभावनिरूपणम्
- अभावभेदाः
- अभावानाम् अधिकरणात्मकत्वखण्डानम्
- पदार्थानां साधर्म्यम्
- पदार्थानां वैधर्म्यम्
- पारिमाण्डल्यभिन्नानां कारणत्वम्
- प्रासङ्गिककारणत्वनिरूपणम्
- कारणलक्षणपरिष्कारः

पाठ्यांशः(Unit) - 3

नव्यन्यायबोधः

- समवायिकारणम्
- असमवायिकारणम्
- निमित्तकारणम्

- अन्यथासिद्धनिरूपणम्
- प्रथमम् अन्यथासिद्धम् - दण्डत्वम्
- द्वितीयम् अन्यथासिद्धम् – दण्डरूपम्
- तृतीयम् अन्यथासिद्धम् – घटकादिकं प्रति आकाशस्य
- चतुर्थम् अन्यथासिद्धम् – कुलालपितुः घटं प्रति
- पञ्चमम् अन्यथासिद्धम् – रासभादिः
- द्रव्यस्य गुणकर्मणोश्च साधर्म्यम्
- नित्यद्रव्यभिन्नानां साधर्म्यम्
- पञ्चद्रव्यसाधर्म्यनिरूपणम्
- पृथिव्यादिचतुष्ट्यसाधर्म्यम्
- अव्याप्यवृत्ति-क्षणिकविशेषगुणवत्त्वम्
- क्षित्यादित्रिकद्वयसाधर्म्यनिरूपणं भूतात्मनोः साधर्म्यं च

पाठ्यांशः(Unit) - 4

नव्यन्यायतत्त्वबोधः

- सामान्यतो द्रव्यगुणनिरूपणम्
- द्रव्याणां परस्परं साधर्म्यम्
- द्रव्याणां परस्परं वैधर्म्यम्
- पृथिवीत्वजातिसिद्धिः
- पृथिवी-लक्षणं
- पृथिव्याः लक्षणपरिष्कारः
- पाषाणे गन्धसिद्धिः
- नानारूपवती पृथिवी
- पार्थिवस्पर्शनिरूपणम्
- पृथिवी-भेदाः
- परमाणुपुञ्जवादिपूर्वपक्षः
- अवयविसिद्धिः
- परमाणुत्वसाधनम्
- पार्थिवं शरीरम्
- पार्थिवम् इन्द्रियम्
- पार्थिवो विषयः

प्रायोगिकम् (Practicum) –

अस्मिन् पाठ्ये छात्राध्यापकैः करणीयाः प्रयोगाः -

- नव्यन्यायस्य प्रमुखसिद्धान्तानां प्रबोधनाभ्यासः, लेखनं भाषणं च।
- पूर्वपक्षम् अवलोक्य सिद्धान्तपक्षस्य सिद्धान्तपक्षमवलोक्य वा पूर्वपक्षस्य प्रवचनम्।
- लक्षणवाक्यम् अवलोक्य तत्र परिष्कारादिकथनम्।
- पुस्तकालय-परियोजना – कमप्येकं न्यायसिद्धान्तम् अधिकृत्य कयोरपि द्वयोः आचार्ययोः मतसंकलनं समीक्षणं च।
उत्तमशैक्षणिकसामग्र्याः शिक्षणविधीनां च ज्ञानं प्राप्य एव कश्चन शिक्षकः गुणवत्तान्वितः शिक्षणव्यवसायकुशलश्च भवितुमर्हति। विविधैः शोधकार्यैः प्रमाणितं यत् यदि उत्तमशिक्षणविधिभिः अनुभवाधारितं भाषाशिक्षणं क्रियेत, तर्हि बालाः शीघ्रमेव भाषाधिकारं प्राप्नुवन्ति इति। एतदपि सर्वविदितं तथ्यमस्ति यत् मातृभाषेतरभाषां बोधयितुं यदि वातावरणनिर्माणं सम्यक्तया भवेत्, तर्हि अत्यल्पसमये एव बालाः मातृभाषेतरभाषासु अपि दक्षाः जायन्ते। वातावरणनिर्माणदृष्ट्या राष्ट्रीयशिक्षानीतौ 2020 समर्थितमस्ति यत् कक्ष्यासु सरलमानकसंस्कृतमाध्यमेन रोचकम् अनुभवात्मकं समकालिकं च संस्कृतशिक्षणं भवेत्। अतः माध्यमिकस्तरे संस्कृतशिक्षणोद्देश्यानि, शिक्षणस्य गुणवत्तावर्धनोपायाः, भाषाशिक्षणसिद्धान्ताः, शिक्षणसूत्राणि, शिक्षणस्य उपागमाः, विधयः, प्रविधयः, गद्यपद्यव्याकरणादीनां शिक्षणपाठयोजनाः, आदर्शप्रश्नपत्रनिर्माणं च इत्यादीनां विषये ज्ञात्वा एव शिक्षकः कक्ष्यायां प्रवेशं कुर्यात्। संस्कृतपाठ्यपुस्तकानि अपि सरलमानकसंस्कृतेन युगानुकूलतया रचितानि स्युः। तत्र भाषासारल्यम्, विषयवैविध्यम्, भाषाभ्यासबाहुल्यम्, रुचिप्रवर्धनं मुद्रणसौन्दर्यं च इत्यादिगुणैः युक्तानि संस्कृतपाठ्यपुस्तकानि सर्वेषु स्तरेषु रचनीयानि। पाठेषु बहुवर्णचित्राणाम्, उदाहरणानाम्, अभ्यासकार्याणां च पर्याप्तरूपेण समुपयोगः स्यात्। शिक्षणे सूचनासम्प्रेषणप्रौद्योगिकीनां नवाचाराणां च प्रयोगः अपि स्यात्, येन शिक्षणं रुचिपूर्णं समसामयिकं च जायेत। शिक्षणाय पाठयोजनायां श्रवणम्, भाषणम्, पठनं लेखनं च इत्येतेषां चतुर्णाम् अपि भाषाकौशलानाम् विकासाय गतिविधयः स्युः। पाठ्यसहगामिक्रियाभिः विविधावसरेषु संस्कृतभाषायाः कृते अनुकूलितं वातावरणनिर्माणं निर्मातव्यम्। मूल्याङ्कनमपि रोचकविधिभिः प्रायोगिकं परियोजनाधारितं च भवेत्।

अधिगमपरिणामाः (Learning Outcomes)

एतस्य पाठ्यक्रमस्य सम्पूर्तौ अध्येता सामर्थ्यवान् भविष्यति -

- विविधस्तरेषु संस्कृतशिक्षणस्य वर्तमानस्थितिम् अपेक्षितस्थितिं च ज्ञातुम्।
- माध्यमिकस्तरस्य संस्कृतपाठ्यपुस्तकस्थानां पाठानां सामान्यानि विशिष्टानि च उद्देश्यानि निर्धारयितुम्।
- शिक्षणस्य गुणवत्तावर्धनाय कक्षायाः पूर्वम्, अन्तः पश्चात् च करणीयाः क्रियाः ज्ञातुम्।
- भाषाशिक्षणस्य सिद्धान्तानां सूत्राणां च आत्मनः शिक्षणे प्रयोगप्रवीणतां सम्पादयितुम्।
- उत्तमं संस्कृतशिक्षणं कर्तुं उगमानाम्, विधीनाम्, प्रविधीनां च प्रयोगपद्धतिं ज्ञातुम्।
- संस्कृतसम्भाषणशिबिरपद्धतेः वैशिष्ट्यं तत्पद्धत्या शिक्षणकौशलं च अर्जयितुम्।
- संस्कृतपाठ्यपुस्तकानां समीक्षणं पाठ्यवस्तुविश्लेषणं च कर्तुम्।
- सरलमानकसंस्कृतेन गद्यपद्यव्याकरणादीनां पाठयोजनानिर्माणं पाठप्रबोधनकौशलं च अर्जयितुम्।
- मूल्याङ्कनस्य विविधोपायान् ज्ञात्वा नीलपत्राधारितम् आदर्शप्रश्नपत्रं निर्मातुम्।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	संस्कृतशिक्षणशास्त्रम् -2	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) - 1

संस्कृतशिक्षणस्य उद्देश्यानि, सूत्राणि सिद्धान्ताः च

- संस्कृतशिक्षायाः परम्परागतधारा आधुनिकधारा च।
- माध्यमिकस्तरे ब्लूमशिक्षणोद्देश्यानां वर्गीकरणं संस्कृतशिक्षणस्य विविधानि उद्देश्यानि च।
- कक्षायाः पूर्वम् अन्तः पश्चात् च संस्कृतशिक्षणस्य गुणवत्तावर्धनोपायाः।
- **भाषाशिक्षणसिद्धान्ताः**
  1. स्वाभाविकतासिद्धान्तः
  2. अभ्याससिद्धान्तः
  3. रुचिसिद्धान्तः
  4. अभिप्रेरणासिद्धान्तः
  5. मौखिककार्यसिद्धान्तः
  6. क्रियाशीलतासिद्धान्तः
  7. वैयक्तिकभिन्नतासिद्धान्तः
  8. जीवनोपयोगितासिद्धान्तः
- **शिक्षणसूत्राणि**
  1. ज्ञातात् अज्ञातं प्रति
  2. सरलात् कठिनं प्रति
  3. मूर्तात् अमूर्तं प्रति
  4. पूर्णात् अंशं प्रति
  5. विश्लेषणात् संश्लेषणं प्रति
  6. आगमनात् निगमनं प्रति
  7. अनिश्चितात् निश्चितं प्रति
  8. विशिष्टात् सामान्यं प्रति

पाठ्यांशः(Unit) - 2

संस्कृतशिक्षणस्य उपागमाः, विधयः प्रविधयः पाठयोजनाश्च

- **शिक्षणोपागमाः**
  1. सम्प्रेषणात्मकोपागमः 2. संरचनात्मकोपागमः 3. सङ्ग्रन्थनोपागमः
- **शिक्षणविधयः**
  1. परम्परागतमौखिकविधिः
  2. भाण्डारकर-विधिः
  3. पाठ्यपुस्तकविधिः
  4. व्याख्याविधिः
  5. आगमन-निगमनविधिः
  6. दण्डान्वय-खण्डान्वयविधिः
  7. व्याख्याविधिः
  8. प्रत्यक्षविधिः
  9. समन्वयविधिः
- **शिक्षणप्रविधयः**
  1. सम्प्रत्ययचित्रम् 2. वाक्यप्रयोगः 3. भाषाक्रीडा 4. मस्तिष्क -उद्वेलनम्
- **गद्यम्, पद्यम्, व्याकरणम्, कथा च इत्येतेषाम् आदर्शपाठयोजनानिर्माणं शिक्षणं च।**
- **मूल्याङ्कनविधयः आदर्शप्रश्नपत्रनिर्माणं च**
  - मूल्याङ्कनस्य पारम्परिकाधुनिकप्रविधयः
  - आदर्शप्रश्नपत्रस्य गुणाः

- नीलपत्राधारितम् आदर्शप्रश्नपत्रनिर्माणम्

प्रायोगिकम् (Practicum)

1. संस्कृतसम्भाषणशिबिरपद्धतेः प्रायोगिकाभ्यासः।
2. संस्कृतशिक्षणे रुचिवर्धकोपायानां विषये व्यक्तिगतप्रतिवेदननिर्माणं सामूहिकचर्चा च।
3. माध्यमिकस्तरे संस्कृतशिक्षणस्य विविधानाम् उद्देश्यानां निर्धारणे कौशलावाप्तिः।
4. संस्कृतशिक्षणस्य पारम्परिकविधीनाम् आधुनिकविधीनां च तुलनात्मकं विवरणपत्त्रनिर्माणम्।
5. माध्यमिकस्तरीयस्य संस्कृतपाठ्यपुस्तकस्य समीक्षासम्पादनम्।
6. संस्कृतस्य विकासाय दशवार्षिकयोजनायाः अध्ययनं समूहचर्चा च।
7. संस्कृतशिक्षणाय विशिष्टोपकरणानां दृश्यश्रव्यसाधनानां वा निर्माणम्।
8. संस्कृतशिक्षणस्य उपागमानाम्, विधीनां प्रविधीनां च विषये सत्रीयकार्यलेखनं प्रयोगाभ्यासश्च।
9. गद्यम्, पद्यम्, व्याकरणं कथा च इत्येतेषां स्थूलपाठयोजनायाः निर्माणम्।
10. माध्यमिकस्तरीयसंस्कृतप्रश्नपत्राणां समीक्षणं नीलपत्राधारितम् आदर्शप्रश्नपत्रनिर्माणकौशलस्य अर्जनं च।

प्रवचनप्रक्रिया (Mode of Transaction)

पाठ्यक्रमसामग्र्याः प्रवचनप्रक्रियायाम् अधोलिखितपाठ्यांशाः सम्मिलिताः भविष्यन्ति -

- पीपीटी/बहुमाध्यमयुक्तं सुनियोजितं व्याख्यानम्।
- लघुसमूहचर्चा, सामूहिकी अन्तःचर्चा, समूहाणां पारस्परिकचर्चा, लघुविषयकेन्द्रिता सङ्गोष्ठी, सहयोगात्मकशिक्षणं दलशिक्षणं च, सम्प्रत्ययचित्रनिर्माणम्, अल्पकालिकपरियोजनाकार्यम्।
- कक्ष्यायां शिक्षितांशस्य छात्राणां पक्षतः मौखिकरूपेण लिखितरूपेण वा प्रस्तुतिः।

आकलनप्रक्रिया (Mode of Assessment)

मूल्याङ्कनं परीक्षणाधारितं सत्रीयकार्याधारितं च भविष्यति।

सन्दर्भग्रन्थाः (Reference Books)

शिक्षकः विद्यार्थिनाम् आवश्यकतानुगुणं स्वाध्यायसामग्र्याः अनुगुणं च पुस्तकानां पाठ्यसामग्रीणां च विषये परामर्शं दातुं शक्नोति।

- शर्मा, कुलदीप, संस्कृतशिक्षणभूमिका, केन्द्रीय संस्कृत विश्वविद्यालय, नई दिल्ली, **2022**।
- शर्मा, कुलदीप, संस्कृतशिक्षणदीपिका, केन्द्रीय संस्कृत विश्वविद्यालय, नई दिल्ली, **2022**।
- युग्राण, मनीष, शास्त्रशिक्षणम्, केन्द्रीय संस्कृत विश्वविद्यालय, नई दिल्ली, **2022**।
- रामशास्त्री, आचार्य, संस्कृत शिक्षण सरणी, आर्ष साहित्य प्रचार ट्रस्ट, गाजियाबाद, **2023**।
- आप्टे, वामन शिवराम, संस्कृत-हिन्दी कोश, मोतीलाल बनारसीदास, दिल्ली।

4.3 शास्त्रशिक्षणशास्त्रम्
(Pedagogy of Shastras)
साहित्यशिक्षणपद्धतिः
(Methodology of Sahitya)

सत्रार्द्धः – 5 **श्रेयोऽङ्कः – 04**

पाठ्यपरिचयः (About the Course)-

साहित्यशिक्षणं भाषाशिक्षणं रुचिकरं सम्पादयति। साहित्यसङ्गीतकलाविहीनः पशुतुल्यः भवति इत्यपि उच्यते। अतः साहित्यशिक्षणम् एकीकृतशिक्षकशिक्षाकार्यक्रमे सन्निविष्टं वर्तते। साहित्येन विना शिक्षणम् अपूर्णं भवति । अत एव साहित्यस्य विविधेषु प्रकारेषु अर्थात् गद्ये पद्ये नाटके तदितरेषु विषयेषु च शिक्षकशिक्षार्थिनां सुखबोधाय पाठ्यांशाः प्रदत्ताः सन्ति। साहित्यशिक्षणज्ञानाय साहित्यशिक्षणप्रणाली अवश्यमेव आश्रयणीया। साहित्यशिक्षणप्रणाल्यां साहित्यस्य सम्प्रत्ययः प्रकारः वैशिष्ट्यम् उद्देश्यानि विधयः प्रायोगिकपक्षाः प्रत्याह्वानानि च प्राधान्येन निरूप्यन्ते।

अधिगमपरिणामाः (Learning Outcomes)

सत्रेऽस्मिन् एनं पाठ्यक्रममधीत्य....

1. साहित्यशिक्षणस्य महत्त्वं ज्ञास्यन्ति।
2. साहित्यशिक्षणस्य उद्देश्यानि अवगन्तुं प्रभविष्यन्ति।
3. गद्यपद्यनाटकशिक्षणविधीनां परिचयं प्राप्स्यन्ति।
4. छन्दोऽलङ्काराणां महत्त्वम् आवश्यकतां च अङ्गीकरिष्यन्ति।
5. साहित्यशास्त्रशैल्या अभिप्रेरिताः भविष्यन्ति।
6. रसानुभूतिसम्पादनक्षमतां धारयिष्यन्ति।
7. प्रसङ्गानुकूलं भावाभिव्यञ्जनक्षमताम् अधिगमिष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	साहित्यशिक्षणपद्धतिः	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) -1
साहित्यशास्त्रस्य सम्प्रत्ययः

1. साहित्यम् - अर्थः, वैशिष्ट्यम्, प्रकाराः।
2. गद्यपद्ययोः सामान्यपरिचयः।
3. दृश्यश्रव्यकाव्ययोः सामान्यपरिचयः।
4. रसगुणालङ्काराणां परिचयः।

5. रीतिछन्दसोः परिचयः।

पाठ्यांशः(Unit) - 2
विविधस्तरेषु शिक्षणोद्देश्यानि

1. साहित्यशिक्षणस्य सामान्यानि उद्देश्यानि।
2. गद्यपद्यशिक्षणयोः उद्देश्यानि - पारम्परिकाणि , आधुनिकानि।
3. नाटकशिक्षणोद्देश्यानि- पारम्परिकाणि , आधुनिकानि।
4. कथाशिक्षणोद्देश्यानि - पारम्परिकाणि , आधुनिकानि।

पाठ्यांशः(Unit) - 3
साहित्यशिक्षणप्रणाली

1. साहित्यशिक्षणप्रणालीनां सामान्यपरिचयः - पारम्परिकपद्धतयः, आधुनिकपद्धतयः
2. गद्यपद्ययोः पठनपाठनपद्धतयः - व्याख्यापद्धतिः, प्रश्नोत्तरपद्धतिः, दण्डान्वयखण्डान्वयपद्धती, टीकापद्धतिः, पाठ्यपुस्तकपद्धतिः, संयुक्तपद्धतिः।
3. नाटकस्य पठनपाठनपद्धतयः - कक्ष्याभिनयपद्धतिः, रङ्गमञ्चपद्धतिः, व्याख्यापद्धतिः, आदर्शनाट्यपद्धतिः।
4. कथाशिक्षणपद्धतयः - मौखिकपद्धतिः, सचित्रकथापद्धतिः , व्याख्यापद्धतिः।

पाठ्यांशः(Unit) - 4
साहित्यस्य अनुप्रयोगः

1. साहित्यशिक्षणावसरे अवधेयांशाः
2. गद्यपद्ययोः अनुप्रयोगः – प्राथमिकमाध्यमिकोच्चमाध्यमिकस्तरेषु
3. नाटकस्य अनुप्रयोगः – प्राथमिकमाध्यमिकोच्चमाध्यमिकस्तरेषु
4. मूल्ययुक्तकथानाम् अनुप्रयोगः - प्राथमिकमाध्यमिकोच्चमाध्यमिकस्तरेषु
5. साहित्यशिक्षणस्य प्रत्याह्वानानि

प्रायोगिकम् (Practicum)

साहित्यशिक्षणस्य प्रायोगिककार्यसम्पादनावसरे अधोलिखितेषु विकल्पेषु सन्दर्भोचितविकल्पस्य चयनं कर्तुं शक्यते।

1. सुभाषितकण्ठपाठः।

   अथवा

   शतश्लोकेन पण्डितः
2. रामायणपारायणविधिपरिचयः

   अथवा

   गीतापारायणसत्रम्
3. अन्त्याक्षरी

   अथवा

कक्ष्याभिनयसत्रम्

4. रूपकमहोत्सवस्य सारवर्णनम्

अथवा

स्थानीयनृत्यकलाविशेषाधारिताः परियोजनाः

प्रवचनप्रक्रिया (Mode of Transaction)

पाठ्यविषयाणां सम्प्रेषणे अधोलिखिताः बिन्दवः प्राथम्यं भजन्ते।

- साहित्यशिक्षणेन सम्बद्धं पाठ्यपुस्तकं स्वनिर्मितप्रवचनसामग्रीं चाश्रित्य शिक्षकः प्रवचनं दद्यात्।
- कविताकण्ठपाठेन, पारायणसत्राणाम् आयोजनेन, अभिनयविधेः सम्प्रयोगेण, अक्षरश्लोक्याः माध्यमेन, छन्दोवधानेन, आदर्शवाचनैः, प्रत्यक्षप्रणाल्या, तदितरैः उपायैः च प्रवचनप्रक्रिया सम्पादनीया।

आकलनम् (Mode of Assessment)

छात्राणां रचनात्मकक्रियाकलापैः नियतम् आकलनं शक्यम्। सत्रीयपरीक्षाप्रणाल्याः आयोजनेन अपि आकलनं करणीयम्। आकलनप्रक्रियायाः चयनावसरे साहित्यशिक्षणकुशलः आधुनिकीम् अन्तर्जालिकप्रविधिम् अपि आश्रयेत्। स्वाकलनाय आत्मपरीक्षणप्रविधेश्च प्रयोगः शक्यः।

सन्दर्भग्रन्थाः (Reference Books)

- दीक्षासरणिः - केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
- गीताप्रवेशः - संस्कृतसंवर्धनप्रतिष्ठानम् ।
- संस्कृतशिक्षणदीपिका - केन्द्रीयसंस्कृतविश्वविद्यालयः
- भाषिका - CD
- अन्तर्जालेषु उपलभ्यमानाः तन्त्रांशाः
- संस्कृतसाहित्यशास्त्रप्रवेशिनी - प्रथमः भागः, NSU तिरुपतिः
- संस्कृतसाहित्यशास्त्रप्रवेशिनी - द्वितीयः भागः, NSU तिरुपतिः

4.3 शास्त्रशिक्षणशास्त्रम्
(Pedagogy of Shastras)
व्याकरणशिक्षणपद्धतिः
(Methodology of Vyakarana)

सत्रार्द्धः – 5

श्रेयोऽङ्कः – 04
सैद्धान्तिकम् - 2.2
प्रायोगिकम् - 1.8

पाठ्यपरिचयः (About the Course)

व्याकरणशिक्षणं भाषाशिक्षणस्य आधारशिलाखण्डवद् वर्तते। विना व्याकरणं भाषाशिक्षणम् अपूर्णम् एव। अत एव 'यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ' इति हितोपदेशः। भाषायाः परिनिष्ठितानि रूपाणि अभिज्ञातुम् अपि व्याकरणशिक्षणम् अपेक्ष्यते। सन्धिसमासकारककृदन्ततिङन्तादीनां भाषिकतत्त्वानां परिज्ञानाभावे बालः भाषायाः परिशुद्धरूपाणि अवगन्तुं न शक्नोति। संस्कृतभाषाया अध्ययनाय अध्यापनाय च पाणिनीयं व्याकरणम् अनिवार्यम् अस्ति। पाणिनीयव्याकरणेन संस्कृता भाषा संस्कृतभाषा । अतः शिक्षकशिक्षायाः पाठ्यक्रमे व्याकरणशिक्षणपद्धतिः सन्निविष्टा वर्तते।

अधिगमपरिणामाः (Learning Outcomes)

सत्रेऽस्मिन् एनं पाठ्यक्रमम् अधीत्य -

1. व्याकरणशिक्षणस्य महत्त्वं ज्ञास्यन्ति।
2. व्याकरणशिक्षणोद्देश्यानि अवगन्तुं शक्ष्यन्ति।
3. सन्धिसमासकारककृदन्ततिङन्तानां परिचयं प्राप्स्यन्ति।
4. शब्दापशब्दज्ञानिनः भविष्यन्ति।
5. भाषाया वैज्ञानिकपक्षम् अङ्गीकरिष्यन्ति।
6. शब्दधातुरूपाणि स्मरिष्यन्ति।
7. व्याकरणदृष्ट्या शुद्धया भाषया व्यवहर्तुं प्रभविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	व्याकरणशिक्षणपद्धतिः	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) -1

व्याकरणस्य सम्प्रत्ययः

1. व्याकरणम् - अर्थः , वैशिष्ट्यम् , त्रिमुनिव्याकरणम्।
2. शब्दधातुरूपाणां सामान्यपरिचयः।
3. सन्धिसमासयोः सामान्यपरिचयः।

4. कारकाणां परिचयः।
5. कृदन्ततिङ्न्तयोः परिचयः ।

पाठ्यांशः(Unit) - 2

विविधस्तरेषु शिक्षणोद्देश्यानि

1. व्याकरणशिक्षणस्य (त्रिमुनिव्याकरणस्य) सामान्यानि उद्देश्यानि।
2. शब्दधातुरूपाणां शिक्षणोद्देश्यानि।
3. सन्धिसमासशिक्षणयोः उद्देश्यानि।
4. कारकशिक्षणोद्देश्यानि।
5. कृदन्ततिङ्न्तयोः शिक्षणोद्देश्यानि।

पाठ्यांशः(Unit) - 3

व्याकरणशिक्षणपद्धतिः

1. व्याकरणशिक्षणप्रणालीनां सामान्यपरिचयः।
2. शब्दधातुरूपाणां पठनपाठनप्रणाल्यः - शब्दरूपावलिपद्धतिः, धातुरूपावलिपद्धतिः, रूपचन्द्रिकाभ्यासपद्धतिः, कण्ठस्थीकरणपद्धतिः।
3. सन्धिसमासयोः पठनपाठनप्रणाल्यः - आगमनपद्धतिः, निगमनपद्धतिः, सूत्रविधिः, व्याख्या/विवरणविधिः, भाषासंसर्गपद्धतिः, पाठ्यपुस्तकपद्धतिः।
4. कारकाणां पठनपाठनप्रणाल्यः - सूत्रविधिः, उदाहरणविधिः, भाषासंसर्गपद्धतिः, पाठ्यपुस्तकपद्धतिः,
5. कृदन्ततिङ्न्तयोः पठनपाठनप्रणाल्यः - उदाहरणविधिः , भाषासंसर्गपद्धतिः, पाठ्यपुस्तकपद्धतिः, आकाङ्क्षापद्धतिः , तन्त्रांशानुशीलनपद्धतिः।

पाठ्यांशः(Unit) - 4

व्याकरणस्य अनुप्रयोगः

1. व्याकरणांशानां शिक्षणावसरे अवधेयांशाः।
2. सन्धिसमासयोः अनुप्रयोगः - प्राथमिक- माध्यमिक- उच्चमाध्यमिकस्तरेषु।
3. कारकाणाम् अनुप्रयोगः, प्राथमिक- माध्यमिक- उच्चमाध्यमिकस्तरेषु।
4. कृदन्ततिङन्तयोः अनुप्रयोगः, प्राथमिक- माध्यमिक- उच्चमाध्यमिकस्तरेषु।
5. व्याकरणशिक्षणस्य प्रत्याह्वानानि।

प्रायोगिकम् (Practicum)

व्याकरणशिक्षणस्य प्रायोगिककार्यसम्पादनावसरे अधोलिखितेषु विकल्पेषु सन्दर्भोचितविकल्पस्य चयनं कर्तुं शक्यते।

1. सन्धि- समास-कारकाणां गणशः तालिकानिर्माणम्।

   अथवा

   सन्धि-समास-कारकाणां तन्त्रांशानुप्रयोगः।
2. प्रौढरचनानुवादकौमुद्याधारिता परियोजना।

   अथवा

   शुद्धिकौमुद्याः व्याकरणांशानुगुणम् अभ्याससरणेः निर्माणम्।

3. शब्दधातुरूपाणां कण्ठपाठाभ्यासः।

अथवा

शब्दधातुरूपाणां गणशः पट्टिकानिर्माणम्।

4. व्याकरणस्य विविधतन्त्रांशाधारितानि प्रायोगिककार्याणि।

अथवा

अन्तर्जालस्रोतसां परिशीलनसत्राणि।

प्रवचनप्रक्रिया (Mode of Transaction)

पाठ्यविषयाणां सम्प्रेषणे अधोलिखिता बिन्दवः प्राथम्यं भजन्ते।

- व्याकरणशिक्षणेन सम्बद्धं पाठ्यपुस्तकं स्वनिर्मितप्रवचनसामग्रीं चाश्रित्य शिक्षकः प्रवचनं दद्यात्।
- व्याख्याविधिना आगमननिगमनविध्योः उपयोगेन उदाहरणपद्धत्या दृश्यश्रव्यसंसाधनैः विविधानां आधुनिकतन्त्राशानां साह्येन तदितरैः सार्थकोपक्रमैश्च प्रवचनकार्यं सम्पादयेत् ।

आकलनप्रक्रिया (Mode of Assessment)

छात्राणां रचनात्मकक्रियाकलापैः नियतम् आकलनं शक्यम्। सत्रीयपरीक्षाप्रणाल्याः आयोजनेन अपि आकलनं करणीयम्। आकलनप्रक्रियायाः चयने व्याकरणशिक्षणकुशलः आधुनिकीम् अन्तर्जालिकप्रविधिम् अपि आश्रयेत् । स्वाकलनाय आत्मपरीक्षणप्रविधेश्च प्रयोगः शक्यः। भाषिका, संस्कृतप्रवेशिका इत्याद्याः सान्द्रमुद्रिकाः विविधाः तन्त्रांशाश्च अपि आकलानावसरे उपकुर्वन्ति।

सन्दर्भग्रन्थाः (Reference Books)

- दीक्षासरणिः - केन्द्रीयसंस्कृतविश्वविद्यालयः , नवदेहली
- गीताप्रवेशः - संस्कृतसंवर्धनप्रतिष्ठानम् ।
- सन्धिः , समासः , कारकम् , शुद्धिकौमुदी , भाषापाकः - संस्कृतभारती , बेङ्गळूरु
- संस्कृतशिक्षणदीपिका - केन्द्रीयसंस्कृतविश्वविद्यालयः , नवदेहली
- भाषिका - CD
- अन्तर्जालेषु उपलभ्यमानाः तन्त्रांशाः
- व्याकरणशास्त्रप्रवेशिनी - प्रथमः भागः , NSU तिरुपतिः
- एतान्यतिरिच्य आधुनिकस्वाध्यायसामग्र्यः अपि शिक्षकः यथोचितं संसूचयेत् ।

4.3 शास्त्रशिक्षणशास्त्रम्
(Pedagogy of Shastras)
ज्यौतिषशिक्षणपद्धतिः
(Methodology of Jyotish)

सत्रार्द्धः – 5 **श्रेयोऽङ्कः -04**

पाठ्यपरिचयः (About the Course)

संस्कृतवाङ्मये अनन्तानि शास्त्राणि सन्ति। तेषु प्रत्यक्षं शास्त्रम् इति प्रथितं ज्योतिषमेव। ज्योतींषि ग्रहनक्षत्राणि इत्युच्यन्ते। ग्रहनक्षत्राणां परिज्ञानाय शास्त्रमिदम् अनिवार्यम्। वेदस्य षट्सु अङ्गेषु अन्यतमम् इदं ज्योतिषं तस्य नयनमिव विलसति। वेदास्तु यज्ञार्थमभिप्रवृत्ताः सन्ति। परन्तु यज्ञादीनां सम्पादनं कालानुगुणमेव। तत्र हि यज्ञोचितकालस्य ज्ञानाय अपि कालविधानशास्त्रस्य अर्थात् ज्योतिषशास्त्रस्य आवश्यकता विद्यते एव । एवं ज्योतिषम् अध्येयमेव इति फलितम्। सिद्धान्तभागः फलभागः इति भागद्वयं प्राधान्येन प्रवदन्ति सांवत्सरिकाः। ग्रहनक्षत्राणां पञ्चागानां विविधयोगानां लग्नानां दशादीनां विज्ञानाय ज्योतिषम् एकमेवाद्वितीयं साधनम् अस्ति। अतः एकीकृते शिक्षकशिक्षाकार्यक्रमे अपि ज्योतिषशास्त्रशिक्षणं सन्निविष्टम् अस्ति। अस्य शिक्षणपद्धतीनामपि ज्ञानं लाभाय एव वर्तते।

अधिगमपरिणामाः (Learning Outcomes)

सत्रेऽस्मिन् एनं पाठ्यक्रमम् अधीत्य -

1. ज्यौतिषशिक्षणस्य महत्त्वं ज्ञास्यन्ति।
2. ज्यौतिषशिक्षणोद्देश्यानि अवगन्तुं शक्ष्यन्ति।
3. ग्रहनक्षत्राणां परिचयं प्राप्स्यन्ति।
4. पञ्चाङ्गानुप्रयोगकौशलम् अर्जयिष्यन्ति ।
5. दशाभावादीनां महत्त्वम् अङ्गीकरिष्यन्ति।
6. ज्यौतिषशिक्षणपद्धतीः स्मरिष्यन्ति।
7. ज्यौतिषशास्त्रस्य सर्वकालोपयोगितां विज्ञातुं प्रभविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	ज्यौतिषशिक्षणपद्धतिः	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) - 1

- **ज्यौतिषशास्त्रस्य सम्प्रत्ययः**
    - ज्यौतिषम् अर्थः -, स्वरूपम् , वैशिष्ट्यं च ।
    - ज्यौतिषशास्त्रस्य सामान्यपरिचयः (स्कन्धत्रयात्मकस्य)।

- ○ तिथिवारनक्षत्रकरणयोगानां सामान्यपरिचयः।
- ○ ग्रहनक्षत्राणां सामान्यपरिचयः।
- ○ दशाभावादीनां मुहूर्ताणां च सामान्यपरिचयः।
- ○ ज्यौतिषस्य वैज्ञानिकतायाः सामान्य परिचयः।

पाठ्यांशः(Unit) -2

- **विविधस्तरेषु शिक्षणोद्देश्यानि**
  - ○ ज्यौतिषशास्त्रस्य सामान्यानि उद्देश्यानि ।
  - ○ पञ्चाङ्गशिक्षणोद्देश्यानि।
  - ○ ग्रहनक्षत्राणां गति-परिमाण-दूरादीनां शिक्षणोद्देश्यानि।
  - ○ कुण्डलीनिर्माणशिक्षणोद्देश्यानि।
    दशा - भाव - मुहूर्तादीनां शिक्षणोद्देश्यानि ।

पाठ्यांशः(Unit)- 3

- **ज्यौतिषशिक्षणपद्धतिः**
  - ○ ज्यौतिषशिक्षणपद्धतीनां सामान्यपरिचयः ।
  - ○ पञ्चाङ्गानां पठनपाठनपद्धतयः - व्याख्यापद्धतिः , दृष्टान्तपद्धतिः, विवरणपद्धतिः, पारायणपद्धतिः, चित्रपटपद्धतिः इत्याद्याः।
  - ○ व्याख्यापद्धति - ग्रहनक्षत्राणां पठनपाठनपद्धतयः, दृष्टान्तपद्धतिः, यन्त्रोपकरणपद्धतिः टीकापद्धतिः, विवरणपद्धतिः, सूत्रपद्धतिः इत्याद्याः।
  - ○ संवादपद्धतिः - दशाभावादीनां मुहूर्ताणां पठनपाठपद्धतयः, प्रत्यक्षपद्धतिः, प्रश्नोत्तरपद्धतिः, परियोजनापद्धतिः, स्वाध्यायपद्धतिः इत्याद्याः।

पाठ्यांशः(Unit) - 4
ज्यौतिषस्य अनुप्रयोगः

प्रायोगिकम् (Practicum)

ज्यौतिषशिक्षणस्य प्रायोगिककार्यसम्पादनावसरे अधोलिखितेषु विकल्पेषु सन्दर्भोचितविकल्पस्य चयनं कर्तुं शक्यते।

1. पञ्चाङ्गपारायणविधिः/ पञ्चाङ्गश्रवणपरम्परा।

   अथवा

   श्रीभोजपञ्चाङ्गकेन्द्रिता परियोजना।
2. ग्रहनक्षत्रादीनां वैज्ञानिकविश्लेषणसत्रम्।

   अथवा

   ग्रहनक्षत्रादीनां प्रदर्शनी।
3. ज्यौतिषशास्त्रीयप्रतिमानानां निर्माणाभ्यासः।

अथवा

ज्यौतिषशास्त्रीयोपकरणानां सज्जीकरणप्रविधिः।

4. अत्याधुनिकग्रहगणितविज्ञानसंसाधनानां परिचयकार्यशाला।

अथवा

ज्यौतिषशास्त्रस्य विविधतन्त्रांशानाम् अनुप्रयोगकार्यशाला।

प्रवचनप्रक्रिया (Mode of Transaction)

पाठ्यविषयाणां सम्प्रेषणे अधोलिखिताः बिन्दवः प्राथम्यं भजन्ते।

- ज्यौतिषशिक्षणेन सम्बद्धं पाठ्यपुस्तकं निर्दिष्टप्रवचनसामग्रीं चाश्रित्य शिक्षकः प्रवचनं दद्यात्।
- व्याख्यासूत्र-टीका-दृष्टान्त-पाठ्यपुस्तक-आगमननिगमनविध्योः उपयोगेन उदाहरण -पद्धत्या दृश्यश्रव्यसंसाधनैः विविधानां आधुनिकतन्त्राशानां साह्येन तदितरैः सार्थकोपक्रमैश्च प्रवचनकार्यं सम्पादयेत्।

आकलनम् (Mode of Assessment)

छात्राणां रचनात्मकक्रियाकलापैः नियतम् आकलनं शक्यम्। सत्रीयपरीक्षाप्रणाल्याः आयोजनेन अपि आकलनं करणीयम्। आकलनप्रक्रियायाः चयने ज्यौतिषशिक्षणकुशलः आधुनिकीम् अन्तर्जालिकप्रविधिम् अपि आश्रयेत्। स्वाकलनाय आत्मपरीक्षणप्रविधेश्च प्रयोगः शक्यः। विविधानि दूरदर्शकयन्त्राणि विविधाः तन्त्रांशाश्च अपि आकलानावसरे उपकुर्वन्ति।

सन्दर्भग्रन्थाः (Reference Books)

- ज्यौतिषशास्त्रपरिचयः - केन्द्रीयसंस्कृतविश्वविद्यालयः।
- वास्तुशास्त्रपरिचयः - केन्द्रीयसंस्कृतविश्वविद्यालयः।
- शास्त्रशिक्षणपद्धतिः - केन्द्रीयसंस्कृतविश्वविद्यालयः।
- मुहूर्तमाधवी - चौखम्बा-सुरभारती-प्रकाशनम्।
- तन्त्राशाः - अन्तर्जालेषु उपलभ्यमानाः।

4.3 शास्त्रशिक्षणशास्त्रम्
(Pedagogy of Shastras)
दर्शनशिक्षणपद्धतिः
(Methodology of Jyotish)

सत्रार्द्धः – 5 **श्रेयोऽङ्कः – 04**

पाठ्यपरिचयः (About the Course)

पदार्थः यथार्थतया येन दृश्यते तत् दर्शनम्। लौकिकपदार्थाः चक्षुरिन्द्रियगोचराः। अलौकिकपदार्थस्य दर्शनाय विशिष्टं साधनं चक्षुर्वा अपेक्ष्यते । तच्च ज्ञानम् एव। ज्ञानं तृतीयं मनुजस्य नेत्रम् इत्युच्यते । एवं ज्ञानाख्येन दिव्यचक्षुषा अलौकिकस्यापि पदार्थस्य दर्शनं शक्यते। ज्ञानेन एव अलौकिकपदार्थाः सुष्ठु दृश्यन्ते। अत एवोक्तं भगवता कृष्णेन - न हि ज्ञानेन सदृशं पवित्रमिह विद्यते इति। ज्ञानम् अनन्तम्। तदनु दर्शनान्यपि अनन्तानि सन्ति। प्राधान्येन आस्तिकदर्शनानि नास्तिकदर्शनानि इति विभागः विधीयते । ये वेदमङ्गीकुर्वन्ति ते आस्तिकाः, ये वेदं न अङ्गीकुर्वन्ति ते नास्तिकाः इति सामान्यव्यवहारः। अस्मिन् पाठ्यक्रमे दर्शनानां शिक्षणक्रमम् अधिकृत्य विविच्यते। दर्शनशिक्षणपद्धतीनां परिचयार्थं पठनपाठनप्रक्रियायाः विस्तरेण प्रस्तुतीकरणार्थं च दर्शनशिक्षणपद्धतिः इतीदं पत्रं सत्रेऽस्मिन् संयोजितमस्ति।

अधिगमपरिणामाः (Learning Outcomes)

सत्रेऽस्मिन् एनं पाठ्यक्रमम् अधीत्य -

1. दर्शनशिक्षणस्य महत्त्वं ज्ञास्यन्ति।
2. दर्शनशिक्षणोद्देश्यानि अवगन्तुं शक्ष्यन्ति।
3. आस्तिकनास्तिकदर्शनानां परिचयं प्राप्स्यन्ति।
4. लौकिक-अलौकिकपदार्थानां भेदिनः भविष्यन्ति।
5. आध्यात्मिकसिद्धान्तानां महत्त्वम् अङ्गीकरिष्यन्ति।
6. दर्शनशिक्षणपद्धतीः स्मरिष्यन्ति।
7. जीवः जगत् परलोकः मोक्षः इत्यादीनि तत्त्वानि विज्ञातुं प्रभविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	दर्शनशिक्षणपद्धतिः	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) - 1

- **दर्शनस्य सम्प्रत्ययः**
  - दर्शनम् - अर्थः , स्वरूपम् , वैशिष्ट्यं च ।

- आस्तिकदर्शनानां सामान्यपरिचयः।
- नास्तिकदर्शनानां सामान्यपरिचयः ।
- सूत्रवार्तिकभाष्याणां सामान्यपरिचयः।
- पाश्चात्यदर्शनानां सामान्यपरिचयः।

पाठ्यांशः(Unit) - 2

- **विविधस्तरेषु शिक्षणोद्देश्यानि**
  - आस्तिकदर्शनानां सामान्यानि उद्देश्यानि।
  - नास्तिकदर्शनानां शिक्षणोद्देश्यानि।
  - सूत्रवृत्तिवार्तिकभाष्यप्रकरणानाम् उद्देश्यानि।
  - पाश्चात्यदर्शनानाम् उद्देश्यानि।

पाठ्यांशः(Unit) - 3

- **दर्शनशिक्षणपद्धतिः**
  - दर्शनशिक्षणपद्धतीनां सामान्यपरिचयः।
  - आस्तिकदर्शनानां पठनपाठनपद्धतयः - व्याख्यापद्धतिः, दृष्टान्तपद्धतिः, सूत्रपद्धतिः, टीकापद्धतिः, विवरणपद्धतिः, अधिकरणपद्धतिः, उपक्रमोपसंहारपद्धतिः इत्याद्याः ।
  - नास्तिकदर्शनानां पठनपाठनपद्धतयः - व्याख्यापद्धतिः, दृष्टान्तपद्धतिः, सूत्रपद्धतिः, टीकापद्धतिः, विवरणपद्धतिः, अधिकरणपद्धतिः इत्याद्याः।
  - पाश्चात्यदर्शनानां पठनपाठनप्रणाल्यः - संवादपद्धतिः, प्रत्यक्षपद्धतिः, क्रीडापद्धतिः, प्रश्नोत्तरपद्धतिः, यात्रापद्धतिः, परियोजनापद्धतिः, स्वाध्यायपद्धतिः, आगमनपद्धतिः, निगमनपद्धतिः इत्याद्याः।

पाठ्यांशः(Unit) - 4

- **दर्शनस्य अनुप्रयोगः**
  - दर्शनशिक्षणावसरे अवधेयांशाः।
  - आस्तिकदर्शनानां जीवनस्य विभिन्नेषु प्रसङ्गेषु अनुप्रयोगः।
  - नास्तिकदर्शनानां जीवनस्य विभिन्नेषु प्रसङ्गेषु अनुप्रयोगः।
  - पाश्चात्यदर्शनसम्प्रदायानां जीवनस्य विभिन्नेषु प्रसङ्गेषु अनुप्रयोगः।

प्रायोगिकम् (Practicum)

प्रायोगिककार्यसम्पादनावसरे अधोलिखितेषु विकल्पेषु सन्दर्भोचितविकल्पस्य चयनं कर्तुं शक्यते।

1. दर्शनशिक्षणपद्धतीनां चिन्तनगोष्ठी।

   अथवा

   प्राच्यपाश्चात्यदर्शनानां विश्लेषणसत्रम्।
2. षड्दर्शनसङ्ग्रहाधारिता परियोजना।

   अथवा

   सर्वदर्शनसङ्ग्रहाधारिता परियोजना।

3. दर्शनप्रश्नकोषनिर्माणकार्यशाला।

अथवा

दर्शनतन्त्रांशनिर्माणकार्यशाला (सूत्रवार्तिकादीनि आधारीकृत्य)

4. शास्त्रार्थाभ्यासः।

अथवा

शास्त्रार्थविचारोपस्थितिः (व्यक्तिशः)

प्रवचनप्रक्रिया (Mode of Transaction)

पाठ्यविषयाणां सम्प्रेषणे अधोलिखिताः बिन्दवः प्राथम्यं भजन्ते।

- दर्शनशिक्षणेन सम्बद्धं पाठ्यपुस्तकं निर्दिष्टप्रवचनसामग्रीं चाश्रित्य शिक्षकः प्रवचनं दद्यात्।
- व्याख्या- सूत्र-टीका-दृष्टान्त-पाठ्यपुस्तक-आगमननिगमनविध्योः उपयोगेन उदाहरणपद्धत्या दृश्यश्रव्यसंसाधनैः विविधानां आधुनिकतन्त्राशानां साह्येन तदितरैः सार्थकोपक्रमैश्च प्रवचनकार्यं सम्पादयेत्।

आकलनम् (Mode of Assessment)

छात्राणां रचनात्मकक्रियाकलापैः नियतम् आकलनं शक्यम्। सत्रीयपरीक्षाप्रणाल्याः आयोजनेन अपि आकलनं करणीयम्। आकलनप्रक्रियायाः चयने दर्शनशिक्षणकुशलः आधुनिकीम् अन्तर्जालिकप्रविधिम् अपि आश्रयेत्। स्वाकलनाय आत्मपरीक्षणप्रविधेश्च प्रयोगः शक्यः। विविधाः सान्द्रमुद्रिकाः विविधाः तन्त्रांशाश्च अपि आकलानावसरे उपकुर्वन्ति।

सन्दर्भग्रन्थाः (Reference Books)

- औपनिषदसिद्धान्तः - केन्द्रीयसंस्कृतविश्वविद्यालयः
- शास्त्रशिक्षणपद्धतिः, शास्त्रपद्धतिः- केन्द्रीयसंस्कृतविश्वविद्यालयः
- सर्वदर्शनसङ्ग्रहः - चौखम्बा सुरभारती प्रकाशनम्
- अन्तर्जालेषु उपलभ्यमानाः तन्त्रांशाः
- एतान्यतिरिच्य आधुनिकस्वाध्यायसामग्र्यः अपि शिक्षकः यथोचितं संसूचयेत्।

4.4 आधुनिक विषय शिक्षण शास्त्र

हिन्दी शिक्षण – 1

सत्रार्ध – 4 **श्रेय अंक – 2**

पाठ्यपरिचयः (About the course) –

व्यावसायिक रूप से दक्ष और योग्य शिक्षक निर्माण के लिए विषयवस्तु का पुष्ट ज्ञान एवं शिक्षण विधियाँ आवश्यक सन्दर्भ हैं। अनुसन्धान स्पष्टतः दर्शाते हैं कि बालक भाषा को जल्दी सीखते हैं। यह भी कि बालक अमूर्त सम्प्रत्ययों को अपनी मातृभाषा या स्थानीय भाषा के माध्य से जल्दी सीखते हैं। इसलिए किसी भी भाषा को सीखने में उस भाषा के विकास का इतिहास, उसकी समाज में स्थिति तथा आवश्यकताओं को ध्यान में रखा जाना चाहिए। प्रस्तुत पाठ्यक्रम इसी दृष्टि को ध्यान में रखकर राष्ट्रीय शिक्षा नीति, 2020 के आलोक में हिन्दी भाषा की प्रकृति, क्षेत्र, महत्व, उद्देश्य तथा कार्यों को समझने पर बल देता है। इसमें भाषा एवं साहित्य की विविध विधाओं शिक्षण हेतु उपागमों, शिक्षणविधियों और पाठयोजना निर्माण का अध्ययन किया जाएगा।

उद्देश्य –

1. छात्राध्यापकों को दैनिक व्यवहार में हिन्दी भाषा के महत्व तथा विविध स्तरों पर उसके शिक्षण के उद्देश्यों एवं सिद्धान्तों से परिचित कराना।
2. मातृभाषा, द्वितीय भाषा, राजभाषा, राष्ट्रभाषा, सम्पर्क भाषा एवं अन्तर्राष्ट्रीय भाषा के रूप में हिन्दी व हिन्दी शिक्षण तथा त्रिभाषा सूत्र से अवगत कराना।
3. हिन्दी शिक्षण में श्रवण, भाषण, लेखन, उच्चारण एवं पठन कौशल।
4. उच्चारण एवं वर्तनी शिक्षण से परिचित कराना।
5. हिन्दी शिक्षण की विविध विधाओं की शिक्षण विधियों की जानकारी कराना।
6. हिन्दी की विविध विधाओं के लिए शिक्षणविधियों पर आधारित पाठ योजनाओं के निर्माण की योग्यता विकसित करना।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	हिन्दी शिक्षण – 1	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) - 1

हिन्दी भाषा का स्वरूप, आधारभूत कौशल एवं शिक्षण उद्देश्य

1. भाषा – अर्थ, महत्त्व एवं प्रकृति।
2. मातृभाषा, राजभाषा, राष्ट्रभाषा एवं अन्तर्राष्ट्रीय भाषा।
3. हिन्दी का सामाजिक, सांस्कृतिक एवं राष्ट्रीय महत्त्व।
4. त्रिभाषा सूत्र एवं हिन्दी की स्थिति।
5. विविध स्तरों पर हिन्दी भाषा एवं साहित्य शिक्षण के उद्देश्य।
6. भाषा शिक्षण के आधार भूत कौशल – श्रवण, वदन, लेखन व पठन।

7. उच्चारण एवं लेखन - त्रुटियाँ, निदान एवं उपचार।

पाठ्यांश:(Unit) - 2

हिन्दी विधा शिक्षणविधियाँ एवं पाठ योजना निर्माण

1. भाषा शिक्षण की प्रविधियाँ एवं विधियाँ - प्रश्नोत्तर, व्याख्या एवं स्वाध्याय।
2. विधाशिक्षण – अर्थ, महत्त्व, उद्देश्य, शिक्षण विधि एवं पाठ योजना निर्माण।
    (i) गद्य शिक्षण- अर्थ बोध विधि, व्याख्या विधि, प्रश्नोत्तर विधि।
    (ii) पद्य शिक्षण – गीत गायन विधि, रसास्वादन विधि, व्याख्या विधि।
    (iii) नाटक शिक्षण – अभिनय विधि।
    (iv) व्याकरण शिक्षण – शब्द, पद, वाक्य, लिंग, वचन, कारक।
    (v) रचना शिक्षण – अनुच्छेद लेखन, विरामचिन्ह।

प्रायोगिकम् (Practicum)-

1. हिन्दी भाषा एवं साहित्य के विविध पक्षों पर श्रवन और वाचन कौशल, समाचार वाचन।
2. माध्यमिकस्तरीय किसी कक्षा के विद्यार्थियों की हिन्दी भाषा उच्चारण एवं लेखन त्रुटियों का निदान एवं उपचार- वादविवाद और समूह चर्चा।
3. हिन्दी की विविध विधाओं पर आधारित लघु पाठ योजनाओं का निर्माण।
4. राष्ट्रीय शिक्षा नीति के सन्दर्भ में हिन्दी भाषा शिक्षण एवं विकास के मार्गदर्शक बिन्दुओं का चयन।
5. विद्यालय पत्रिका. विज्ञापन और पॉस्टर डिजाइन, ब्लॉग लेखन।
6. व्याकरण और शब्दकोश का व्यवहारिक ज्ञान।

सन्दर्भग्रन्थाः (Reference Books)–

- केशव प्रसाद (1975): हिन्दी भाषा शिक्षण, दिल्ली, गणपतराय एवं सन्स।
- क्षत्रिया, के.: मातृभाषाशिक्षण, आगरा, विनोद पुस्तक मन्दिर।
- तिवारी, भोलानाथ: भाषा विज्ञान, वाराणसी, चौखम्बा प्रकाशन।
- द्विवेदी, देवीप्रसाद: हिन्दी शिक्षण, लखनऊ, के. सं. विश्वविद्यालय परिसर, गोमती नगर।
- पाठक, दाताराम: मातृभाषा शिक्षण, भोपाल, तेजस्विनी प्रकाशन।
- पाण्डेय, रामशकल: हिन्दी शिक्षण, आगरा, विनोद पुस्तक मन्दिर।
- बघेला, हेतसिंह: हिन्दी शिक्षण, जयपुर, यूनिवर्सिटी पब्लिकेशन।
- भाई, योगेन्द्रजीत: हिन्दी भाषा शिक्षण, आगरा, विनोद पुस्तक मन्दिर।
- भारद्वाज, दिनेशचन्द्र (1985) : हिन्दी भाषा शिक्षण, आगरा, विनोद पुस्तक मन्दिर।
- वाजपेयी, किशोरीदास: हिन्दी शब्दानुशासन, आगरा, केन्द्रीय हिन्दी संस्थान।
- शुक्ल, रजनीकान्त (2012): हिन्दी शिक्षण के विविध आयाम, तिरूपति, श्रीपति प्रकाशन।
- श्रीवास्तव, आर.पी.: हिन्दी शिक्षण, नई दिल्ली, नमन प्रकाशन।
- सफाया, रघुनाथ: हिन्दी शिक्षणविधि, चण्डीगढ़, हरियाणा हिन्दी ग्रन्थ अकादमी।

- सिहं, निरंजन कुमार: माध्यमिक विद्यालयों में हन्दी शिक्षण, जयपुर, राजस्थान हिन्दी ग्रन्थ अकादमी।
- सिंह, शत्रुघ्न प्रसाद: हिन्दी शिक्षण, दिल्ली, पुस्तक सदन।
- सिंह, सावित्री: हिन्दी शिक्षण, आगरा, विनोद पुस्तक मन्दिर।
- प्रसाद, वासुदेव रंजन, आधुनिक हिन्दी व्याकरण और रचना, 23 वां संस्करण, भारती भवन पब्लिकेशन्स।

4.4 आधुनिक विषय शिक्षण शास्त्र

हिन्दी शिक्षण – 2

सत्रार्धः – 6 **श्रेय अंक– 2**

पाठ्यपरिचयः (About the course) -

हिन्दी भाषा शिक्षण को रुचिकर बनाने के लिए पारंपरिक के साथ समसामयिक संसाधनों तथा सहगामी कार्यक्रमों का आयोजन करना सिखाना इस पाठ्यक्रम का प्रमुख उद्देश्य है। राष्ट्रीय शिक्षा नीति, 2020 के अनुसार प्रत्येक स्तर पर भाषा शिक्षण को रूचिकर बनाया जाना चाहिये। इस दृष्टि से हिन्दी को मातृभाषा के रूप में पढ़ें अथवा अन्य किसी रूप में इसकी पाठनविधि रुचिकर होनी चाहिए। उद्देश्यनिष्ठ मूल्यांकन के साथ आधुनिक प्रौद्योगिकी आधारित (यथा ऑनलाइन) मूल्यांकन एवं आकलन प्रक्रिया भी हिन्दी में प्रयोग की जानी चाहिए। हिन्दी पाठ्यपुस्तक, योग्य अध्यापक निर्माण तथा हिन्दी के लिए कार्यरत संस्थाओं की कुछ जानकारी प्रदान करना इस पाठ्यक्रम का उद्देश्य है।

उद्देश्य –

1. हिन्दी में प्रयोग किए जाने वाली अधिगम सामग्री एवं सहगामी क्रियाओं का परिचय प्रदान करना।
2. मूल्यांकन की विविध पारम्परिक एवं आधुनिक विधियों से प्रशिक्षणार्थियों को अवगत कराना।
3. मूल्यांकन के लिए नीलपत्र (ब्ल्यू प्रिंट) तथा प्रश्नपत्र (ऑन लाइन-ऑफ लाइन) निर्माण का परिचय प्रदान करना।
4. हिन्दी पाठ्यपुस्तक रचना एवं हिन्दी अध्यापक के गुण।
5. हिन्दी सेवी संस्थाएँ - परिचय और उनके कार्य।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	हिन्दी शिक्षण – 2	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) - 1

हिन्दी में अधिगम सामग्री, सहगामी क्रियाएँ एवं मूल्यांकन प्रक्रिया

1. हिन्दी शिक्षण में आधुनिक दृश्य-श्रव्य साधन।
2. हिन्दी शिक्षण में सहगामी क्रियाएँ।
3. हिन्दी शिक्षण में नूतन प्रवृत्तियाँ – संगणक प्रयोग, भाषा प्रयोगशाला, सूचना प्रौद्योगिकी का प्रयोग।
4. हिन्दी शिक्षण में मूल्याङ्कन – अर्थ, प्रकार, विधियाँ, ब्ल्यूप्रिण्ट तथा प्रश्नपत्र निर्माण।

पाठ्यांशः(Unit) - 2

हिन्दी पाठ्यपुस्तक, हिन्दी शिक्षक के गुण एवं हिन्दी सेवी संस्थाएँ

1. हिन्दी पाठ्यपुस्तक रचना एवं समीक्षा बिन्दु।

2. हिन्दी के अच्छे अध्यापक के गुण व आचार संहिता।
3. हिन्दी सेवी संस्थाओं का परिचय –
   - केन्द्रीय हिन्दी संस्थान, आगरा
   - विभिन्न हिन्दी अकादमियाँ
   - हिन्दी सेवी संस्थाएँ, यथा - दक्षिण भारत हिन्दी प्रचार सभा, मध्य भारत की साहित्य समिति, राष्ट्रभाषा प्रचार समिति

प्रायोगिकम् (Practicum) -

1. गद्य पद्य शिक्षण के लिए संगोष्ठी का आयोजन।
2. हिन्दी विषय के किसी प्रकरण के लिए सहायक सामग्री का निर्माण या सहगामी क्रियाओं का आयोजन – पाठ्यपुस्तक के आधार पर अभिनय क्रियाएँ।
3. हिन्दी की किसी विधा के शिक्षण के मूल्यांकन हेतु उद्देश्यनिष्ठ नीलपत्र तथा प्रश्नपत्र निर्माण – प्रश्नोत्तरी का आयोजन।
4. हिन्दी पाठ्य पुस्तक की समीक्षा -चित्र वर्णन (मौखिक और लिखित)।
5. किसी हिन्दी सेवी संस्थान का परिचय।
6. जटिल व्याकरण नियमों – संधि, समास, अलंकार का अभ्यास।
7. किसी प्रसिद्ध साहित्यिक कि जीवनी, लोक गीतों का संग्रह।

सन्दर्भग्रन्था: (Reference Books)-

- केशव प्रसाद (1975): हिन्दी भाषा शिक्षण, दिल्ली, गणपतराय एवं सन्स।
- क्षत्रिया, के.: मातृभाषाशिक्षण, आगरा, विनोद पुस्तक मन्दिर।
- तिवारी, भोलानाथ: भाषा विज्ञान, वाराणसी, चौखम्बा प्रकाशन।
- द्विवेदी, देवीप्रसाद: हिन्दी शिक्षण, लखनऊ, के. सं. विश्वविद्यालय परिसर, गोमती नगर।
- पाठक, दाताराम: मातृभाषा शिक्षण, भोपाल, तेजस्विनी प्रकाशन।
- पाण्डेय, रामशकल: हिन्दी शिक्षण, आगरा, विनोद पुस्तक मन्दिर।
- बघेला, हेतसिंह: हिन्दी शिक्षण, जयपुर, यूनिवर्सिटी पब्लिकेशन।
- भाई, योगेन्द्रजीत: हिन्दी भाषा शिक्षण, आगरा, विनोद पुस्तक मन्दिर।
- भारद्वाज, दिनेशचन्द्र (1985): हिन्दी भाषा शिक्षण, आगरा, विनोद पुस्तक मन्दिर।
- वाजपेयी, किशोरीदास: हिन्दी शब्दानुशासन, आगरा, केन्द्रीय हिन्दी संस्थान।
- शुक्ल, रजनीकान्त (2012): हिन्दी शिक्षण के विविध आयाम, तिरूपति, श्रीपति प्रकाशन।
- श्रीवास्तव, आर.पी.: हिन्दी शिक्षण, नई दिल्ली, नमन प्रकाशन।
- सफाया, रघुनाथ: हिन्दी शिक्षणविधि, चण्डीगढ़, हरियाणा हिन्दी ग्रन्थ अकादमी।
- सिहं, निरंजन कुमार: माध्यमिक विद्यालयों में हन्दी शिक्षण, जयपुर, राजस्थान हिन्दी ग्रन्थ अकादमी।

- सिंह, शत्रुघ्न प्रसाद: हिन्दी शिक्षण, दिल्ली, पुस्तक सदन।
- सिंह, सावित्री: हिन्दी शिक्षण, आगरा, विनोद पुस्तक मन्दिर।

4.4 Modern Subject Pedagogy

English - 1

Semester – 4 **Credit – 2**

About the Course –

Interventions from quality teachers are vital in view of the objectives of NEP 2020. Sound pedagogical content knowledge and teaching methods are the determinants of a teacher's quality and professionalism. Teacher education programme strongly emphasizes pedagogy, its principles, and the practices of teaching and learning. Research clearly shows that children pick up language very quickly. It is also a well-known fact that students learn and grasp abstract concepts more quickly through their mother tongue or local language. Therefore, for teaching learning any language, maximum exposure of the language needs to be given. This course comprises of two units emphasizing the understanding of nature, scope, importance and function of English language. It focuses on historical perspective of English language with special reference to pre independence and post-independence period. It also deals with the approaches, methods of teaching and teaching learning aids for development of language skills among the children.

Learning Outcomes:

After completion of the course, student-teachers will be able to:

- Outline the aims and objectives of teaching English language at the secondary level.
- Understand the nature, scope and features of Language.
- Summarize the historical perspective of the Language.
- Discuss methods – approaches and material for teaching Language at the secondary stage in the Indian context.
- Explain teaching learning materials related to English Language education.
- Make use of multimedia in Language teaching.

Hours Distribution

पाठ्यकूटाङ्कः (Course Code)	**पाठ्यशीर्षकम् (Course Title)**	**पाठ्यस्य होराः (Hours Distribution of the Course)**			**श्रेयोऽङ्काः (Credits)**
		व्याख्यानम् (Lecture)	**अनुशिक्षणम् (Tutorial)**	**प्रायोगिकम्** (Practicum)	
	English - 1	20 hr	0	12 hr.	2

Unit – 1

Nature, Scope and Historical Perspective of English Language

1. Nature, Scope and importance of the English Language.
2. Linguistic features of English Language.
3. Historical perspective of the English language with special reference to pre-independence and post-independence period.
4. Problems of English teaching in India.

Unit – 2

Aims and Objectives of English Language

1. Aims and objectives of English language teaching at secondary level.
2. Meaning and types of developing teaching material.
3. Approaches: Deductive – Inductive, Blended learning, art-integrated.
4. Methods: Direct, Textbook, Grammar-Translation, audio-lingual method.
5. Techniques: Storytelling, role play, drama, situational conversation, Speech games
6. Concept and use of teaching learning materials.
7. Meaning & types of developing teaching material.

Practicum

1. Develop an e-content or any one topic from Language text books at secondary stage.

   OR

   Prepare relevant resource materials of the Language at the secondary level.
2. Prepare a list of Language games which can be useful at the secondary level.

   OR

   Write an article on the recommendations of NEP 2020 in context to Language development.
3. Students work in groups to create a chart, worksheet, flashcard or digital equipment's on a selected topic & explain how their.
4. Students work in groups to create a chart worksheet flashcard or digital presentation on a selected topic & explain how their teaching material supports learning.

Mode of Transaction

Lecture - cum – discussion, project-based method, problem – solving method, experiential learning, inquiry approach, ICT integrated learrning, interactive methods such as group discussions peer tutoring, workshop, observations and presentation.

Mode of Assessment

Written tests, classroom presentation, seminars, assigments, practicum, sessional – and terminal semester examinations.

Reading Materials

- National Curriculum Framework for School Education, Government of India.
- National Education Policy (NEP 2020) Govt. of India (English/Hindi)
- National policy on Education (With Modifications Undertaken in 1992). Ministry of Human Resource Development, New Delhi.
- The Right of Children to Free and Compulsory Education Act-2009, The Gazette of India 2009
- Sachdeva M.S. Teaching of English, 21st century publications, Patiala.
- Pramila Dubey, Teaching of English, Shiksha Prakashan, Jaipur.
- Annie, Vijay Kumari, Ch. Methods of Teaching English, New Era Publication, Guntur.
- Jain, R.K., Sharma, C K, Essentials of English Teaching, Vinod Pustak Mandir, Agra.
- Abha Rani Bisht, Teaching English in India, Vinod Pustak Mandir Agra.
- Subha Vyas, Aspects of English Teaching Shiksha Prakshan, Jaipur.
- Brown. H.D. (2014), Teaching by Principles An Interactive Approach to Language Pedagogy (4th ed.) Pearson Education.

4.4 Modern Subject Pedagogy

English Teaching - 2

Semester – 6 **Credit – 2**

About the Course –

Building on the previous level's knowledge of the philosophy of the Language, the course will introduce students to the core knowledge of pedagogy and planning in Language education at the secondary level. It is designed to make student-teacher aware of the teaching-learning aids and other resources available as well as created for making Language learning meaningful and joyful through lesson plan. It will also help them to know the effectiveness of such resources and the impact on the children's Language skills. It also focuses on concept and processes of evaluation based on learning outcomes, strategies for continuous assessment, school-based assessment, formative and summative assessment including 360^0 assessments.

Learning Outcomes –

After completion of this course, student-teachers will be able to :

- Develop lesson plan for effective teaching of language.
- Apply different types of teaching – learning aids during classroom teaching.
- Identify the role of a teacher in facilitating learning of the Language.
- Discuss tools and techniques of assessment and evaluation in Language teaching.
- Examine issues in Language assessment and their impact on classroom teaching.

Hours Distribution

पाठ्यकूटाङ्कः (Course Code)	**पाठ्यशीर्षकम् (Course Title)**	**पाठ्यस्य होराः (Hours Distribution of the Course)**			**श्रेयोऽङ्काः (Credits)**
		व्याख्यानम् (Lecture)	**अनुशिक्षणम् (Tutorial)**	**प्रायोगिकम्** (Practicum)	
	English - 2	20 hr	0	12 hr.	2

Unit – 1

Development of Lesson plan & Use of ICT

1. Concept need and importance of Lesson plan.
2. Developing various types of lesson plans –
    - Prose
    - Poetry

- Grammar
- Story

3. Scope and importance of using ICT in learning process of English Language.
4. Introduction of various tools, software and platform for teaching learning of Language skills at secondary level.

Unit – 2

21st Century skills for Learning & Evaluation

1. Qualities of a Language teacher as professional for enhancing teaching learning skills.
2. Assessment and evaluation: need for and importance of Languages. Formative and summative assessment of English language.
3. Tools and techniques of assessment and evaluation, unit test based on Table of Specification (TOS)
4. Basic steps of question paper setting, types of test items and preparing answer key. Feedback mechanism in teaching learning of English Language.
5. Principals of developing teaching material.

Practicum

1. Prepare outcome-based lesson plans on Prose, Poetry, Story and Grammar of Language.

   Or

   Design devices for assessment of listening, Speaking, Reading and Writing Skills of Language through activities such as debate, extempore, group discussion, speech etc.
2. List out tools and apps useful for language learning.

   Or

   Complete an online certificate course on Language from – SWAYAM portal.
3. Prepare a teaching aid for a topic from your subject specialization.

Mode of Transaction

Lecture - cum – discussion, project-based method, problem – solving method, experiential learning, inquiry approach, ICT integrated learning, interactive methods such as group discussions Peer tutoring, workshop, observations and presentation.

Mode of Assessment

Written tests, classroom presentations, seminars, assignments, practicum, sessional – and terminal semester examinations.

Suggestive Reading Materials

- National Curriculum Framework for School Education, Government of India.
- National Education Policy (NEP 2020) Govt. of India (English/Hindi)
- National Policy on Education (With Modifications Undertaken in 1992). Ministry of Human Resource Development, New Delhi.
- The Right of Children to Free and Compulsory Education Act-2009, The Gazette of India 2009
- Sachdeva M.S. Teaching of English, 21st Centery publications, Patiala.
- Pramila Dubey, Teaching of English Shiksha Prakashan, Jaipur.
- Annie, Vijay Kumari, Ch. Methods of Teaching English, New Era Publication, Guntur.
- Jain, R.K., Sharma, C K, Essentials of English Teaching, Vinod Pustak Mandir, Agra.
- Abha Rani Bisht, Teaching English in India, Vinod Pustak Mandir Agra.
- Subha Vyas Aspects of English Teaching Shiksha Prakshan Jaipur.
- Brown. H.D. (2014), Teaching by Principles an Interactive Approach to Language Pedagogy (4th ed.) Pearson Education.

4.4 सामाजिकशिक्षणशास्त्रम् - प्रथमः पाठ्यक्रमः (I)

सत्रार्द्धः – 4 **श्रेयोऽङ्कः - 2**

पाठ्यपरिचयः (About the Course)

'छात्राणां समग्रविकासः' २०२० राष्ट्रियशिक्षानीतेः प्रमुखमुद्देश्यं वर्तते। इदमुद्देश्यं प्राप्तुं गुणवत्तापूर्णशिक्षकाणां हस्तक्षेपं महत्त्वपूर्णमस्ति। शिक्षकशिक्षाकार्यक्रमः दृढ़तया शिक्षणशास्त्रे, तस्य सिद्धान्तेषु, शिक्षणाभ्यासे अधिगमे च बलं ददाति। विषयस्य गभीरज्ञानं शिक्षणविधयश्च शिक्षकगुणवत्तायाः व्यावसायिकताश्च निर्धारकतत्त्वानि भवन्ति। छात्रेभ्यः सक्रियबालकेन्द्रित-समावेशात्मकशिक्षणाधिगमवातावरणं निर्मातुं शैक्षणिकज्ञानं दृष्टिकोणञ्च शिक्षकस्य विशिष्टज्ञानं सन्दर्भयति। अथ च छात्राध्यापकानां कृते ईदृशं वातावरणनिर्माणमपेक्षितम्। सामाजिकविज्ञानशिक्षणपाठ्यक्रमस्य उद्देश्यं विभिन्नशिक्षणदृष्टिकोणैः विधिभिश्च छात्रशिक्षकाणां शैक्षणिकसामग्र्याः ज्ञानसंवर्धनमस्ति। अस्मिन् पाठ्यक्रमे पाठ्यांशद्वयं प्रायोगिककार्यञ्च सम्मिलितौ स्तः। अयं पाठ्यक्रमः सामाजिकविज्ञानस्य प्रकृतिं, क्षेत्रं, लक्ष्यम्, उद्देश्यानि, अन्यविषयैः सह सम्बन्धमवगन्तुं विकसितः। अस्मिन् पाठ्यक्रमे सामाजिकविज्ञानस्य ऐतिहासिकपरिप्रेक्ष्यं नीतीनां संस्तुतयः प्रतिपादिताः सन्ति। सामाजिकविज्ञानस्य उपागमाः, शिक्षणविधयः, अनुदेशनकौशलानि, मूल्याङ्कनस्य साधनानि च उल्लिखितानि सन्ति।

अधिगमपरिणामाः (Learning Outcomes)

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापकाः

- सामाजिकविज्ञानस्य प्रकृतिं, सम्प्रत्ययं उद्देश्यानि च ज्ञास्यन्ति।
- सामाजिकविज्ञानस्य ऐतिहासिकपृष्ठभूमिं ज्ञास्यन्ति।
- सामाजिकविज्ञान-सामाजिकाध्ययनम् इति द्वयोः भेदं ज्ञास्यन्ति।
- माध्यमिकस्तरे सामाजिकविज्ञानशिक्षणस्य लक्ष्यम् उद्देश्यानि च अवलोकयिष्यन्ति।
- सामाजिकशिक्षणस्य उपागमानां शिक्षणविधीनाञ्च प्रयोगं ज्ञास्यन्ति।
- सामाजिकविज्ञाने मूल्याङ्कनस्य विविधस्वरूपस्य परीक्षणं करिष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	सामाजिकशिक्षणशास्त्रम् – प्रथमः पाठ्यक्रमः	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) -1

सामाजिकविज्ञानस्य प्रकृतिः, क्षेत्रं, ऐतिहासिकपरिप्रेक्ष्यञ्च

1. सामाजिकविज्ञानस्य प्रकृतिः, सम्प्रत्ययः, आवश्यकता, उद्देश्यानि च।
2. सामाजिकविज्ञानस्य ऐतिहासिकपृष्ठभूमिः, दैनन्दिनजीवने सामाजिकविज्ञानस्य भूमिका च।
3. सामाजिकविज्ञानशिक्षणस्य समवेतविषयरूपेण विशेषप्रयासानां निर्धारणम्।
4. सामाजिकविज्ञान-सामाजिकाध्ययनयोः सम्प्रत्ययः।
5. सामाजिकविज्ञानसन्दर्भे विविध समितीनां, नीतीनाम्, आयोगानाञ्च संस्तुतयः परामर्शाश्च।

पाठ्यांशः(Unit) -2

सामाजिकविज्ञानस्य उद्देश्यानि, शैक्षणिकपक्षाश्च

1. माध्यमिकस्तरे सामाजिकविज्ञानशिक्षणस्य लक्ष्यम् उद्देश्यानि च।
2. सामाजिकशिक्षणस्य उपागमाः - क्षेत्राटनम्, प्रायोजना, प्रयोगात्मकाधिगमः, कला-एकीकृताधिगम्।
3. सामाजिकविज्ञानस्य शिक्षणविधयः - व्याख्यानोपेतवादविवादविधिः, समस्यासमाधानविधिः, स्रोतविधिः, एककविधिः, सर्वेक्षणविधिः, समाजीकृताभिव्यक्तिविधिः, निरीक्षिताध्ययनविधिः च।
4. अनुदेशनकौशलानां विकासः, यथा - स्पष्टीकरणम्, प्रश्नोत्तरकौशलम्।
5. सामाजिकविज्ञाने मूल्याङ्कनम् - मूल्याङ्कनस्य साधनानि उपादेयता च। उपचारात्मकशिक्षणस्य स्वरूपं, महत्त्वं प्रयोगश्च। निबन्धात्मकप्रश्नेषु प्रश्नानाम् अनुपातः वस्तुनिष्ठता च। विद्यालयाधारितं संरचनात्मकयोगात्मकमूल्याङ्कनञ्च।

प्रायोगिकम् (Practicum) -

1. सामाजिकविज्ञानस्य अवधारणां सम्प्रेषणाय भ्रमणगतिविधेः आयोजनम्।

   अथवा

   सामाजिकविज्ञानसन्दर्भे विविधनीतीनाम्, आयोगानाञ्च विश्लेषणम्।
2. माध्यमिकस्तरे सामाजिकविज्ञानस्य अवधारणाम् अधिगन्तुं अधिगमोद्देश्यानि अधिगम- परिणामस्य च विकासः।

   अथवा

   माध्यमिकस्तरे सामाजिकविज्ञानशिक्षणस्य पावरप्वाइंटप्रस्तुतिः।

प्रवचनप्रक्रिया (Mode of Transaction)

- बहुमाध्यमेन/पावरप्वाइंटप्रस्तुतिकरणेन नियोजितं व्याख्यानम्।
- लघुसमूहचर्चा, परिसंवादः, लघुविषयाधारिता संगोष्ठी, समूहचर्चा, सहशिक्षणम्, दलशिक्षणम्, सैद्धान्तिकपाठनात् चयनम्।

आकलनप्रक्रिया (Mode of Assessment)

- इदं मूल्याङ्कनं परीक्षणेषु सत्रीयकार्येषु च आधारितं भविष्यति।

सन्दर्भग्रन्थाः (Reference Books)

- पाण्डेयः, सोहनलाल, सामाजिकविज्ञानशिक्षणम्, अक्षर प्रकाशनम्, जयपुरम् - 2004
- डॉ. दातारामपाठकः, सामाजिक-अध्ययन-शिक्षणम्, तेजस्विनी प्रकाशनम्, भोपालम्, 2015
- पाण्डेय, सोहनलाल, इतिहास शिक्षण, श्याम प्रकाशन, जयपुर, 2007
- त्यागी गुरुशरणदास, सामाजिक अध्ययन का शिक्षण, विनोद पुस्तक मन्दिर, आगरा, 1990
- एन.सी.ई.आर.टी. सामाजिकविज्ञानपुस्तक 9-12
- एनईपी. 1968, 1986, 2020
- NCF एनसीएफ - 2023
- एन.सी.टी.ई. - 2009 - अध्यापक शिक्षा के लिए राष्ट्रीय पाठ्यचर्या रूपरेखा।
- Kochar S.k, Teaching of Social Studies, Sterling, Publication, New Delhi 1996
- UNESCO, (1984) Epistemology of Social Science, the Scientific statvs Values and Institutionalization, Vol, XXXVI, UNESCO Publications.

4.4 सामाजिकशिक्षणशास्त्रम् - द्वितीयः पाठ्यक्रमः (II)

सत्रार्द्धः - 6 **श्रेयोऽङ्कः - 2**

पाठ्यपरिचयः (About the course)

छात्राणां समग्रविकासः' २०२० राष्ट्रियशिक्षानीतेः प्रमुखमुद्देश्यं वर्तते । इदमुद्देश्यं प्राप्तुं गुणवत्तापूर्णशिक्षकाणां हस्तक्षेपं महत्त्वपूर्णमस्ति । शिक्षकशिक्षाकार्यक्रमः दृढ़तया शिक्षणशास्त्रे, तस्य सिद्धान्तेषु, शिक्षणाभ्यासे अधिगमे च बलं ददाति । विषयस्य गभीरज्ञानं शिक्षणविधयश्च शिक्षकगुणवत्तायाः व्यावसायिकताश्च निर्धारकतत्त्वानि भवन्ति । छात्रेभ्यः सक्रियबालकेन्द्रित-समावेशात्मकशिक्षणाधिगमवातावरणं निर्मातुं शैक्षणिकज्ञानं दृष्टिकोणञ्च शिक्षकस्य विशिष्टज्ञानं सन्दर्भयति । अथ च छात्राध्यापकानां कृते ईदृशं वातावरणनिर्माणमपेक्षितम् । सामाजिकविज्ञानशिक्षणपाठ्यक्रमस्य उद्देश्यं विभिन्नशिक्षणदृष्टिकोणैः विधिभिश्च छात्रशिक्षकाणां शैक्षणिकसामग्र्याः ज्ञानसंवर्धनमस्ति । अस्मिन् पाठ्यक्रमे पाठ्यांशद्वयं प्रायोगिककार्यञ्च सम्मिलितौ स्तः । अयं पाठ्यक्रमः सामाजिकविज्ञानपाठ्यचर्यायाः सम्प्रत्ययः, तस्य निर्माणसिद्धान्तान् पाठ्यचर्यापाठ्यक्रमयोः भेदः अन्यविषयैः सह सम्बन्धमवगन्तुं विकसितः । अस्मिन् पाठ्यक्रमे पाठ्यचर्यायाः सम्प्रत्ययः पाठ्यचर्यापाठ्यक्रमयोर्मध्ये भेदश्च, सामाजिकविज्ञाने पाठ्यचर्यानिर्माणस्य सिद्धान्ताः, विषयवस्तुनः चयनं सङ्गठनञ्च, सामाजिकविज्ञानस्य पाठ्यचर्यायां परिवर्तनं प्रभावयन्ति कारकाणि तेषां नियन्त्रणञ्च प्रतिपादितमस्ति । एककयोजनायाः (Unit Plan) पाठयोजनायाश्च (Lesson Plan) सम्प्रत्ययः, आवश्यकता महत्त्वञ्च, एककयोजनायाः पाठयोजनायाश्च प्रक्रिया, विषयवस्तुनः अधिगमानुभवानां च सङ्गठनम्, पाठयोजनायाः आदर्शप्रारूपम् उल्लिखितमस्ति ।

अधिगमपरिणामाः (Learning Outcomes)

अमुं पाठ्यक्रमम् अधीत्य छात्राध्यापकाः

- विद्यार्थिनः सामाजिकविज्ञानपाठ्यचर्यायाः सम्प्रत्ययः, तस्य निर्माणसिद्धान्तान् पाठ्यचर्यापाठ्यक्रमयोः भेदञ्च सम्यक् अवगच्छन्ति ।
- विद्यार्थिनः सामाजिकविज्ञानस्य विविधाधिगमस्रोतांसि, शिक्षणसहायकसाधनानि स्फूर्तकक्षायाश्च (Smart Classroom) उपयोगं कर्तुं प्रभवन्ति ।
- विद्यार्थिनः संज्ञानात्मक-मनोगत्यात्मक-भावात्मकक्षेत्रेषु व्यवहारात्मकोद्देश्यानि निर्मातुं वर्गीकर्तुं च समर्थाः भविष्यन्ति ।
अधिगमपरिणामाः(Learning Outcomes)

पाठ्यक्रमस्य परिपूर्त्यनन्तरं छात्राध्यापकाः -

- प्रभावोत्पादकरीत्या श्रवणे, भाषणे, पठने, लेखने समालोचनात्मके च चिन्तने स्वकीयानां क्षमतानां प्रदर्शने शक्ताः भविष्यन्ति।
- प्रभाविसम्प्रेषणे भाषायां संज्ञानात्मके च इत्यनयोर्मध्ये सम्बन्धस्थापने भाषाशास्त्रीयस्य च ज्ञानस्य कौशलस्य प्रभाविसम्प्रेषणे अनुप्रयोगे विदग्धाः भविष्यन्ति।
- सामाजिककौशलानाम् उन्नयने अन्तःवैयक्तिकसम्बन्धस्य च स्थापने समर्थाः भविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	सम्प्रेषणात्मकं संस्कृतम्	40 hr	0	24 hr.	4

पाठ्यांशः(Unit) - 1 श्रवणकौशलम्

1. अक्षरश्रवणम् (संस्कृतवर्णमाला)
2. शब्दश्रवणम्
3. वाक्यश्रवणम्
4. लघुकथाश्रवणम्

5. वार्ताश्रवणम्
6. गद्यश्रवणम् – कथा-संवाद-निबन्धादयः (हितोपदेशकथा, वैद्य-रोगी-संवादः, गुरुशिष्यसंवादः, पिता-पुत्र-संवादः, आपणिकग्राहकसंवादः इत्यादयः संवादाः श्रावणीयाः)
7. पद्यश्रवणम् – गीत-काव्य-सुभाषितानि
8. शास्त्रश्रवणम्

पाठ्यांशः(Unit) 2 - भाषणकौशलम्

1. उच्चारणकौशलम् –शब्दरूपाणि, धातुरूपाणि
2. सम्भाषणम् – (सम्भाषणशिबिरबिन्दवः)
3. वाक्यव्यवहारः (प्रथमा दीक्षा)
4. कर्तरि-कर्मणि-भावे-प्रयोगाः
5. कृत् प्रत्ययाः – क्त्वा, तुमुन् ल्यप्, ल्युट्, क्त, क्तवतु, ण्वुल्, शतृ, शानच्, क्तिन्, तव्यत्, अनीयर्
6. अव्ययपदानि –
7. विभक्तयः उपपदविभक्तयश्च
8. सङ्ख्या
9. विशेषण-विशेष्यभावः

पाठ्यांशः(Unit) 3 - पठनकौशलम्

1. विशिष्टपदानां पठनाभ्यासः
2. अर्थावबोधपूर्वकं पठनम्
3. वाक्यपठनाभ्यासः
4. दीर्घवाक्यपठनाभ्यासः - (वाक्यविस्तरः प्रथमा दीक्षा)
5. गद्यपठनम् – लघुकथा-वार्ता-संवाद-वृत्तान्तादीनां पठनम्। (सम्भाषणसन्देशः, चन्दमामाप्रभृतिसंस्कृतपत्रिकाभ्यः लघुकथापठनम्, सम्भाषणम्- प्रथमादीक्षातः संवादपठनं कारयितुं शक्यते।
6. गद्यसाहित्यपठनम् – आरोह-अवरोह-भाव-विरामादिचिह्नाभिज्ञानपूर्वकं वेग-पठनाभ्यासः। (पञ्चतन्त्रम्, शुकनासोपदेशः
7. पद्यसाहित्यपठनम् – यति-गति-लय-भाव-आरोह-अवरोहपूर्वकं पठनाभ्यासः। (संक्षेपरामायणम्,श्रीमद्भगवद्गीता, सुभाषितानि)

पाठ्यांशः(Unit) 4 - लेखनकौशलम्

1. वर्ण-पद-वाक्यलेखनाभ्यासः
2. दीर्घवाक्यलेखनाभ्यासः
3. पत्रलेखनम्, वृत्तान्तलेखनम्, वार्तालेखनम्, प्रतिवेदनलेखनम्।
4. निबन्ध-आलेख-लेखनाभ्यासः
5. अनुवादलेखनाभ्यासः।

पाठ्यांशः(Unit) 5 – सम्प्रेषणकौशलम्

1. सम्प्रेषणकौशलम्।
2. सम्प्रेषणकौशलवर्द्धनोपायाः।
3. सम्प्रेषणे लोकोक्तीनां लौकिकन्यायानां दृष्टान्तानां च सम्प्रयोगः।
4. भाषणप्रस्तुतिः।
5. भावभङ्गिमा-हस्त-नेत्रादिचालनरीतिः।
6. सम्प्रेषणे पदवाक्यप्रमाणशास्त्राणाम् अनुप्रयोगः।
7. प्राप्तसूचनानां/विषयवस्तुनः तार्किकविश्लेषणात्मकम्/समीक्षात्मकम् अध्ययनम्
8. स्वकल्पनया कथालेखनम्
9. साम्प्रतिकसन्दर्भविषये आलेख/निबन्धलेखनम्
10. काव्यरचनाभ्यासः

प्रायोगिकम् (Practicum)

- श्रवणकौशलवर्द्धनदृशा श्रुतलेखनम्।
- भाषणकौशलवर्द्धनदृशा सान्दर्भिकसम्भाषणम्। शिक्षकः एकं सन्दर्भं प्रसङ्गं वा सूचयति छात्राध्यापकौ तदनुसारेण सम्भाषणं कृत्वा प्रदर्शयेयुः। कल्पनया कथाकथनम्। आशुभाषणम्।
- पठनकौशलवर्द्धनदृशा वार्तावाचनदृश्यांकनम्। एवमेव ललितनिबन्धवाचनप्रस्तुतिः।
- कस्यचिदेकस्य सरलमानकसंस्कृतेन लिखितस्य ग्रन्थस्य/उपन्यासस्य/कथाग्रन्थस्य/ निबन्धात्मकग्रन्थस्य वा स्वाध्यायं कृत्वा सारांशलेखनम्
- अपठितगद्यांशं पठित्वा तस्य आलोचनात्मकं विश्लेषणम्।
- कामप्येकां समस्यां स्वीकृत्य समीक्षात्मकम् अध्ययनं तार्किकसमाधानोपायानां च लेखनम्।
- दैनन्दिनजीवने अर्थापनाय (Interpret) किं शिक्षणीयम्? इत्येतद्विषये प्रतिवेदनम्।
- चित्राङ्कितस्य (Video Recording) भाषणस्य उच्चारणदृष्ट्या भाषादृष्ट्या च प्रतिवेदनस्य निर्माणम्।
- समस्यायाः निरीक्षणम्, विश्लेषणं मूल्याङ्कनञ्चेति।

प्रवचनप्रक्रिया (Mode of Transaction)-

एतस्य पाठ्यक्रमस्य परिपूर्तये अन्तर्क्रियात्मकानि व्याख्यानि, अनुशिक्षणानि, विमर्शनानि, भूमिका-निर्वहणानि, परियोजनाकार्याणि, कार्यशालाः, भाषायाः जागरूकतायाः कार्याणि चेत्यादीनि विधेयानि। कक्ष्याकक्षे भाषायां वाद-विवादानाम् आयोजनेन समालोचनात्मकस्य चिन्तनस्य विकासो भवितुमर्हति। भाषाकौशलेषु अभ्यासेन विशुद्धायाः भाषायाः प्रयोगः प्रचलिष्यति। छात्राणां कृते निर्दिष्टानां कालांशानां पठनं हि अपरिहार्यं भवति।

आकलनप्रक्रिया (Mode of Assessment) -

- छात्रस्य कक्षायां अधिगमसामर्थ्यं परियोजनाकार्याणि प्रयोगकार्याणि च समीक्ष्य आकलनं विधेयम्।

सन्दर्भग्रन्थाः (Reference Books)

- प्रथमा दीक्षा (वाक्यव्यवहारः, वाक्यविस्तरः, सम्भाषणम्, वर्णमाला), केन्द्रीय संस्कृत विश्वविद्यालय, नई दिल्ली।
- संक्षेपरामायणम्,
- मिश्रः लोकमान्यः, भाषा शिक्षा, मृगाक्षी प्रकाशनम्, 5/113, विराम खण्ड, गोमती नगर, लखनऊ-2023
- शर्मा, कुलदीपः, संस्कृतशिक्षणदीपिका, केन्द्रीयसंस्कृतविश्वविद्यालयः, नई दिल्ली, 2022
- शर्मा, कुलदीपः, संस्कृतशिक्षणभूमिका, केन्द्रीयसंस्कृतविश्वविद्यालयः, नई दिल्ली, 2022
- शर्मा कुलदीपः, सचित्रं प्रहेलिकाशतकम्, आइडियल पब्लिकेशन, जौहरी बाजार, जयपुर, 2019
- तिवारी, नीलाभ, संस्कृतबोधिनी, मध्यप्रदेश संस्कृत बोर्ड, भोपाल, मध्यप्रदेश, 2007
- शर्मा, अपूर्वः, शिक्षकसंदर्शिका, प्रथमः द्वितीयः भागः, संस्कृत संवर्धन प्रतिष्ठान, नई दिल्ली
- शर्मा, अपूर्वः, अभ्याससरिणी संस्कृतव्याकरणम्, संस्कृत संवर्धन प्रतिष्ठान, नई दिल्ली
- साहूः, डॉ. सोमनाथः, शैक्षिकपरिभाषाकोशः, सरस्वती पब्लिकेशन, जयपुर, 2018
- द्विवेदी, कपिलदेवः, भाषाविज्ञान एवं भाषाशास्त्र, त्रयोदश संस्करण, विश्वविद्यालय प्रकाशन, वाराणसी, 2012

5.2 Communicative English

Semester -2 **Credit -4**

About the course

Language has undeniable things with the all kinds of learning. It enables an individual to understand new concepts, exchange ideas, and communicate thoughts with fellow beings. To appreciate fully the role of language in education, one must begin to develop a holistic perspective on language. This course aims to prepare the students teacher to teach language at the school level. It focuses on training the student teacher to the sound system of languages, word formation processes, sentence formation, semantic and pragmatic aspects of languages. The course intends to enable the learners to integrate all the four language skills. using different genres. The course helps improve basic communication skills such as listening, speaking, reading and writing skills among English language learners. The course is designed to enhance knowledge of grammar of English and enable the students to formulate grammatically correct and contextually appropriate sentences and, words and also empower with summarizing skills, overall presentation skills effectively.

Learning outcomes

After completing the course, students teachers will be able to:

- demonstrate reading, writing, listening, speaking, and thinking abilities in English.
- recognise the link between language and mental skills and demonstrate their knowledge and skills effectively for all purposes.
- build inter-personal relationships and enhance social skills.

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	Communicative English	40 hr	0	24 hr.	4

Unit 1

Understanding language and communication.

1. Language as a means of communication and language as a medium of cognition.
2. Nature and process of communication, types of communication - oral and written , Verbal and non verbal, barriers to communication.

3. Context of communication, the role of decoder, face to face interaction , turn taking conversation.

Unit 2

Understanding Grammar

1. Word and meaning, parts of speech.
2. Sentences and its constituents: Simple, complex and compound sentences. Semantics and Pragmatics: lexical meaning- synonymy, antonymy, meronymy grammatical meaning speech acts.
3. Identification of morphemes, word formation processes.

Unit 3

Basic Communication Skills

1. Classification of speech, sounds and letters, stress, pitch, tone, intonation, consonant and vowel system.
2. Speaking to learn and learning to speak. Situational conversations and role plays; Task/ activities for developing speaking (speech, elocution, discussion, debate, storytelling)
3. Presentation in speaking skills; practicing narrative skills; Body language, voice and pronunciation.

Unit 4

Reading and Writing Skills

1. Reading comprehension, types of reading, features that makes text complex, reading as an interactive process.
2. Reading discipline-based texts; vocabulary development.
3. Effective writing skills ; writing for specific purposes (essays, letter and report).

Practicum

1. Listen to recorded speech and try to understand and explain in your own words.

   OR

   Analyse sentences and their constituents as simple, complex and compound sentences.
2. Analyse a recorded video from the perspective of voice and pronunciation and write a report.

   OR

Read a novel/book/article/story of your own interest and reflect what you read? Prepare a report.

3. Prepare a video content on pronunciation of words.

   OR

   Prepare a role play between two person and do presentation.

4. Prepare a report on current scenario of English Language teaching at secondary level.

   OR

   Prepare a vocabulary learning activity based on secondary level English text book.

Mode of Transaction

Teaching this course will involve a mix of interactive lectures, tutorials, and practical involves such as discussion, role plays, projects, simulations, workshops, and language awareness activities. The teaching intents deeper approaches to learning, involving in classroom discussion, developing the critical thinking/problem solving abilities among the students and will also focus on situations we are in our daily lives. The one would be performing task that involve in natural integration of language skills. The students are expected to read assigned chapters/articles before the session and the course requires active participation from the students.

Mode of Assessment

The assessment of the learner will be primarily based on the assessment of both linguistic and communicative skills using battery of tests and test types, group works and projects.

(Reference Book)

- SP Dhanavel , English Language Teaching in India The Shifting Paradigms.
- M.S Sachdeva , Teaching of English.
- A.L Kohli , Techniques of Teaching English.
- Essential English Grammar, Raymond Murphy
- T. Balasubramanian , English Phonetics for Indian Students.
- Collins English Grammar and Composition.
- Geetha Nagaraj. English Language teaching.
- BBC book Compacta English assignment .
- You tube channels: Learn English Lab,

5.3 कलाशिक्षा (प्रदर्शकलाः दृश्यकलाश्च)

(प्रथमं सप्तमञ्च)

उदाहरणम् – 1 – काष्ठपुत्तलिका

सत्रार्द्धः – 1 **श्रेयोङ्काः – 2**

पाठ्यपरिचयः (About the course)

शैक्षिकसिद्धान्ते व्यवहारे च आत्माभिव्यक्तिरूपेण कलाया: विविधप्रकारैः सह सम्बन्धस्थापनम् अपि च तेषां प्रशंसनार्थं संवेदनशीलताया: विकासस्य आवश्यकता कश्चन महत्त्वपूर्णो विषयो वर्तते। आत्माभिव्यक्तिरूपेण छात्राणां संज्ञानात्मक–भावात्मक– क्रियात्मकपक्षाणां विकासे कलाया: अत्यधिकं योगदानं भवति, अपि च छात्रा: कस्याश्चिदपि कलायाः माध्यमेन आत्माभिव्यक्तये उपायान् अन्विष्यन्ति। एतदतिरिच्य कलाया: समालोचनात्मिका प्रशंसा सौन्दर्यपरकविशिष्टनिर्णयं कर्तुं बालकानां सामर्थ्यं विकासयति। कला प्रौढावस्थायां सांस्कृतिकप्रस्तुतीनाम् अवगमनार्थं तत्प्रशंसार्थञ्च अवधानकेन्द्रीकरणे छात्राणां सामर्थ्यं विकासयति।

छात्रा: कलाकार्ये विशिष्टम् आनन्दमनुभवन्ति , ते कलाकार्येण आत्मानम् अभिव्यक्तीकुर्वन्ति। कलामाध्यमेन छात्राणां क्रियात्मककौशलानां विकासः सम्भवति। सामाजिकीकरणस्य विभिन्नानि तत्त्वानि कलाया: विविधरूपेभ्यः प्राप्यन्ते। कलामाध्यमेन छात्राः स्वीयसहपाठिनः सम्यग् अभिजानन्ति अवगच्छन्ति च परस्परं मैत्रीञ्च स्थापयन्ति। छात्रा: विविधासु कलासु भागं गृहीत्वा समवयस्कसमूहस्य विकासमपि कुर्वन्ति। कलाद्वारा छात्रा अन्यै: सह कार्यकरणस्य ज्ञानमपि प्राप्नुवन्ति। कला छात्रेभ्यः स्वतन्त्ररूपेण चिन्तयितुं स्रष्टुं विचारयितुञ्च अवसरान् यच्छति। वस्तुत: कला एतादृशं स्थलं वर्तते यत्र संज्ञानात्मक-भावात्मक-मनोगत्यात्मकानि त्रिविधानि कार्याणि सम्मिलितानि भवन्ति।

एतदर्थं शिक्षास्नातकोत्तरच्छात्रा: येषां लक्ष्यं शिक्षणव्यवसायो वर्तते, ते यस्मिन् कार्ये संलग्नाः सन्ति तस्मिन् कार्ये कलाया: कस्यचित् तत्त्वस्य सन्निवेशस्य आवश्यकता भविष्यति। एतत्साधयितुं सामान्यरूपेण कलायाः प्रशंसायाः, कस्याश्चिद् एकस्याः कलायाः परिचयस्य, रचनात्मकाः कलात्मकाश्च भवितुं मूलभूतकौशलानां क्षमतानाञ्च आवश्यकता वर्तते। एतदतिरिच्य येषां कार्यम् अन्यविषयक्षेत्रसम्बद्धं वर्तते, तेऽपि कलाशिक्षायां समालोचनात्मकचिन्तनेन परिचिता: भवेयुः।

एवं प्रथमसत्रार्द्धे छात्रा: कञ्चन पाठ्यक्रमम् अध्येष्यन्ते। यस्योद्देश्यं कलासौन्दर्यस्य निर्णयाभिज्ञाने तत्प्रशंसायाञ्च साहाय्यप्रदानम्, कस्याश्चित् कलायाः परिचयप्रदानम्, आत्माभिव्यक्तौ रचनात्मकतां कलात्मकताञ्चानेतुं मूलभूतकौशलानां विकासश्च वर्तते। कौशलानि अभ्यासैः विकसितानि भवन्ति, अतः अस्मिन् पाठ्क्रमे कलासम्पादने वैयक्तिकप्रशिक्षणाय बलं प्रदास्यते। अस्य पाठ्यक्रमस्योद्देश्यम् अनिवार्यरूपेण सौन्दर्यपूर्ण-कलात्मकानां कुशलगतिविधीनां सम्पादनार्थं छात्राणां प्रवृत्तिविकासे साहाय्यं वर्तते, येन अन्यपाठ्यक्रमेषु विकसितानां शैक्षिककार्याणां सम्पादने योगदानं करिष्यन्ति। अत: स्पष्टरूपेण पाठ्यक्रमोऽयम् इमानि कौशलानि प्रशिक्षणार्थिनां तादृशगतिविधिभिः सह योजयिष्यति येषु छात्राध्यापकाः संलग्नाः भवन्ति , यथा- शिक्षणम्, शिक्षणाधिगमसामग्रीविकासः अन्यविषयक्षेत्राणां विषयवस्तु चेति।

काष्ठपुत्तलिका

काष्ठपुत्तलिका कलाया: किञ्चन एकीकृतरूपमस्ति, यत्र ललितकलात: प्रदर्शनकलापर्यन्तं सर्वं समाहितं वर्तते। काष्ठपुत्तलिका कलासु प्राचीनकलारूपेण मन्यते। प्राचीनकलात् काष्ठपुत्तलिका कृत्रिमकलारूपेण ज्ञायते। अस्याः कलाया: यात्रा अतीव रुचिकरा वर्तते। काष्ठकलाया: सहस्रश: रूपाणि दृश्यन्ते, येषु अङ्गुलीपुत्तलिकात:

अतिजटिलकाष्ठपुत्तलिकाया: रूपमपि दृश्यते, यत्र त्रय: जना: पुत्तलिकाया: प्रदर्शनं कुर्वन्ति। प्रत्येकमपि देशस्य प्रदेशस्य च स्वीया भिन्नैव काष्ठपुत्तलिका भवति, अतः भारतवर्षे काष्ठपुत्तलिकाया: विभिन्नानि रूपाणि दृश्यन्ते। काष्ठपुत्तलिकाया: पक्षद्वयं मुख्यतया भवति - प्रथमं पुत्तलिकायाः अभिकल्पना निर्माणञ्च, द्वितीयं पुत्तलिकायाः प्रदर्शनम्।

उपर्युक्तं कौशलद्वयमपि भिन्नमेव वर्तते। पुत्तलिकायाः अभिकल्पनायां व्यापकचिन्तनस्य प्रत्यक्षीकरणस्य प्राविधिककौशलानाम् आवश्यकता भवति, पुत्तलिकाप्रदर्शने तु उच्चस्तरीय-सम्प्रेषणकौशलानि अपेक्ष्यन्ते। अत: कौशलद्वयमिदं मिलित्वैव उच्चस्तरीयकौशलस्य निर्माणं करोति। अस्मिन् पाठ्यक्रमे छात्रा: पुत्तलिकाया: काष्ठपुत्तलिकायाश्च विभिन्नरूपाणां ज्ञानं प्राप्यन्ति। अत्र काष्ठपुत्तलिकानां स्वरूपे सौन्दर्यबोधे च परिचर्चा भविष्यति। तत: छात्राणां काष्ठपुत्तलिकानिर्माणाय अभिकल्पनायै प्रोत्साहनं क्रियते। तदनन्तरं छात्रा: पटकथां विरच्य पुत्तलिकाया: प्रदर्शनं कुर्वन्ति। लघु-लघुसमूहेषु विविधप्रकारकचर्चाधारेण परस्परसहयोगेन च क्रियमाणमिदं काष्ठपुत्तलिकानिर्माणकार्यं छात्राणां सामूहिककार्यसम्पादनकौशलानि सम्प्रत्यात्मकावबोधञ्च विकासयति।

अधिगमपरिणामाः(Learning Outcomes)

अस्य पाठ्यक्रमस्य सम्पूर्ते: अनन्तरं छात्रा:/छात्राध्यापका: –

1. प्राथमिकशिक्षायां कलायाः सौन्दर्यस्य च महत्त्वं स्पष्टीकर्तुं सक्षमाः भविष्यन्ति।
2. काष्ठपुत्तलिकाकलाया: प्रशंसापूर्वकं तत्साकं स्वीयघनिष्ठपरिचयं प्रस्तौतुं सक्षमाः भविष्यन्ति।
3. काष्ठपुत्तलिकानिर्माणे सक्षमाः भविष्यन्ति।
4. काष्ठपुत्तलिकाया: अभ्यासं सम्पाद्य लघुप्रदर्शनं कर्तुं सक्षमाः भविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	**पाठ्यशीर्षकम् (Course Title)**	**पाठ्यस्य होराः (Hours Distribution of the Course)**			**श्रेयोऽङ्काः (Credits)**
		व्याख्यानम् (Lecture)	**अनुशिक्षणम् (Tutorial)**	**प्रायोगिकम्** (Practicum)	
	कलाशिक्षा (प्रदर्शकलाः दृश्यकलाश्च) उदाहरणम् – 1 – काष्ठपुत्तलिका	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) -1

कलाशिक्षायाः सौन्दर्यस्य च महत्त्वम् (सत्रद्वयम्)

अस्यामन्वितौ कलाया: विविधोदाहरणानाम् अनुप्रयोगेण छात्राः कलायाः सौन्दर्यशास्त्रस्य च सामान्यविचारेषु मानवजीवने सौन्दर्यस्य विविधायामानां प्रकटनविषये च परिचर्चा भविष्यति। छात्रा: दैनन्दिनजीवनस्य सौन्दर्यसम्बद्धविविधपक्षाणामभिज्ञाने सौन्दर्यसम्बद्धनिर्णयविकासे च संलग्नाः भविष्यन्ति अपि च शिक्षायां कलायाः भूमिकाविषये सुपरिचिताः भविष्यन्ति। अस्याङ्गतया शिक्षायां कलायाः पक्षत्रयस्यापि परिचयः कारयिष्यते – कलायाः मूल्यं शिक्षायाञ्च उपकरणत्वेन एतदनुप्रयोगः, कलाकार्याणां नैतिकायामाः, प्रसिद्धकलायाः उच्चकलायाश्च मूल्ये विवादास्पदभेदश्चेति।

पाठ्यांशः(Unit) -2

काष्ठपुत्तलिकानाम् अभिकल्पनम् (षट् सत्राणि)

अस्यामन्वितौ छात्रा: काष्ठपुत्तिलकाकलाविषये एतदीयेतिहासविषये विशिष्य काष्ठपुत्तलिकाः कथं कार्याणि कुर्वन्ति चेति विषये ज्ञास्यन्ति। अस्यामन्वितौ काष्ठपुत्तलिकायाः प्रारूपनिर्माणार्थम् अपेक्षितकल्पनाविषये, काष्ठपुत्तलिकायाः उपयोगविषये काष्ठपुत्तलिकानिर्माणे प्रयुज्यमानप्रविधीनाञ्च विषये परिचर्चा भविष्यति। एतत् सर्वं छात्राः काष्ठपुत्तलिकायाः प्रारूपनिर्माणं विधाय अध्येष्यन्ते । छात्राः प्रथमम् अङ्गुलीकाष्ठपुत्तलिकानिर्माणं कृत्वा तदनन्तरं कर्गदमाध्यमेन मीन-पक्षि-मूषकादीनां लघ्वाकृतीनां निर्माणार्थम् अग्रेसराः भविष्यन्ति । ततश्च ते विविधप्रकारकमुखावरणानां निर्माणं करिष्यन्ति। अन्ते च ते पुरातनसमाचारपत्रैः वर्णमयपत्रकैश्च पुत्तलिकाया: निर्माणं विधाय क्रीडयितुं प्रदर्शयितुञ्च सज्जीकुर्वन्ति। अपि च ते वेशभूषासम्बद्धानि अन्यापेक्षितवस्तूनि च सज्जीकुर्वन्ति।

पाठ्यांशः(Unit) -3

पुत्तलिकानां प्रदर्शनम् (सत्रचतुष्टयम्)

अस्यामन्वितौ छात्राः काष्ठपुत्तलिकाकलां प्रदर्शयितुम् उत्तमाकर्षककथानकं निर्मातुञ्च आवश्यकसम्प्रेषणकौशलानां विषये ज्ञात्वा स्वीयनिर्मितानां काष्ठपुत्तलिकानां प्रदर्शनं करिष्यन्ति । पुत्तलिकाया: प्रदर्शनं शैक्षिकसन्दर्भे केनचित् क्रियाकलापेन सह सम्बद्धं स्यात्। सर्वेऽपि छात्रा: स्वीयनिर्मितपुत्तलिकानामेव प्रदर्शनं करिष्यन्ति। प्रारम्भे प्रत्येकमपि छात्र: स्वनिर्मितपुत्तलिकानां प्रदर्शनं करिष्यति तदनन्तरं युगलसमूहे, तत: स्वीयपुत्तलिकाभि: सह लघुनाटकं सज्जीकृत्य लघुसमूहे प्रदर्शनं करिष्यन्ति। अनेन तेषामधिगम: संघटितः प्रतिबिम्बितश्च भवति। काष्ठपुत्तलिकानिर्माणस्य विविधपक्षाणां लघुबालानां कक्षाकक्षे कथं समावेश: कर्तुं शक्यते इति विषयेऽपि परिचर्चा विधास्यते। काष्ठपुत्तलिकानिर्माणकाले वैयक्तिकान् सामूहिकांश्च अभ्यासान् आत्मसात्कर्तुं कक्षासन्दर्भे च प्रयोक्तुं चर्चा करिष्यते।

शिक्षणशास्त्रम् - शिक्षणशास्त्रं मूलत: व्यावहारिकं प्रशिक्षणं च वर्तते, अत्र अनुभवात्मकाधिगमाय अधिकं बलं दीयते। ते कार्याणि कृत्वा कलाविषये शिक्षया सह तत्सम्बन्धविषये च अधिगच्छन्ति । इयं प्रक्रिया कलाया: विविधरूपैः ललितकला, विविधवर्णयुक्तक्रीडा, वेशभूषानिर्माणकला, सौन्दर्यप्रसाधनकला, पटकथालेखनं सङ्गीतञ्चेत्यादिभिः परिचाययति।

आकलनप्रक्रिया (Mode of Assessment) -

सप्ताहानुसारं सत्राणां विवरणम्			
क्र.सं.	**शीर्षकम्**	**सत्रप्रवाह:**	**टिप्पणी**
1.	कला सौन्दर्यञ्च, दैनन्दिनजीवने कला	अनुभवानुसारम्	
2.	कलाया: महत्त्वम्, कलाया: समालोचना	परिचर्चा	
3.	कला कलाया: कृते, समाजिकोत्तरदायित्वेन सह कला, सामाजिकपरिवर्तनाय कला	वादविवादः	
4.	काष्ठपुत्तलिकाजगत्, काष्ठपुत्तलिकाया: विभिन्नरूपाणि	प्रस्तुतीकरणम्	

5.	काष्ठपुत्तलिकाया: इतिहासः	व्याख्यानम्	
6.	अङ्गुलीपुत्तलिकाया: निर्माणम्	क्रियात्मकम्	
7.	मुखावरणानां निर्माणम्	क्रियात्मकम्	
8.	पुत्तलिकानां निर्माणम्	क्रियात्मकम्	
9.	वैयक्तिकं प्रदर्शनम्	अभ्यास:	
10.	युगलप्रदर्शनम्	अभ्यास:	
11.	समूहप्रदर्शनम् – 3, 4, 5	अभ्यास:	
12.	प्रदत्तकार्यम्	लिखितम्	

सन्दर्भग्रन्था: (Reference Books)

शिक्षार्थिनाम् अधिगमसामग्रीणाञ्च आवश्यकतानुसारं शिक्षकाः पुस्तकानि/ पठनसामग्रीञ्च सूचयितुमर्हन्ति।

5.3 कलाशिक्षा (प्रदर्शनकला: दृश्यकलाश्च)

उदाहरणम् – 1 – काष्ठपुत्तलिका

सत्रार्द्धः –7 **श्रेयोङ्काः – 2**

पाठ्यपरिचयः (About the course)

शैक्षिकसिद्धान्ते व्यवहारे च आत्माभिव्यक्तिरूपेण कलायाः विविधप्रकारैः सह सम्बन्धस्थापनम् अपि च तेषां प्रशंसनार्थं संवेदनशीलतायाः विकासस्य आवश्यकता कश्चन महत्त्वपूर्णो विषयो वर्तते । आत्माभिव्यक्तिरूपेण छात्राणां संज्ञानात्मक–भावात्मक–क्रियात्मकपक्षाणां विकासे कलायाः अत्यधिकं योगदानं भवति, अपि च छात्राः कस्याश्चिदपि कलायाः माध्यमेन आत्माभिव्यक्तये उपायान् अन्विष्यन्ति । एतदतिरिच्य कलायाः समालोचनात्मिका प्रशंसा सौन्दर्यपरकविशिष्टनिर्णयं कर्तुं बालकानां सामर्थ्यं विकासयति। कला प्रौढावस्थायां सांस्कृतिकप्रस्तुतीनाम् अवगमनार्थं तत्प्रशंसार्थञ्च अवधानकेन्द्रीकरणे छात्राणां सामर्थ्यं विकासयति ।

छात्राः कलाकार्ये विशिष्टम् आनन्दमनुभवन्ति , ते कलाकार्येण आत्मानम् अभिव्यक्तीकुर्वन्ति । कलामाध्यमेन छात्राणां क्रियात्मककौशलानां विकासः सम्भवति। सामाजिकीकरणस्य विभिन्नानि तत्त्वानि कलायाः विविधरूपेभ्यः प्राप्यन्ते। कलामाध्यमेन छात्राः स्वीयसहपाठिनः सम्यग् अभिजानन्ति अवगच्छन्ति च परस्परं मैत्रीञ्च स्थापयन्ति । छात्राः विविधासु कलासु भागं गृहीत्वा समवयस्कसमूहस्य विकासमपि कुर्वन्ति। कलाद्वारा छात्रा अन्यैः सह कार्यकरणस्य ज्ञानमपि प्राप्नुवन्ति। कला छात्रेभ्यः स्वतन्त्ररूपेण चिन्तयितुं स्रष्टुं विचारयितुञ्च अवसरान् यच्छति। वस्तुतः कला एतादृशं स्थलं वर्तते यत्र संज्ञानात्मक-भावात्मक-मनोगत्यात्मकानि त्रिविधानि कार्याणि सम्मिलितानि भवन्ति ।

एतदर्थं शिक्षास्नातकोत्तरच्छात्राः येषां लक्ष्यं शिक्षणव्यवसायो वर्तते, ते यस्मिन् कार्ये संलग्नाः सन्ति तस्मिन् कार्ये कलायाः कस्यचित् तत्त्वस्य सन्निवेशस्य आवश्यकता भविष्यति । एतत्साधयितुं सामान्यरूपेण कलायाः प्रशंसायाः, कस्याश्चिद् एकस्याः कलायाः परिचयस्य, रचनात्मकाः कलात्मकाश्च भवितुं मूलभूतकौशलानां क्षमतानाञ्च आवश्यकता वर्तते । एतदतिरिच्य येषां कार्यम् अन्यविषयक्षेत्रसम्बद्धं वर्तते, तेऽपि कलाशिक्षायां समालोचनात्मकचिन्तनेन परिचिताः भवेयुः।

एवं प्रथमसत्रार्द्धे छात्राः कञ्चन पाठ्यक्रमम् अध्येष्यन्ते । यस्योद्देश्यं कलासौन्दर्यस्य निर्णयाभिज्ञाने तत्प्रशंसायाञ्च साहाय्यप्रदानम्, कस्याश्चित् कलायाः परिचयप्रदानम्, आत्माभिव्यक्तौ रचनात्मकतां कलात्मकताञ्चानेतुं मूलभूतकौशलानां विकासश्च वर्तते । कौशलानि अभ्यासैः विकसितानि भवन्ति, अतः अस्मिन् पाठ्क्रमे कलासम्पादने वैयक्तिकप्रशिक्षणाय बलं प्रदास्यते । अस्य पाठ्यक्रमस्योद्देश्यम् अनिवार्यरूपेण सौन्दर्यपूर्ण-कलात्मकानां कुशलगतिविधीनां सम्पादनार्थं छात्राणां प्रवृत्तिविकासे साहाय्यं वर्तते, येन अन्यपाठ्यक्रमेषु विकसितानां शैक्षिककार्याणां सम्पादने योगदानं करिष्यन्ति। अतः स्पष्टरूपेण पाठ्यक्रमोऽयम् इमानि कौशलानि प्रशिक्षणार्थिनां तादृशगतिविधिभिः सह योजयिष्यति येषु छात्राध्यापकाः संलग्नाः भवन्ति , यथा- शिक्षणम्, शिक्षणाधिगमसामग्रीविकासः अन्यविषयक्षेत्राणां विषयवस्तु चेति ।

काष्ठपुत्तलिका

काष्ठपुत्तलिका कलायाः किञ्चन एकीकृतरूपमस्ति, यत्र ललितकलातः प्रदर्शनकलापर्यन्तं सर्वं समाहितं वर्तते। काष्ठपुत्तलिका कलासु प्राचीनकलारूपेण मन्यते । प्राचीनकलात् काष्ठपुत्तलिका कृत्रिमकलारूपेण ज्ञायते। अस्याः कलायाः यात्रा अतीव रुचिकरा वर्तते। काष्ठकलायाः सहस्रशः रूपाणि दृश्यन्ते, येषु अङ्गुलीपुत्तलिकातः अतिजटिलकाष्ठपुत्तलिकायाः रूपमपि दृश्यते, यत्र त्रयः जनाः पुत्तलिकायाः प्रदर्शनं कुर्वन्ति । प्रत्येकमपि देशस्य

प्रदेशस्य च स्वीया भिन्नैव काष्ठपुत्तलिका भवति, अतः भारतवर्षे काष्ठपुत्तलिकाया: विभिन्नानि रूपाणि दृश्यन्ते। काष्ठपुत्तलिकाया: पक्षद्वयं मुख्यतया भवति - प्रथमं पुत्तलिकायाः अभिकल्पना निर्माणञ्च, द्वितीयं पुत्तलिकायाः प्रदर्शनम्।

उपर्युक्तं कौशलद्वयमपि भिन्नमेव वर्तते। पुत्तलिकायाः अभिकल्पनायां व्यापकचिन्तनस्य प्रत्यक्षीकरणस्य प्राविधिककौशलानाम् आवश्यकता भवति, पुत्तलिकाप्रदर्शने तु उच्चस्तरीयसम्प्रेषणकौशलानि अपेक्ष्यन्ते। अत: कौशलद्वयमिदं मिलित्वैव उच्चस्तरीयकौशलस्य निर्माणं करोति। अस्मिन् पाठ्यक्रमे छात्रा: पुत्तलिकाया: काष्ठपुत्तलिकायाश्च विभिन्नरूपाणां ज्ञानं प्राप्यन्ति। अत्र काष्ठपुत्तलिकानां स्वरूपे सौन्दर्यबोधे च परिचर्चा भविष्यति। तत: छात्राणां काष्ठपुत्तलिकानिर्माणाय अभिकल्पनायै प्रोत्साहनं क्रियते। तदनन्तरं छात्रा: पटकथां विरच्य पुत्तलिकाया: प्रदर्शनं कुर्वन्ति। लघु-लघुसमूहेषु विविधप्रकारकचर्चाधारेण परस्परसहयोगेन च क्रियमाणमिदं काष्ठपुत्तलिकानिर्माणकार्यं छात्राणां सामूहिककार्यसम्पादनकौशलानि सम्प्रत्यात्मकावबोधञ्च विकासयति।

अधिगमपरिणामाः(Learning Outcomes)

अस्य पाठ्यक्रमस्य सम्पूर्ते: अनन्तरं छात्रा:/छात्राध्यापका: –

1. प्राथमिकशिक्षायां कलायाः सौन्दर्यस्य च महत्त्वं स्पष्टीकर्तुं सक्षमाः भविष्यन्ति।
2. काष्ठपुत्तलिकाकलाया: प्रशंसापूर्वकं तत्साकं स्वीयघनिष्ठपरिचयं प्रस्तौतुं सक्षमाः भविष्यन्ति।
3. काष्ठपुत्तलिकानिर्माणे सक्षमाः भविष्यन्ति।
4. काष्ठपुत्तलिकाया: अभ्यासं सम्पाद्य लघुप्रदर्शनं कर्तुं सक्षमाः भविष्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	कलाशिक्षा (प्रदर्शनकलाः दृश्यकलाश्च) उदाहरणम् – 1 – काष्ठपुत्तलिका	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) - 1

कलाशिक्षायाः सौन्दर्यस्य च महत्त्वम् (सत्रद्वयम्)

अस्यामन्वितौ कलाया: विविधोदाहरणानाम् अनुप्रयोगेण छात्राः कलायाः सौन्दर्यशास्त्रस्य च सामान्यविचारेषु मानवजीवने सौन्दर्यस्य विविधायामानां प्रकटनविषये च परिचर्चा भविष्यति। छात्रा: दैनन्दिनजीवनस्य सौन्दर्यसम्बद्धविविधपक्षाणामभिज्ञाने सौन्दर्यसम्बद्धनिर्णयविकासे च संलग्नाः भविष्यन्ति अपि च शिक्षायां कलायाः भूमिकाविषये सुपरिचिताः भविष्यन्ति। अस्याङ्गतया शिक्षायां कलायाः पक्षत्रयस्यापि परिचयः कारयिष्यते – कलायाः मूल्यं शिक्षायाञ्च उपकरणत्वेन एतदनुप्रयोगः, कलाकार्याणां नैतिकायामाः, प्रसिद्धकलायाः उच्चकलायाश्च मूल्ये विवादास्पदभेदश्चेति।

पाठ्यांशः(Unit) - 2

काष्ठपुत्तलिकानाम् अभिकल्पनम् (षट् सत्राणि)

अस्यामन्वितौ छात्रा: काष्ठपुत्तिलकाकलाविषये एतदीयेतिहासविषये विशिष्य काष्ठपुत्तलिकाः कथं कार्याणि कुर्वन्ति चेति विषये ज्ञास्यन्ति। अस्यामन्वितौ काष्ठपुत्तलिकायाः प्रारूपनिर्माणार्थम् अपेक्षितकल्पनाविषये, काष्ठपुत्तलिकायाः उपयोगविषये काष्ठपुत्तलिकानिर्माणे प्रयुज्यमानप्रविधीनाञ्च विषये परिचर्चा भविष्यति। एतत् सर्वं छात्राः काष्ठपुत्तलिकायाः प्रारूपनिर्माणं विधाय अध्येष्यन्ते । छात्राः प्रथमम् अङ्गुलीकाष्ठपुत्तलिकानिर्माणं कृत्वा तदनन्तरं कर्गदमाध्यमेन मीन-पक्षि-मूषकादीनां लघ्वाकृतीनां निर्माणार्थम् अग्रेसराः भविष्यन्ति । ततश्च ते विविधप्रकारकमुखावरणानां निर्माणं करिष्यन्ति। अन्ते च ते पुरातनसमाचारपत्रैः वर्णमयपत्रकैश्च पुत्तलिकाया: निर्माणं विधाय क्रीडयितुं प्रदर्शयितुञ्च सज्जीकुर्वन्ति । अपि च ते वेशभूषासम्बद्धानि अन्यापेक्षितवस्तूनि च सज्जीकुर्वन्ति।

पाठ्यांशः(Unit) -3

पुत्तलिकानां प्रदर्शनम् (सत्रचतुष्टयम्)

अस्यामन्वितौ छात्राः काष्ठपुत्तलिकाकलां प्रदर्शयितुम् उत्तमाकर्षककथानकं निर्मातुञ्च आवश्यकसम्प्रेषणकौशलानां विषये ज्ञात्वा स्वीयनिर्मितानां काष्ठपुत्तलिकानां प्रदर्शनं करिष्यन्ति । पुत्तलिकाया: प्रदर्शनं शैक्षिकसन्दर्भे केनचित् क्रियाकलापेन सह सम्बद्धं स्यात् । सर्वेऽपि छात्रा: स्वीयनिर्मितपुत्तलिकानामेव प्रदर्शनं करिष्यन्ति। प्रारम्भे प्रत्येकमपि छात्र: स्वनिर्मितपुत्तलिकानां प्रदर्शनं करिष्यति तदनन्तरं युगलसमूहे, तत: स्वीयपुत्तलिकाभि: सह लघुनाटकं सज्जीकृत्य लघुसमूहे प्रदर्शनं करिष्यन्ति। अनेन तेषामधिगम: संघटितः प्रतिबिम्बितश्च भवति। काष्ठपुत्तलिकानिर्माणस्य विविधपक्षाणां लघुबालानां कक्षाकक्षे कथं समावेश: कर्तुं शक्यते इति विषयेऽपि परिचर्चा विधास्यते। काष्ठपुत्तलिकानिर्माणकाले वैयक्तिकान् सामूहिकांश्च अभ्यासान् आत्मसात्कर्तुं कक्षासन्दर्भे च प्रयोक्तुं चर्चा करिष्यते ।

शिक्षणशास्त्रम् -

शिक्षणशास्त्रं मूलत: व्यावहारिकं प्रशिक्षणं वर्तते, अत्र अनुभवात्मकाधिगमाय अधिकं बलं दीयते। ते कार्याणि कृत्वा कलाविषये शिक्षया सह तत्सम्बन्धविषये च अधिगच्छन्ति । इयं प्रक्रिया कलाया: विविधरूपैः ललितकला, विविधवर्णयुक्तक्रीडा, वेषभूषानिर्माणकला, सौन्दर्यप्रसाधनकला, पटकथालेखनं सङ्गीतञ्चेत्यादिभिः परिचाययति ।

आकलनप्रक्रिया (Mode of Assessment) -

सप्ताहानुसारं सत्राणां विवरणम्			
क्र.सं.	शीर्षकम्	सत्रप्रवाह:	टिप्पणी
1.	कला सौन्दर्यञ्च, दैनन्दिनजीवने कला	अनुभवानुसारम्	
2.	कलाया: महत्त्वम्, कलाया: समालोचना	परिचर्चा	
3.	कला कलाया: कृते, समाजिकोत्तरदायित्वेन सह कला, सामाजिकपरिवर्तनाय कला	वादविवादः	

4.	काष्ठपुत्तलिकाजगत्, काष्ठपुत्तलिकाया: विभिन्नरूपाणि	प्रस्तुतीकरणम्	
5.	काष्ठपुत्तलिकाया: इतिहासः	व्याख्यानम्	
6.	अङ्गुलीपुत्तलिकाया: निर्माणम्	क्रियात्मकम्	
7.	मुखावरणानां निर्माणम्	क्रियात्मकम्	
8.	पुत्तलिकानां निर्माणम्	क्रियात्मकम्	
9.	वैयक्तिकं प्रदर्शनम्	अभ्यास:	
10.	युगलप्रदर्शनम्	अभ्यास:	
11.	समूहप्रदर्शनम् – 3, 4, 5	अभ्यास:	
12.	प्रदत्तकार्यम्	लिखितम्	

सन्दर्भग्रन्था: (Reference Books)

शिक्षार्थिनाम् अधिगमसामग्रीणाञ्च आवश्यकतानुसारं शिक्षकाः पुस्तकानि/ पठनसामग्रीञ्च सूचयितुमर्हन्ति।

5.4 भारतावबोधः (मान्यताः ज्ञानप्रणाली च)

सत्रार्द्धः - 1 **श्रेयोऽङ्काः - 2**

पाठ्यपरिचयः (About the course)

प्राविधिकनवाचारात् पर्यावरणपरिवर्तनवशात् च गतिशीलेऽस्मिन् विश्वे युवचेतसां निर्माणाय काचिद् अन्तर्दृष्टिः आवश्यकी। अस्मिन् परिवर्तनकाले अन्तर्दृष्ट्या मनुष्यः न केवलं समाजशास्त्रीयाम् आत्मीयतां प्राप्नोति, अपितु आध्यात्मिकबौद्धिकमूलानि अपि अवाप्नोति। पाठ्यक्रमोऽयम् अर्थव्यवस्था-समाज-राजनीति-विधिशास्त्र-पर्यावरण-संस्कृति-नैतिकता-विज्ञान-दर्शनादिषु प्रमुखविषयेषु भारतीयन्यासस्य ज्ञानपरम्परायाश्च दृष्टिं प्रयच्छति। पाठ्यक्रमोऽयं भारतीयज्ञानपरम्पराणाम् अनुप्रयोगे विशिष्टं बलं प्रयच्छति, अपि च छात्रेभ्यः न केवलं भारतीयन्यासस्य ज्ञानपरम्परायाश्च ज्ञानाय अनुमोदनाय अपि तु बहुविषयकदृष्ट्या स्वातन्त्र्येण मूल्याङ्कनं कर्तुं तेषां साहाय्यं विदधाति। एतन्मूल्याङ्कनं सङ्क्रमणीयानि एकविंशशतकसम्बद्धानि कौशलानि प्राप्तुं मूल्यवतः पाठान् प्रस्तोष्यति। एतत्पाठ्यक्रमाय पूर्वज्ञानस्य पूर्वावबोधस्य च अपेक्षा न वर्तते । वर्षद्वयात्मकोऽयं पाठ्यक्रमः मूलभूतं ज्ञानं संस्थापयिष्यति तदाधारेण नवनिर्माणञ्च करिष्यति। पाठ्यक्रमोऽयं भारतीयपरम्परायाः सामान्यावबोधेन सह पूर्वतनवर्षेषु परम्परेयं कथं विकसिता चेत्यवबोधमपि छात्राणां विकासयिष्यति । पाठ्यक्रमोऽयं बहुविषयकदृष्ट्या भारतीयज्ञानस्य निर्माणस्य विकासस्य च प्रक्रियाणां घटनानां रूपरेखानिर्माणे व्याख्यासम्पादने, भारतस्य विविधपरम्पराणां मूल्याङ्कनाय तासाम् उपलब्धिपरिसीम्नोः भेदप्रकटने, कक्षायाः सन्दर्भे स्वीयच्छात्राणां भारतीयविचारेषु निहितायाः नैतिकताधारितशिक्षायाः विकासे स्पष्टीकरणे च सक्षमच्छात्राध्यापकानां निर्माणार्थं विरचितः।

अधिगमपरिणामाः (Learning Outcomes)

एतत्पाठ्यक्रमसमाप्तेः परं छात्राः -

- भारतस्य ज्ञानपरम्पराणां विशालनिधिम् अभिज्ञाय तद्विषयकगौरवभावप्रदर्शने समर्थाः भविष्यन्ति ।
- स्वार्जितानुसन्धानात्मककौशलम् आलोचनात्मकचिन्तनकौशलञ्च बहुविषयकविषयेषु अनुप्रयोक्तुं समर्थाः भविष्यन्ति ।
- विभिन्नभारतीयपरम्परापृष्ठभूमेः स्वीयच्छात्रान् सरलमाध्यमेन स्वकीयज्ञानं सारांशीकृत्य बोधयितुं समर्थाः भविष्यन्ति ।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	भारतावबोधः (मान्यताः ज्ञानप्रणाली च)	20 hr	0	12 hr.	2

पाठ्यांशः(Unit)- 1

भारतीयज्ञानपरिचयः

1. परिभाषा अवसरः प्रासङ्गिकता च ।
2. भारतीयप्राचीनज्ञानपरम्परायाः संस्कृतेश्च पुनरवलोकनस्य आवश्यकता ।

पाठ्यांशः(Unit) -2

संस्कृतिः – कला साहित्यं च

1. ललितकलाः (पारम्परिककलारूपाणि, समकालिककलाः, कला आध्यात्मिकता च, कला निजप्रत्ययः च, कला वैश्वीकरणं च।
2. प्रदर्शनकलाः (भारतीयनृत्यप्रणाली, पारम्परिकभारतीयसङ्गीतस्य अंशाः, दृश्यकलाः, लोककलाः चेत्यादयः)
3. साहित्यम् (संस्कृतसाहित्यम्, धार्मिकसाहित्यम्, भारतीयकाव्यम्, लोकसाहित्यम्, भारतीयकथासाहित्यम्, सङ्गमसाहित्यम्, कन्नड़मलयालमसाहित्यम्, बङ्गसाहित्यम् चेत्यादीनि)

पाठ्यांशः(Unit)- 3

राजनीतिः विधिशास्त्रं च

1. राजत्वं सर्वकारप्रकाराश्च (कुलीनतन्त्रं, गणतन्त्रं), स्थानीयप्रशासनम् (ग्रामप्रशासनम्)
2. विधिशास्त्रस्य आधारः – धर्मः तत्स्रोतांसि च , आपराधिकन्यायः – आरक्षकाः, कारागाराः दण्डाश्च, चाणक्यनीतितः शिक्षाः, आधुनिकभारताय शिक्षा - परम्परासञ्चालितां समतामूलां न्यायपूर्णां च राजव्यवस्थां विधिशास्त्रव्यवस्थां च प्रति।

पाठ्यांशः(Unit) - 4

अर्थव्यवस्था

1. पाषाणयुगाद् गुप्तकालं यावद् भारतीयार्थव्यवस्थायाः अवलोकनम् – नगरीकरणस्य नवसंस्कृतिः (जातिभिः, व्यापारसंघैः अन्यार्थिकसंस्थानैः सहितम्, हड़प्पासभ्यतायाः अर्थव्यवस्था, कृषेः विकासः नवव्यवसायानां प्रसारः, लेखनस्य विकासः)
2. आन्तरिकाः बाह्याश्च व्यापाराः वाणिज्यं च, व्यापारमार्गेण सह इण्डोरोमनसम्पर्काः, दक्षिणभारतीयसामुद्रिकव्यापाराः, मन्दिरार्थव्यवस्था च ।
3. भूमिस्वामित्वम् – भूम्यनुदानानि सम्पत्त्यधिकाराश्च, भूमिराजस्वप्रणालयः।
4. अर्थशास्त्रावबोधनम् – विचाराः आलोचनाश्च, आधुनिकभारतीयार्थव्यवस्थायां प्राचीनभारतीयार्थिकविचाराणां प्रासङ्गिकतायाः विन्यासः।

पाठ्यांशः(Unit) - 5

पर्यावरणं स्वास्थ्यञ्च

1. समाजपर्यावरणयोः मध्ये सन्तुलनस्य अवगमनम्। प्राकृतिकसंसाधनानां वनभूमिजलप्राणिनां विषये समाजस्य धारणा।

2. सततवास्तुकला नगरीयनियोजनं च – अद्यतनपर्यावरणीयसमस्यानां समाधानम् (स्वदेशीयज्ञानात् समाजनीतप्रयासेभ्यः सर्वोत्तमकार्याणि।)
3. भारतीयस्वास्थ्यपरम्परा – आयुर्वेदः, सिद्धः, अष्टवैद्यः, यूनानी, अन्यविचारधाराश्च, सुश्रुतचरकसंहिताभ्यां पाठाः।
4. प्राचीने भारते मानसिकं स्वास्थ्यम् – मानसिककल्याणस्य समयपरीक्षितावधारणाः (मनः, ध्यानं, मनश्शरीरसम्बन्धः, आयुर्वेदः, योगदर्शनम् आत्मा चेत्यादीनाम् अवधारणाः)

प्रायोगिकम् (Practicum)

पाठ्यक्रमसम्प्रेषणमाध्यमे व्याख्यानानि अनुशिक्षणं प्रायोगिकानुभवाश्च समाविष्टाः भविष्यन्ति।

प्रायोगिकानुभवेषु दिवसभ्रमणस्य आयोजनम्। यत् छात्राध्यापकेभ्यः दृश्यप्रदर्शनकलासम्बन्धितकार्यक्रमान् द्रष्टुं साहाय्यं विदधाति। नगरे विद्यमानानां प्राचीनवास्तुकलासम्बद्धानां तत्त्वानां चित्र-चलच्चित्रमाध्यमेन अभिज्ञाने अभिलेखीकरणे च छात्राध्यापकानां सामर्थ्यविकासपराणां गतिविधीनाम् आयोजनम्। राजनीतिविधिशास्त्रार्थव्यवस्थादिविषयाधारितानां वैयक्तिकसामूहिकप्रस्तुतीनाम् आयोजनम्।

प्रवचनप्रक्रिया (Mode of Transaction)-

संस्थाने स्थानीयपरम्परायाः व्यवस्थादीनाञ्च विकासविषये संस्कृतेः (वेश-भोजनादिपरम्पराणाम्) उत्सवाय व्याख्यान-अनुशिक्षण-संवादादिमाध्यमेन परिवारजन-वृद्ध-प्रतिवेशिभिः अन्यसामाजिकजनैश्च सह भारतीयज्ञानदिवसस्य आयोजनम् । व्याख्यानेषु शिक्षार्थि-संचालितानि भागग्राहिसत्राणि, विशेषज्ञानाम् अभ्यासकर्तॄणाञ्च (समकालिककविभिः भारतीयसाहित्यलेखकैश्च सह ललितकलाप्रदर्शनकलाभ्यासकर्तॄणाम्) अतिथिव्याख्यानानि समाविष्टानि भविष्यन्ति ।

- अनुशिक्षणेषु वृत्तचित्राणां चलचित्राणां च प्रदर्शनम्, ततश्च संवादः, केन्द्रितसमूहसंवादरूपेण (FGDS) शिक्षार्थिसंचालिताः चर्चाः, सुकरातीयचर्चाः चेत्यादयः । भारतीयवादपरम्परायाः बोधाय संवादानां वादानां वा आयोजनम्, शिक्षणस्य प्राचीनपद्धतीनां वर्तमाने प्रासङ्गिकतोपपत्ति-विचारः, दैनिकजीवने नैतिकदुविधाः अवगन्तुं निराकर्तुं च प्राचीननीतीनां मूल्यानां महत्त्वबोधाय सहकारिण्यः चर्चाश्च समाविष्टाः भविष्यन्ति ।

आकलनप्रक्रिया (Mode of Assessment) -

अधिगमाकलनस्य उपागमे अधोलिखिता बिन्दवः सम्मिलिताः भविष्यन्तिः –

उदाहरणार्थम् -

- नियतमूल्याङ्कनेन प्रतिकार्यप्रतिपुष्ट्या सहितं, नैकविधदृष्ट्या चितेषु विषयेषु छात्राध्यापकानां जिज्ञासायाः रुचेश्च समर्थनम्, येन ते बहुशास्त्रीयदृष्ट्या भारतीयज्ञानस्य निर्माणस्य विकासस्य च प्रक्रियाणां घटनानां रूपरेखां व्याख्यां च विधातुं समर्थाः स्युः।
- विभिन्नपरम्पराणां निर्माणे विकासे च प्रक्रियाणां घटनानां च समालोचनात्मकानुशीलनं स्वतन्त्रविचारांश्च प्रतिपादयितुं छात्राध्यापकानां सामर्थ्यस्य विकासः, येन तेभ्यः भारतस्य विभिन्नपरम्पराणाम् उपलब्धिषु सीमसु च भेदं कर्तुं मूल्याङ्कने सहायता स्यात्।

- प्रत्यक्षपरोक्षानुभवानां प्रयोगाः, यद्द्वारा छात्राध्यापकाः कक्षायां छात्रेषु भारतीयविचारेषु निहितां नैतिकाधारितां शिक्षां विकासयितुं स्पष्टीकर्तुं च क्षमाः स्युः।

सन्दर्भग्रन्थाः (Reference Books)

शिक्षार्थिनाम् अधिगमसामग्रीणाञ्च आवश्यकतानुसारं शिक्षकाः पुस्तकानि/ पठनसामग्रीञ्च सूचयितुमर्हन्ति।

5.4 भारतावबोधः (मान्यताः ज्ञानप्रणाली च)

सत्रार्द्धः - 2 **श्रेयोऽङ्काः - 2**

पाठ्यपरिचयः (About the course)

प्राविधिकनवाचारात् पर्यावरणपरिवर्तनवशात् च गतिशीलेऽस्मिन् विश्वे युवचेतसां निर्माणाय काचिद् अन्तर्दृष्टिः आवश्यकी। अस्मिन् परिवर्तनकाले अन्तर्दृष्ट्या मनुष्यः न केवलं समाजशास्त्रीयाम् आत्मीयतां प्राप्नोति, अपितु आध्यात्मिकबौद्धिकमूलानि अपि अवाप्नोति। पाठ्यक्रमोऽयं संस्कृति-नैतिकता-विज्ञान-गणित-तर्क-भाषाविज्ञान- दर्शनादिषु प्रमुखविषयेषु भारतीयन्यासस्य ज्ञानपरम्परायाश्च दृष्टिं प्रयच्छति। पाठ्यक्रमोऽयं भारतीयज्ञानपरम्पराणाम् अनुप्रयोगे विशिष्टं बलं प्रयच्छति, अपि च छात्रेभ्यः न केवलं भारतीयन्यासस्य ज्ञानपरम्परायाश्च ज्ञानाय अनुमोदनाय अपितु बहुविषयकदृष्ट्या स्वातन्त्र्येण मूल्याङ्कनं कर्तुं तेषां साहाय्यं विदधाति। एतन्मूल्याङ्कनं सङ्क्रमणीयानि एकविंशशतकसम्बद्धानि कौशलानि प्राप्तुं मूल्यवतः पाठान् प्रस्तोष्यति। एतत्पाठ्यक्रमाय पूर्वज्ञानस्य पूर्वावबोधस्य च अपेक्षा न वर्तते । वर्षद्वयात्मकोऽयं पाठ्यक्रमः मूलभूतं ज्ञानं संस्थापयिष्यति तदाधारेण नवनिर्माणञ्च करिष्यति। पाठ्यक्रमोऽयं भारतीयपरम्परायाः सामान्यावबोधेन सह पूर्वतनवर्षेषु परम्परेयं कथं विकसिता चेत्यवबोधमपि छात्राणां विकासयिष्यति । पाठ्यक्रमोऽयं बहुविषयकदृष्ट्या भारतीयज्ञानस्य निर्माणस्य विकासस्य च प्रक्रियाणां घटनानां रूपरेखानिर्माणे व्याख्यासम्पादने, भारतस्य विविधपरम्पराणां मूल्याङ्कनाय तासाम् उपलब्धिपरिसीम्नोः भेदप्रकटने, कक्षायाः सन्दर्भे स्वीयच्छात्राणां भारतीयविचारेषु निहितायाः नैतिकताधारितशिक्षायाः विकासे स्पष्टीकरणे च सक्षमच्छात्राध्यापकानां निर्माणार्थं विरचितः।

अधिगमपरिणामाः (Learning Outcomes)

एतत्पाठ्यक्रमसमाप्तेः परं छात्राः -

- भारतस्य ज्ञानपरम्पराणां विशालनिधिम् अभिज्ञाय तद्विषयकगौरवभावप्रदर्शने समर्थाः भविष्यन्ति ।
- स्वार्जितानुसन्धानात्मककौशलम् आलोचनात्मकचिन्तनकौशलञ्च बहुविषयकविषयेषु अनुप्रयोक्तुं समर्थाः भविष्यन्ति ।
- विभिन्नभारतीयपरम्परापृष्ठभूमेः स्वीयच्छात्रान् सरलमाध्यमेन स्वकीयज्ञानं सारांशीकृत्य बोधयितुं समर्थाः भविष्यन्ति ।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	भारतावबोधः (मान्यताः ज्ञानप्रणाली च)	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) – 1

भारतीयज्ञानपरिचयः

1. पूर्वसत्रार्द्धस्य परिभाषाणां परिचयस्य पुनःस्मारणम् ।
2. पूर्वज्ञानस्य पुनःस्मारणम् ।

पाठ्यांशः(Unit) – 2

दर्शनं नैतिकता मूल्यानि च - दार्शनिकसम्प्रदाया

1. वैशेषिकं न्यायः, साङ्ख्यं योगः, पूर्वमीमांसा, उत्तरमीमांसा (वेदान्तः) चेत्येषां सिद्धान्ताः प्रमुखविचारकाश्च, जैनबौद्धचार्वाकपरम्पराश्च ।
2. वेदान्तः – दार्शनिकप्रणाल्यः (अद्वैतः विशिष्टाद्वैतः द्वैतश्च)
3. नैतिकता, सदाचारः सामाजिकद्वन्द्वः (आत्मनेतृत्वसहितः) चेत्येषां वर्तमाने प्रासङ्गिकता ।
4. भारतीयाः आध्यात्मिकतायै कथं महत्त्वं यच्छन्ति। आध्यात्मिकता सामाजिकोत्तरदायित्वञ्च । वर्तमाने आध्यात्मिकतायाः महत्त्वम् ।
5. प्राविधिकरूपेण अस्थिरजगति नैतिकतायाः उपयोगः – नैतिकम् आधुनिकञ्च जीवनयापनम् ।
6. कल्याणार्थं व्यावहारिकवेदान्तः (सचेतनता, अन्तःसंयुक्तता, सामाजिकात्मसम्बन्धः चेति)

पाठ्यांशः(Unit) – 3

संस्कृतिः - जीवनपद्धतिः

1. भोजनम् (क्षेत्रीयव्यञ्जनानि, आयुर्वैदिकाहारः, भोजनं पर्वाणि च, शाकाहारः, भोजने जैनवादः, भोजनम् आतिथ्यं वैश्वीकरणञ्च)
2. वस्त्राणि (पारम्परिकभारतीयवस्त्राणि, वस्त्रकला, धार्मिकवेशभूषा, वस्त्राणां प्रतिष्ठा, लिङ्गं, वस्त्राणां वैश्वीकरणञ्च)
3. क्रीडाः (पारम्परिकभारतीयक्रीडाः, नियुद्धं, क्रीडा लिङ्गञ्च, क्रीडा वैश्वीकरणञ्च)
4. योगस्य जीवनपद्धतिः, प्राच्यजीवनपद्धतेः स्वीकरणम् – दीर्घायुषं प्रति मार्गः ।

पाठ्यांशः(Unit) – 4

विज्ञानं प्रविधिश्च

1. अङ्कगणितं तर्कश्च
2. प्राकृतिकविज्ञानम् - गणितं भौतिकविज्ञानं धातुविज्ञानं रसायनविज्ञानञ्च ।
3. खगोलविज्ञानम् - विश्वे भारतस्य योगदानम् ।
4. समयस्य अन्तरिक्षस्य च विषये भारतीयधारणाः ।
5. अर्थव्यवस्था-कृषि-परिवहनक्षेत्रादिषु प्रौद्योगिकी ।

पाठ्यांशः(Unit) – 5

भाषाविज्ञानपरम्परा

1. भारते भाषाविज्ञानस्य इतिहासः - प्राचीनभारतीयभाषाविज्ञानं मौखिकपरम्पराणाम् अवधारणाश्चेति।
2. संस्कृतिरूपेण भाषा - वर्षेभ्यः भाषाणां विकासः, भाषा विभिन्नसंस्कृतिसमाजानां निर्माणखण्डत्वेन च ।

3. भाषा - अभिज्ञानं संस्कृतिः इतिहासश्च।

प्रायोगिकम् (Practicum)

पाठ्यक्रमसम्प्रेषणमाध्यमे व्याख्यानानि अनुशिक्षणं प्रायोगिकानुभवाश्च समाविष्टाः भविष्यन्ति।

प्रायोगिकानुभवेषु दिवसभ्रमणस्य आयोजनम्। यत् छात्राध्यापकेभ्यः दृश्यप्रदर्शनकलासम्बन्धितकार्यक्रमान् द्रष्टुं साहाय्यं विदधाति। नगरे विद्यमानानां प्राचीनवास्तुकलासम्बद्धानां तत्त्वानां चित्र-चलच्चित्रमाध्यमेन अभिज्ञाने अभिलेखीकरणे च छात्राध्यापकानां सामर्थ्यविकासपराणां गतिविधीनाम् आयोजनम्। राजनीतिविधिशास्त्रार्थव्यवस्थादिविषयाधारितानां वैयक्तिकसामूहिकप्रस्तुतीनाम् आयोजनम्। संस्थाने स्थानीयपरम्परायाः व्यवस्थादीनाञ्च विकासविषये संस्कृतेः (वेष-भोजनादिपरम्पराणाम्) उत्सवाय व्याख्यान-अनुशिक्षण-संवादादिमाध्यमेन परिवारजन-वृद्ध-प्रतिवेशिभिः अन्यसामाजिकजनैश्च सह भारतीयज्ञानदिवसस्य आयोजनम्।

प्रवचनप्रक्रिया (Mode of Transaction)-

- व्याख्यानेषु शिक्षार्थि-संचालितानि भागग्राहिसत्राणि, विशेषज्ञानाम् अभ्यासकर्तॄणाञ्च (समकालिककविभिः भारतीयसाहित्यलेखकैश्च सह ललितकलाप्रदर्शनकलाभ्यासकर्तॄणाम्) अतिथिव्याख्यानानि समाविष्टानि भविष्यन्ति।
- अनुशिक्षणेषु वृत्तचित्राणां चलचित्राणां च प्रदर्शनम्, ततश्च संवादः, केन्द्रितसमूहसंवादरूपेण (FGDS) शिक्षार्थिसंचालिताः चर्चाः, सुकरातीयचर्चाः चेत्यादयः। भारतीयवादपरम्परायाः बोधाय संवादानां वादानां वा आयोजनम्, शिक्षणस्य प्राचीनपद्धतीनां वर्तमाने प्रासङ्गिकतोपपत्ति-विचारः, दैनिकजीवने नैतिकदुविधाः अवगन्तुं निराकर्तुं च प्राचीननीतीनां मूल्यानां महत्त्वबोधाय सहकारिण्यः चर्चाश्च समाविष्टाः भविष्यन्ति।

आकलनप्रक्रिया (Mode of Assessment)

अधिगमाकलनस्य उपागमे अधोलिखिता बिन्दवः सम्मिलिताः भविष्यन्तिः –

उदाहरणार्थम् -

- नियतमूल्याङ्कनेन प्रतिकार्यप्रतिपुष्ट्या सहितं, नैकविधदृष्ट्या चितेषु विषयेषु छात्राध्यापकानां जिज्ञासायाः रुचेश्च समर्थनम्, येन ते बहुशास्त्रीयदृष्ट्या भारतीयज्ञानस्य निर्माणस्य विकासस्य च प्रक्रियाणां घटनानां रूपरेखां व्याख्यां च विधातुं समर्थाः स्युः।
- विभिन्नपरम्पराणां निर्माणे विकासे च प्रक्रियाणां घटनानां च समालोचनात्मकानुशीलनं स्वतन्त्रविचारांश्च प्रतिपादयितुं छात्राध्यापकानां सामर्थ्यस्य विकासः, येन तेभ्यः भारतस्य विभिन्नपरम्पराणाम् उपलब्धिषु सीमसु च भेदं कर्तुं मूल्याङ्कने सहायता स्यात्।
- प्रत्यक्षपरोक्षानुभवानां प्रयोगाः, यद्द्वारा छात्राध्यापकाः कक्षायां छात्रेषु भारतीयविचारेषु निहितां नैतिकाधारितां शिक्षां विकासयितुं स्पष्टीकर्तुं च क्षमाः स्युः।

सन्दर्भग्रन्थाः (Reference Books)

शिक्षार्थिनाम् अधिगमसामग्रीणाञ्च आवश्यकतानुसारं शिक्षकाः पुस्तकानि/ पठनसामग्रीञ्च सूचयितुमर्हन्ति।

5.5 शिक्षकः समाजश्च

सत्रार्द्धः – 02 **श्रेयाङ्कः - 02**

पाठ्यपरिचयः (About the course)

युवकानां जीवनपोषणाय सकारात्मकदृष्ट्या अभिप्रेरणाय भाविजीवनाय च निस्सन्देहः शिक्षकाणां महत्त्वपूर्णभूमिका वर्तते। शिक्षकाणां निर्णायकभूमिकाविषये NEP 2020 इत्यत्र निगदितं यत् - शिक्षकाः अस्माकं बालानां भविष्यं निरूपयन्तीति। यतोहि बालाः अस्माकं राष्ट्रस्य भविष्यनिधयो वर्तन्ते। शिक्षकाणां समादरः करणीयः अपि च अध्यापनव्यवसायं प्रति उच्चमानसिकता निर्मातव्या, येन अध्यापनक्षेत्रे प्रवेशं कारयितुं सर्वोत्तमानाम् अभ्यर्थिनां कृते प्रेरणा भविष्यति। अस्माकं बालानां राष्ट्रस्य च उत्तमभविष्यस्य निर्माणे शिक्षकाणाम् अभिप्रेरणं सशक्तिकरणं च निश्चप्रचम् आवश्यकमस्ति। NEP Para 5.1 इत्यत्र परिचयात्मकखण्डे उक्तमस्ति यत् शिक्षकः शिक्षाप्रणाल्यां मौलिकसंशोधनानां केन्द्रे भवेत् अपि च समाजस्य सर्वाधिकमानितसदस्यत्वेन शिक्षकाणाम् पुनः प्रतिष्ठापने साहाय्यं करणीयम्, यतोहि ते अस्माकं भाविसन्ततेः विकासं सम्पादयन्ति।

शिक्षानीतिः शिक्षकान् सशक्तान् कर्तुं स्वीयकार्याणि यथासम्भवं प्रभाविरूपेण च सम्पादयितुञ्च सर्वविधं साहाय्यं कर्तुमपि बलं प्रयच्छति। इदं मन्यते यद् जीवनस्य सर्वाधिकप्रभावशालिवर्षेषु बालकैः सह कार्यकरणे तेषां विचारचिन्तनादिपरिष्करणे वैयक्तिक-सामाजिक-लक्ष्याणाञ्च विषये समाजस्य जीवनस्य च विषये विचारनिर्माणस्य अवसरं मातृभ्यः परं द्वितीयस्थाने शिक्षकाः प्राप्नुवन्ति, ये च व्यक्तेः समाजस्य चोभयोः विकासे अमूल्यं योगदानं विदधति।

शिक्षकः समाजश्च इत्यस्य पाठ्यक्रमस्य केन्द्रबिन्दौ अवबोधात्मकविकासः-

1. उदयमानभारतीयसमाजे मानव-संस्कृति-संसाधनानां वैश्विकप्रवाहस्य सन्दर्भे शिक्षकस्य परिवर्तितभूमिका।
2. व्यवस्थितसमाजस्य निर्माणं प्रद्यौगिक्याः अनुप्रयोगश्च।
3. शैक्षिकदृष्ट्या मानवसम्बद्धदृष्ट्या सामाजिकमानकदृष्ट्या च शिक्षकस्य भूमिका।
4. भविष्यस्य वास्तविकतायाः, अस्थिरतायाः, अनिश्चिततायाः, जटिलतायाः, अस्पष्टतायाः च परिवर्तनपरिस्थितौ वर्तमानसमये जगतः कृते शिक्षकाणाम् भूमिका।
5. अनेन पाठ्यक्रमेण छात्रशिक्षकाः शिक्षकाणां सांस्कृतिक-आचार-परम्परा-वैविध्यारितसमाजस्य भूमिकां दायित्वं च अवगन्तुं समर्थाः भवन्ति।
6. भारतस्य भावं गौरवं सांस्कृतिकपरम्परानिधिं च सम्प्राप्तुं, राष्ट्रैक्यभावपोषणार्थं छात्रशिक्षकाः दायित्वनिर्वाहकरूपेण ज्ञान-क्षमता-मूल्यादिषु सुसज्जिताः भवेयुः।
7. छात्रशिक्षकाः स्वस्य उत्तरदायित्वम् अवगच्छेयुः।
8. भविष्यस्य वंशपरम्परायाः निर्माणं कुर्युः ये खलु जागरितृनागरिकरूपेण स्वोत्तरदायित्वम् अवगन्तुं समर्थाः स्युः।
9. राष्ट्रियसंसाधनानां संरक्षणाय भारतस्य अभिवृद्धये च सक्रियभूमिकां सम्पादयेयुः।
10. विविध-सांस्कृतिक-भाषागत-सामाजिक-आर्थिकपृष्ठभूमेः छात्राणाम् आवश्यकता-लैंगिक-संवेदनशीलता-सहिष्णुतानां विषये अवधानम्।
11. अधिगमाक्षमच्छात्राः नवशिक्षापद्धतीनां प्रौद्योगिकविषयाणाम् अधिगमं कुर्युः।
12. ज्ञानस्य अभ्यासस्य च उन्नतये वर्तमानशैक्षिकविकासेन उपक्रमेण च सह व्यस्ताः भवेयुः।

13. सामाजिकसंरचना-ऐतिहासिकरीति-विश्वास-मूल्य-प्रतिबद्धता-संस्कृति-नैतिकतादीनां विषयेषु छात्रशिक्षकाणाम् अभिज्ञानम्।
14. शिक्षाविकासेन समुदायेन च सह शिक्षकाणां सम्बन्धविषये अभिज्ञानम्।

अधिगमपरिणामाः (Learning Outcomes)

पाठ्यक्रमस्य समाप्तेः अनन्तरं छात्रशिक्षकाः -

1. शिक्षकमान्यता-मूल्य-चरित्र-जीवनेतिहास-सामाजिक-सांस्कृतिकसन्दर्भ-समीक्षात्मकरूपेण अध्यापनादिविषयेषु परीक्षणं कर्तुं समर्थाः भविष्यन्ति।
2. आकर्षक-संचारक-चिन्तनात्मक-अभ्यासशिक्षकाः भविष्यन्ति।
3. विद्यालयस्य समाजस्य च स्वरूपनिर्माणे शिक्षकभूमिकायाः विषये ज्ञास्यन्ति।
4. सकारात्मककक्षाकक्षविकासस्य क्षमतां प्रदर्शयितुं समर्थाः भविष्यन्ति।
5. शिक्षकाधिगमयोः उन्नतये समीक्षात्मकरूपेण चिन्तयितुं क्षमतां सम्पादयिष्यन्ति।
6. शिक्षकसंस्थायाः सन्दर्भे संरचनात्मकायामान् अवधारणात्मकायामांश्च ज्ञास्यन्ति।

होराविवरणम् (Hours Distribution)

पाठ्यकूटाङ्कः (Course Code)	पाठ्यशीर्षकम् (Course Title)	पाठ्यस्य होराः (Hours Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रायोगिकम् (Practicum)	
	शिक्षकः समाजश्च	20 hr	0	12 hr.	2

पाठ्यांशः(Unit) - 1

शिक्षकावबोधः - वैयक्तिकव्यावसायिकयोः च अभिज्ञानम्

1. व्यापकवैयक्तिकविषये सामान्यसामाजिकसन्दर्भे च शिक्षकाभिज्ञानम् (जीवनेतिहास- शिक्षकविश्वास-मूल्य-आकाङ्क्षा-सामाजिकसन्दर्भे विविधपरिचय-शिक्षण-शिक्षा-प्रतिबद्धतादिविषयेषु)
2. व्यावसायिकशिक्षकाभिज्ञानम् - योग्यता, शिक्षणे शिक्षा, अभिवृत्तिः, अभिक्षमता, अनुभवश्च।
3. आकर्षकव्यक्तित्वयुक्तः शिक्षकः, सम्प्रेषणात्मकशिक्षकः, प्रचारकरूपेण शिक्षकः, क्षमतावान् अभ्यासकः, चिन्तनशीलः अभ्यासकः, अधिगमक्षमशिक्षकः।

पाठ्यांशः(Unit) - 2

शिक्षकपोषणम् – जीवनाय भाविजीवनाय च पाठ्यक्रमलक्ष्यभिन्नः कश्चन संवादः

1. शिक्षणम् - एकः व्यवसायः भूमिकाः च।
2. अध्यापकचारित्र्यम् –मानवस्य समृद्ध्यर्थं शिक्षकाणां निर्माणम्।
3. समग्रशिक्षकविकासः- शास्त्रेषुअन्नमयादि पञ्चकोशानां व्यवस्थायाः परिचयः।
4. अध्यापनमूल्यानि, विश्वासाः वर्तमानशिक्षणदर्शनं च - एकः चिन्तनशीलः संवादः।

पाठ्यांशः(Unit) - 3

शिक्षकसंस्थावबोधः

1. शिक्षकसंस्था - का अस्ति ? किमर्थं महत्त्वपूर्णा ?
2. शिक्षकसंस्थायाः वैयक्तिक-सांस्कृतिक-संरचनात्मकायामाः।
3. अध्यापकप्रवचनं, दर्शनं, सम्बन्धः, अन्तर्जालः व्यवसायिकविकासश्च।
4. शिक्षकसंस्थाया आह्वाहनानि - शैक्षणिकाभ्युपगमः, अभ्यासश्च।
5. शैक्षिकनीतेः कार्यान्वयने शिक्षकस्य भूमिका।

पाठ्यांशः(Unit) - 4

शिक्षकः नवभारतस्य भाविसमाजस्य च वास्तुकारः

1. समालोचनात्मकशिक्षायां संलग्नता - लैङ्गिक-जातीयता-संस्कृति-दिव्याङ्गता-वर्ग-दरिद्रता- अहितानां च पुनरूत्पादनं साक्षात्करणं चेत्यादिविषयेषु स्वस्थसंवादः।
2. अनौपचारिकशिक्षायाः स्वरुपम्

प्रायोगिकम् (Practicum)

- कस्यापि एकस्याः शिक्षकशिक्षासंस्थायाः परिचयात्मकम् उपस्थापनम्।
- स्वस्य कस्यचित्प्रियस्य शिक्षकस्य/शिक्षाविदः व्यक्तित्वकृतित्त्वस्य लेखनम्।

परामर्शस्य विनिमयः

- शिक्षकाः अनेन पाठ्यक्रमेण शिक्षकाणाम् आदर्शभूमिकायाः विषये पुनर्विचारं करिष्यन्ति।
- अयं पाठ्यक्रमः क्रियाशीलेन व्यापकशैक्षिकलक्ष्यं सम्प्राप्तुं शिक्षकान् प्रेरयति।
- अतः कक्षायां व्याख्यासु संगोष्ठी-चिन्तनाभ्यास-आलोचनात्मकचिन्तन-समूहकार्यादीनां प्रयोगो भविष्यति।
- छात्रशिक्षकः सेवापूर्वप्रशिक्षणकाले अभ्यास-ज्ञान-कौशलादिविषये विचारं कृत्वा पाठ्यक्रमे निहिततत्त्वानि अवबुध्य च विद्यालये प्रयोगं कर्तुं ज्ञास्यति।

आकलनप्रक्रिया (Mode of Assessment)

अयं पाठ्यक्रमः उत्तमः अतः मूल्याङ्कने व्यापकदृष्ट्या आलोचनात्मकचिन्तनस्य समावेशो भविष्यति।

- स्वविचारदृष्ट्या दर्शनाधारितवर्तमानशिक्षणविषये लेखनम् ।
- ख. सामाजिकसन्दर्भेषु कस्यचिद् एकस्य क्षेत्रस्य विवरणलेखनम् । (पर्यावरणस्य क्षयः, महिलानाम् अपराधः, साइबरक्राइम्-लैङ्गिक-जातीयता-संस्कृति-दिव्याङ्गजन-वर्गादिविषयेषु)

सन्दर्भग्रन्थाः (Reference Books)

प्रशिक्षकः छात्रशिक्षकान् आवश्यकतानुसारं सन्दर्भग्रन्थं पठितुं प्रेरयति।

5.6 शिक्षायां सूचनासम्प्रेषणप्रौद्योगिकी (ICT)

सत्रार्द्धः - 5 **श्रेयोऽङ्कः- 2**

पाठ्यपरिचयः (About the course)

अयं पाठ्यक्रमः छात्राध्यापकान् सङ्गणकसाक्षरतायां सूचनासम्प्रेषणप्रौद्योगिकी-सहायकाधिगमे अग्रे गन्तुं, शैक्षिकलक्ष्याणां सिद्धान्तानां च अनुरूपं सूचनासम्प्रेषणप्रविधीनां व्याख्यानञ्च कर्तुं शक्तं करोति। एतत्पत्रं शिक्षायां सूचनाप्रौद्योगिकी-विज्ञानस्य आवश्यकतायाः महत्त्वस्य च विषये छात्राध्यापकान् उन्मुखीकरोति। एतत् शिक्षायां मुक्तस्रोतमृदुतन्त्रांशस्य महत्त्वं वर्णयति। अयं पाठ्यक्रमः छात्राध्यापकाय शिक्षायां सूचनासम्प्रेषणप्रविधेः उपयोगस्य विविध-दृष्टिकोणानां, चरणानां च परिचयं ददाति। छात्राध्यापकाः विविधसङ्गणकमृदुतन्त्रांशानां, सूचनासम्प्रेषणप्रौद्योगिक्याः साधनानाञ्च यथोचितरूपेण विकासयितुं क्षमा भवेयुः।

अधिगमपरिणामाः (Learning Outcomes)

अस्य पाठ्यक्रमस्य समाप्तेरनन्तरं छात्राध्यापकाः :

- शिक्षायां सूचनाप्रौद्योगिक्याः संकल्पनां प्रकृतिं व्याप्तिञ्च व्याख्यातुं शक्नुवन्ति।
